117
14

"॥ अथ वाल्मीकिरामायणे युद्धकाण्डः ॥"

हस्तलिखितस्य समयः– संवत् १५९५ = A.D. 1538

Valmiki Ramayana – Yudh Kandh.

117/14

117/14

श्रीमद्वाल्मीकिरामयणे युद्धकांड प्रारंभः





णं व मह्रा शिवाय॥ जितं भगवता तेन हरिणा लोकधारिणा। अजेन विश्वरूपेण निर्गुणेन गु
णात्मना॥१ स सैन्ये सागरं तीर्णे रामे दशरथात्मजे। अमात्यौ रावणः श्रीमान् अब्रवीत् शु
कसारणौ॥ समग्रं कुसलं तीर्णं समुद्रं वानरं बलं। अभूतपूर्वो रामेण सेतुर्बद्धश्च साग
रे॥ अश्रद्धेयमिदं कर्म कृतं रामेण सारण। सागरे सेतुबंधेन संक्षुब्ध इव मे मनः॥ अ भीन मि
वश्यमनिसंख्येयं तन्मया वानरं बलं। भवंतौ वानरं सैन्यं प्रविश्यानुपलक्षितौ॥ वा
नरीं तनुमास्थाय परिसंख्यातुमर्हथः। बलं यात्राविधानं च योधानां विनिश्चयं॥ परि
णामं च वीर्यं च ये च मुख्याः प्लवंगमाः। मंत्रिणो ये च रामस्य ये च सुग्रीवमाश्रिताः। ये पूर्व
मभिवर्तंते ये च शूराः प्लवंगमाः। स च सेतुर्यथा बद्धः सागरे वरुणालये॥ निवेशश्च य
उद्यम
था तेषां वानराणां महावने॥ कश्च सेनापतिस्तेषां वानराणां गतायुषां॥ व्यवसायं च रामस्य वीर्यं प्र
हरणानि च। लक्ष्मणस्य च सौमित्रेस्तत्वतो ज्ञातुमर्हथः। एवं ज्ञात्वा यथातत्वं शीघ्रमागंतुमर्हथः॥ १
इति तेन यथातत्वं शीघ्रमागंतुमर्हथः॥ इति तेन समादिष्टौ राक्षसौ शुकसारणौ॥ हरिरूपधरौ

पुरीं लंकां सप्राकारां सतोरणां। उत्पाट्य संक्रामयितुं सर्वे तिष्ठंति वानराः। यादृशाः श्रीहिरामस्य वार्यं प्रहरणानि च। हनिष्य
ति पुरीं लंकां एकस्तिष्ठतु ते त्रयः। रामलक्ष्मणौ गुप्ता सा सुग्रीवेण च वाहिनी। मन्यामहे सुदुर्द्धर्षा सेंद्रैरपि सुरासुरैः। य
त्कं सेतुस्तथा बद्धो दशयोजनविस्तृतः। शतयोजनमायामस्तां सीसेनाव सागरं। निविष्टा दक्षिणे तीरे समुद्रस्य नदी
पतेः। ताम्रस्यतरमाणस्य बलस्यांतो न विद्यते। राज्ञे नगुप्तस्य रामेण लोकपालोपमेन हि। प्रहृष्टयोधाध्वजिनी वनौक
सां महात्मनां संयति युद्धमिच्छतां। अलं विरोधेन शमो विधीयतां प्रदीयतां दाशरथाय मैथिली॥ ॥ आर्षे श्रीरामाय
णे युद्धकांडे चारप्रवेशो नाम सर्गः॥ ३॥ तद्वचः पथ्यमक्लीवं सारणेन सुभाषितं। निशम्य रावणो वाक्यं पर्यभाषत सा
रणं॥ यदि मामभियुंजीरन् देवगंधर्वदानवाः। नैव सीतां प्रयच्छेयं सर्वलोकभयादपि। त्वं तु सौम्य परित्रस्तस्तां दृष्ट्वा
हरिवाहिनीं। प्रतिप्रदानं सीतायाः मन्यसे साधु निर्जितः। को हि नाम समर्थो मां समरे जेतुमर्हति॥ एकाकुं दुरणंद्यपि
नकः समर्थो जेतुमुद्यतः॥ इत्युक्त्वा परमक्रुद्धः उक्तितः परमासनात्। आरुरोह ततः श्रीमान् प्रासादं हिमपांडुरं। बा
हुतालसमुत्सेधं रावणोऽपि दिदृक्षया। ताभ्यां नराभ्यां सहितः सद्दर्शबलं महत्। पर्वतांश्च समुद्रं च संदृतं वानरर्षे
भिः। तदपारमसंख्येयं वानराणां महद्बलं। निशाम्य रावणो राजा सारणं पर्यपृच्छत। एषां वै वानराः शूराः केमु
अर्थेयाणि नः। ख्याश्च प्लवंगमाः। के पूर्वमभिवर्त्तंते के महोत्साहसम्मताः। देवान्वेयाः श्च के चात्र के मानुषबले स्थिताः। केषां शृणो २
ति सुग्रीवः के महायूथयूथपाः। किंप्रमाणबलमेवीर ये प्रधानाः प्लवंगमाः॥ श्रुत्वा तत्राक्षसेंद्रस्य वचनं परिपृच्छतः। रावण
आख्यातुमुपचक्राम सामात्यानुमुख्यान्प्लवंगमान्। एष योऽभिमुखो लंकां नर्दंस्तिष्ठति वानरः। यूथपानां सहस्राणां सार

संख्यावर्तितं ३

घोरौ प्रविष्टौ वाक्रित्स्नं बलं॥ ततस्तौ वानरं सैन्यं प्रविश्य रोमहर्षणं। संख्यातुं नाधिगच्छेतां तां तु शुकसारणौ॥ नि
ष्यतं तौ पर्वताग्रे निर्झरेषु गुहासु च। समुद्रस्य च तीरेषु वनेषूपवनेषु च। दृश्यमाने रिपुबलं प्लवमानं सह
स्तराः। तद्दृश्यमपारं हि दुर्ज्ञेयं वानरं बलं। सारणश्च शुकश्चैव संख्यातुं नाधिजग्मतुः॥ एकवर्सं महारण्ये
कृतं ते हरियूथपैः। राक्षसौ तौ महावीर्यौ संख्यातुं नि वराकुलौ॥ चरमाणं वनौकोभिर्नवरिषं तं वसंधराः। नि वेग्वंतं
निविष्टं विशमानं च क्रीममर्हेयमव्ययं। तौ ददर्श महामायो प्रतिक्रान्तो विभीषणः। आहस्यि चा महातेजा वा
नरेभ्यश्च न गोपाभिः। आववक्षेथ रामाय तां तु शुकसारणौ। निगृहीतौ नरहरिभिः उपानीतौ न राघवे। धाय
मानौ महावीर्यौ महावीर्यैस्तरैः स्तदा॥ तौ दृष्ट्वा व्यथितौ वीरौ निराशौ जीविते स्पृहा। अब्रवीत् प्रहसन् रामः सर्व
भूतहिते रतः। बलं सर्वमिदं दृष्ट्वा हरिसैन्यं समं ततः। संख्याय स्व पुरीं लंकां यथेष्टं गन्तुमर्हथः। वध्यार्हो वा
प्रमुंचामि कुरो स्मिन् रजनीचरौ। वक्तव्यो रावणस्तौ वां यथोक्तं वचनं मम। यदलं त्वं समाश्रित्य यस्तां मम
हर्षसे॥ तद्दर्शय यथाकामं ससैन्यश्च सबान्धवः। श्वोभूते नगरीं लंकां सप्राकारां सतोरणां। सराक्षसबलां परस्पर
रैर्विध्वंसितां मया। घोरं क्रोधं प्रमोक्ष्यामि ससैन्ये त्वयि रावण। वज्रमान्ते यथा वज्रं दानवेष्विव वासवः॥ इति प्रतिसमा
दिष्टौ राक्षसौ शुकसारणौ। आगम्य नगरीं लंकामब्रूतां राक्षसाधिपं। विभीषण गृहीतौ तौ वधार्हौ राक्षसेश्वर
दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा। एकस्थानगतास्तत्र चत्वारः पुरुषर्षभाः। लोकपालोपमा वीराः संप्रा
प्तामितविक्रमाः। रामो दाशरथिः श्रीमान् लक्ष्मणश्च विभीषणः। सुग्रीवश्च महातेजा महेन्द्रसमविक्रमाः। एते शक्ताः

मनुयांति महाबल...

कपिलो दीर्घकेसरः। निवृत्तः प्रेक्षते लंकां अभिगर्जन् पुनः२॥ एष रुक्षगिरिं सह्यं पर्वतं च सुदर्शनं॥ राजन्
सततमध्यास्ते रंभो नामैष यूथपः॥ त्रिंशच्छतसहस्राणि वानराणां शतानि च। शतं शतसहस्राणां त्रिंश
च्छत हरियूथपा। परिवार्यानुगच्छंति लंकां मर्दितुमोजसा॥ यस्तु कर्णौ विवृणुते जृंभते च पुनः२। न च सं
हरेद्वृषिं न च यूथाद्विधावति। महानादो वीतभयो रम्यं शाल्वेय पर्वतं। राजन्नु सततमध्यास्ते हरो
नामैष यूथपः। एतस्य बलिनः सर्वे निर्जया नाम वानराः॥ राजन्नुदश सहस्राणि च वारिंशच्च तानि च।
एषोप्यारंस्यते लंकां स्वेनानीकेन मर्दितुं॥ यस्तु मेघ इवाकाशं बहु भाच्छाद्य तिष्ठति। मध्ये वानरकोटीनां सुरा
णामिव वासवः। एष पर्वतमध्यास्ते पारियात्रमनुत्तमं। युद्धे दुःप्रसहो नाम पनसो न्नाम यूथपः। यूथपायू
थपश्रेष्ठं यं यां यूथानि नागराः। यस्तु भीमामधिष्ठाय वर्म्यं तिष्ठति रोमनयन्। स्थितं तस्यारे समुद्रस्य विता
यद्वत्सागरः। एष मंदरसंकाशो विनतो नाम यूथपः। ऊर्जं पिबति पर्णासां नदीनां उत्तमां नदीं। षष्टिः श
तसहस्राणां बलमस्य वनौकसां। युद्धायाह्वयति त्वेकः क्रमशो नाम वानरः। यस्तु गैरिकवर्णाभं वपु
र्वीरस्य तेजसा। गवयो नाम तेजस्वी क्रुद्धस्त्वामभिवर्तते। एनं शतसहस्राणां सप्ततिश्चैव पर्युपासते। यूथ
पायूथपश्रेष्ठमनुयांति महाबलं॥ इमे महाराज महापराक्रमाः कपिप्रवारास्तव ऊर्जेत कीर्तिताः। सिद्ध
द्धदर्पा बलिनः सुदुर्जया रणे समग्रैरपि देवदानवैः॥ तदा वानरसैन्यमुदीक्ष्य भीमं बलं च वीर्यं च स
मीक्ष्य तेषां। श्रुत्वा च सर्वं च ततः स राजा दशास्यकोपं प्रचकार मन्दबुद्धिः॥ इत्यार्षे श्रीरामायणे युद्धकांडे स ३
न्यदर्शनो नाम॥ ॥हंत ते संप्रवक्ष्यामि प्रेक्ष्यमाणस्य यूथपान्। राघवार्थे परिक्रांता ये न रक्षंति जीवितं

शतेन परिवारितः । यस्य घोषेण महता सप्राकारा सतोरणा । लंका प्रकंपते सर्वा सशैलवनकानना । सर्वशाखा
मृगेंद्रस्य सुग्रीवस्य महात्मनः । बलाग्रे तिष्टते शूरो नलो नामैष यूथपः । एतेन सेतुर्बद्धोयं विश्वकर्मसुतेन वि
समुद्रेणास्तु तथैव महात्मा वानरर्षभः । एष सावेष्टयं लंकां प्रार्थयन्निव तिष्टति । गिरिशृंगप्रतीकाशः पद्मकिं
जल्कसंनिभः ॥ यः पुलिंदं नदीरम्यां गिरिं पर्येति नार्बुदं । लंकामभिमुखः कोपात्वत्र भ्रान्त्येव विजृंभते । स्फोटय
त्यपि संरब्धो लांगूलाग्रं पदे पदे । यस्य लांगूलशब्देन स्वनंतीव दिशो दश ॥ एवं वानरराजेन सुग्रीवेणाभिषे
चितः ॥ वीरः पद्मसहस्रेण वृतः शंकुशतेन च । युवराजो गदे नाम त्वामाह्वयति संयुगे । यं च विष्टभ्य गाणाति नर्द
ति च सुसंततं । उत्काय परिजृंभंति क्रोधेन हरिपुंगवाः ॥ एते दुःप्रसहा राजन् घोराश्चंडवानराः । अष्टौ शत
सहस्राणि दशकोटिशतानि च । यं पुरस्कृत्य गच्छंति वाराणश्च वनचारिणः । सुतेनुर्नाम मुख्योसौ वानरस्य च यूथपः ।
एषोप्याशंसते लंकां स्वेनानीकेन मर्दितुं । श्वेतो रजतसंकाशः सपलो दीर्घजीवनः । बुद्धिमान् वानरश्रेष्टः त्रि
षु लोकेषु विश्रुतः । कर्णौ सुग्रीवमागम्य पुनर्गच्छति वानरः । विभज वानराणीकं स्वबलानि प्रहर्षयन् । यो न
दीं गोमतीं रम्यां रम्यं पर्येति पर्वतं । एष संकोचनो नाम नानाद्रिदुर्युतं गिरिं । तत्र राज्यं प्रशास्त्येष कुमु
दो नाम यूथपः । एष कोटिसहस्राणां सहस्रं संप्रकर्षति । यस्य केशा दश व्यामा दीर्घलांगूलमाश्रिताः
ताम्रा नीलाः सिताश्चैव ताः प्रकीर्णाश्च घोरकर्मणः । अदीनो रोषणश्चंडः संग्राममभिकांक्षति । वेगवान्ना
म लंकेश सुग्रीवस्य सखा बली । एषैवाशंसते लंकां स्वेनानीकेन मर्दितुं । यस्त्वेषः सिंहसंकाशः

क्रतसंचाद्दनोनाम वानराणांपितामहः। याधेनमंबुदाकारं गर्जंतमिव तोयदं। सैन्यंनिवेशयानंनजन्मं
तंवप्रपश्यसि। एषवानरमुख्यानांपत्रकोटिप्रकर्षति। इंद्रजेउरि निस्पातोयुद्धेपरमदुर्जयः। योराजा
पर्वतेश्रेष्ठोबहुकिंनरसेवते। यस्यविक्रममाणस्यशाक्रस्येवपराक्रमः। एषगंधर्वकन्यायांमुत्पन्नःकृष्ण
वमना। तदादेवासुरेयुद्धेसाह्यकाजेशतक्रतोः। यस्यवैश्रवणोराजाजंबूमुपनिषेवते। विहारशैलान
रदोभ्राताते राक्षसेश्वर। एषह्यमवनोराजाबलवान्वानरर्षभः। सेनापतिद्धःप्रकंप्योनालोनामेषवानरः।
वतःकोटीसहस्रेणाहराणांसमुपस्थितः। एषोप्योरांसतेलंकांस्वेनानानीकेनमर्द्दितुं। योगंगामनुपर्यैति
त्रासयन्गजजूथपान्। हस्तिनांवानराणांचपूर्ववैरमनुस्मरन्। एषयूथपतिर्नेतागजोगिरिगुहाशयः
हिराणवाहिनीमुख्यांनदीहिमवतीमहान्। श्रोशारवीजमासाद्यपर्वतंमंदरोपमं। रमतेवानरश्रेष्ठोदिव
राक्षसवसुधयं। एनंशतसहस्राणांसहस्रमभिवर्तते। एषदुर्द्धर्षेणोराजन्प्रमाथीनामयूथपः। वातेनेव
बोद्धतंमेघंयमेनमनुपश्यसि। विवर्त्तमानंबहुशोयत्रैतद्बहुलंरजः। एषतेसुबहुबोधाराणोलांगूलाम
हाबलाः। शतंशतसहस्राणांकोट्यकोटिःशतंतथा। एनंसमुपतिष्ठंतिगवाक्षोनामयूथपः। एषैवारास
तेलंकांस्वेनानीकेनमर्द्दितुं। वाहिनीनास्यविपुलालंकामिक्षतिमर्द्दितुं। भ्रमराचरितायत्रसर्वकालफला
क्रमाः। यंसूर्यंतुल्यवर्णाभंमनुपर्यैतिपर्वतं। प्रभयायस्यदृश्यंतेकांचनामृगपक्षिणः। यस्यप्रस्थंमहा
त्मानोनत्यजंतिमहर्षयः। तत्रैषराजन्नरमतेकांचनेमृगपर्वते। मुख्योवानरमुख्यानांकेसरीनामयूथ
पः। राजन्षष्टिसहस्राणिरम्याःकांचनपर्वताः। तेषांमध्येगिरिश्रेष्ठस्त्वमिवानघरक्षसां। तत्रैकेकपिलाः ४
श्वेताःस्ताम्रास्यामधुपिंगलाः। निवसंतिगिरिश्रेष्ठेतीक्ष्णदंष्ट्रानखायुधाः। सिंहाइवचतुर्दंष्ट्रायाघ्राइवदु
रासदाः।

दीर्घा यस्य बहुव्यामा वाला लांगूलमाश्रिताः। ताम्रनीलासिताः श्वेताः प्रकीर्णा घोरकर्मणः। विप्रकीर्णाः प्र-
काशंते सूर्यस्येव मरीचयः। यं पृष्ठतोनुगच्छंति शतशो हरियूथपाः। द्रुमानुद्यम्य सहसा शालताल शि-
लायुधाः। नीलानिव महामेघान् यांस्त्वं पश्यसि पृष्ठतः। असितांजनसंकाशान् युद्धे दृष्टपराक्रमान्
नखदंष्ट्रायुधान् वीरान् तीव्रकोपान् भयावहान्। असंख्येयाननिर्देश्यान् स्थितान् सागररोधसि
पर्वतेषु च ये केचित् नदीषु विमलासु च। एते त्वामभिवर्तंते राजन् युद्धे सुदुर्जयाः। एषां मध्ये स्थितो
राजा भीमाक्षो भीमदर्शनः। पर्जन्य इव जीमूतैः समंतात्परिवारितः। ऋक्षवंतं गिरिश्रेष्ठं अध्यास्ते न-
र्मदां पिबन्॥ सर्वर्क्षाणामधिपतिः धूम्रो नामैष यूथपः। यवीयानस्य तु भ्राता पश्यैनं पर्वतोपमं। भ्रा-
त्रा समानं रूपेण विशिष्टं तु पराक्रमे। एष वै जांबुवान्नाम महायूथपयूथपः। प्रशांतो गुरुवर्ती न सं-
ग्रामे चापराजितः। एतेन साह्यं सुमहत् कृतं शक्रे धीमता। देवासुरे जांबुवता लब्धाश्च शतशो व-
राः। आरुह्य पर्वताग्राणि क्षिपंति विपुलाः शिलाः। वद्रांश्च विविधाकारान् न मृत्योरुद्विजंति न। राक्ष-
सानां च सदृशाः पिशाचानां च लोमशाः। अग्रानीके षु तिष्ठंति बलिनो भीमविक्रमाः। अस्य सैन्यस्य बहु-
लो विवरं यथाग्निनेऽस्य सः। यत्र क्रमस्त्रिसंरब्धं प्लवमानमवस्थितं। प्रेक्षंते वानराः सर्वे स्थितं यूथपयूथ-
पं। एष राजन् सहस्राक्षमुपास्ते वम्पतार्पिने। बलवान्वीर्यवान् भीमो हरिः पद्मनिभाननः। यः स्थितं
योजने शैलं गच्छन् पार्श्वेन सेवते। ऊर्ध्वं तथैव कायेन गच्छन् व्याप्नोति योजनं। यस्मान्न परमं भूतं
न चतुष्पादिषु दृश्यते। येन युद्धं महद्दत्तं पुरा वैरोचनाय तः। पराजयं न नो प्राप्तो महानेष स यूथपः॥

तवानूर्लंकां पूर्वं सीतां वद्दृष्टवान् ॥ एतं पश्य पुरा दृष्टं कपिं ज्यायागतं पुनः । श्रेष्ठः केसरिणः पुत्रो वाताज्ञातश्रु
श्रुतिः । हनुमानिति विख्यातो लंघितो येन सागरः । कामरूपो बलवांश्चैव कामगश्चापि वानरः । अनिवार्यग
तिश्चैव यथा निलगतिस्तथा । उद्यंतं भास्करं बालो दृष्ट्वोत्पतितः किल । अनासाद्यैव पतितो भास्करोद
यने गिरौ । पतितस्य कपेरस्य हनुरेकः शिलातले । किंचिद्भिन्नो दृढहतो हनुमानेष तेन न ॥ इत्येवा
यमः प्रयोगेन मयैष विदितो हरिः । नास्य शक्यं बलं रूपं प्रभावश्चोपलक्षितुं । आशंसत्येष एवैको लंकां
मर्दितुमोजसा ॥ यस्तत्रस्यानंतरः शूरः श्यामः पद्मनिभेक्षणः । इक्ष्वाकूणामतिरथो लोके विक्रांतपौ
रुषः । यस्मिन् सनातनो धर्मो यो धर्मो नातिवर्तते । अस्त्रग्रामः स संस्कारो यस्मिन् नारे प्रतिष्ठितः । यो भिंद्या
द्गगनं बाणैर्वसुधां चावदारयेत् । यस्य मन्योरिव क्रोधः शक्रस्येव पराक्रमः ॥ यस्य भार्या जनस्थानात्
सीताप्यपहृता त्वया । सोयं दाशरथी रामो योद्धुं त्वामभिवर्तते । यस्यैव दक्षिणे पार्श्वे शुद्धजांबूनदप्रभः
विशालवक्षास्ताम्राक्षो नीलकुंचितमूर्धजः ॥ एषोस्य लक्ष्मणो नाम भ्राता प्राणसमो हितः । नये [illegible] सव्यम
युद्धे न कुशलः सर्वास्त्रविधिपारगः । अमर्षी दुर्जयो जेता विक्रांतः समरे बली ॥ रामस्य दक्षिणो बाहु
र्नित्यं प्राणो बहिश्चरः । न ह्येष राघवस्यार्थे जीवितं परिरक्षति ॥ एषोप्याशंसते युद्धे निहंतुं सर्वराक्षसा
न् । यस्तु सव्यमासाद्य पार्श्वे रामस्याश्रित्य तिष्ठति । रक्षोगणपरिवृतो भ्राता ते च विभीषणः । श्रीमता राजरा ५
जेन लंकायामभिषेवितः । त्वामेव प्रतिसंरब्धो रामसान्निध्यमागतः । यं तु पश्यसि तिष्ठंतं लक्ष्मणस्यानंतरं ।

आशाविषाश्वास्यश्वाः घोररूपाः प्लवंगमाः। तत्रैष नियमं न लेभास्करं उपतिष्ठति। अर्कस्य गतिमन्विच्छन् निधनं चम
हाकपिः। योविशालासु पामश्रातुः संग्रामे हस्तिनां न्तरे। तारायां उनिनोनीरसुखेणो नाम वानरः। निषर्वेणवततः आमा
नूहराणां वानरहस्तं। कामरूपी महावीर्यः संघर्षो समरो नितः। एराज नूदृष्टधियो विख्यातो नाम्नाशतवलिस्तु
यः॥ वनतः कोट्यासहस्रेस्तु लंकां शार्थयते कपिः। उल्कामुखश्चश्चरुषमः शरभो गंधमादनः। एकैकं एषां योध
नां कोट्यानिर्दिशन्निवर्ततः॥ अथान्ये वानरश्रेष्ठा विंध्यपर्वतवासिनः। नशक्यंते वक्तुं वाहु संख्यातुं लघु विक्र
माः॥ एते महाराज महानुभावा महाबला आप्रतिमा प्रबुद्धे। शाखामृगाः पर्वतसंनिकाशाः प्रकीर्तित मुख्य
तमाः पृथिव्यां॥ ॥इति श्रीरामायणे वाल्मीके० युद्धकांडे सैन्यवर्णनो नाम॥ सारणस्यांतरं दृष्ट्वा राक्षस
स्य महात्मनः। बलमाख्यायक्यन् सर्वं शुको वचनमब्रवीत॥ स्थितान् पश्यसि यानेतान् मत्तानिव महाद्विपान
न्यग्रोधानिव गांगेयान् शालानु हिमवतानिव। एते दुःप्रसहा राजन् बलिनः कामरूपिणः। दिव्यदान
वसंकाशाः द्देवाश्च रूपवानराः। एते कोटिसहस्राणि नवपंचवसप्त च। तथा शंकुसहस्राणि तथाबु
दशतानि च। यो ऽ पश्यसितिष्ठंतौ कुमारौ देवरूपिणौ॥ मैंदश्च द्विविद श्चोतौ नतयोविद्यतेसमः। ब्रह्म
णासमनुज्ञाता वमृतप्राशनावुभौ॥ आशंसेते पुरीं लंकामेतौ मर्दितुमोजसा॥ सुमुखो विमुखश्चैवमृ
त्युपुत्रौ पितुः समौ। प्रेक्षंतौ नगरीं लंकां कोटिभिर्दशभिर्वृतौ। आशंसते पुरीं लंकामेतौ मर्दितुमो
जसा॥ एते सुग्रीवसचिवाः किष्किंध्यानिलयास्तथा। हरयो देवगंधर्वैरुत्पन्नाः पन्नगास्तथा। यं तु पश्य
सि तिष्ठंतं प्रभिन्नमिव कुंजरं। यो बलात् क्षोभयेत् क्रुद्धः समुद्रमपि तेजसा। एषधर्षि

शक्कुजातिनां हितं सानुजस्य।१

वक्रम प्रस्तवस्तवं। आचार्यगुरवो वृद्धा रथानां पर्युपासिताः। यस्सारं सर्वशास्त्राणां मानुजाव्यं न गच्छते। गृहीतं नापि कुमुभ्र ता
विज्ञातं सारं शास्त्रस्य वांछया॥ ६६ ॥ रोः स निर्विण्णो मंत्रमहर्षैर्दिष्ट्याधिये त्यये हं। किं मां मत्य क नयं नास्ति मामुकापुरुषेव
वः। यस्य विश्वासने जिह्वा भयचकितस्तु मास्तुमं। अप्येव दहनं स्पृष्ट्वा वने तिष्ठति पादपः। राजदोषपराम्रष्टो न तिष्ठं
त्यं पराधिनः। हन्या महमिमेपापो शत्रुपक्षप्रशंसकः। यदि पूर्वोपकारो मे न क्रोधमुपनाशयेत्। ध्वंसाये
तोसुदुष्टतो संन्निकर्षादितामम। उन्मोन इष्ट मिक्का मिस्मरन्न पकृतानिवां। हतावेव कृतघ्नो योमम स्नेहप
रांमुखो। ते निवमुक्तो सभ्रौ डोतानुतो सुकसारणौ। रावणंजयशब्दैन श्रंतिमनुज्याप्तिनंदितौ। अत्रवान्तु समाप निःसलो
स्कंदशग्रीवामहोदरं। उपस्थायमेशं त्रुं वारास्त्वतिविचक्षणाः। ततस्वाराः संचरिताः आप्ताः पार्थिवशासनात्। उ विश्वाति
पस्थिताः प्रांजलयो वर्द्धयित्वा जयाशिषः। तानब्रवीत्ततो वाक्यं रावणो राक्षसाधिपः। बिनानानुश्चयं यिनः श्रेयस्त नः
मक्कान विगतसाध्वसान्। कृत्वागच्छत रामस्य व्यवसायं परीक्ष्यथ। मंत्रे के स्य तरास्तस्य प्रीतिं कृन सदागतः। क
थस्य यैषरजनीकतरे रोषयते पथा॥ विज्ञाय निपुणं सर्वमागंतव्यमशेषतः। चारेण विदितः शत्रुः पंडितैर्वसु
क्षिप्यते धाधिपैः। युद्धे चाल्पेन यत्नेन समासाद्य निरस्यते। चारास्तु तेतथेत्युक्ता प्रहृष्टा राक्षसेश्वरं। कृत्वा प्रदक्षिणं
जग्मुः यत्र रामः सलक्ष्मणः। ता सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ। आसाते हरिसैन्येन संवृतो सवि उपनि
सविभीषणौ। प्रेक्षन्तां श्वरन्नसस्य तान् ददर्श विभीषणः। ते हिमायाधराहृष्टा राक्षसेन्द्रेण राक्षसाः। विभीष शितः
णेन संग्रामाग्निगृहीताय दृच्छया। वानरैरर्द्दिताश्चेव विक्रांतैर्लघुविक्रमैः। दृष्या पुरेण रामेणाद्दर्शयित्वा ६६
वमंततः। मुक्तास्ते राक्षसास्तेन धर्मज्ञेन महात्मना। पुनर्लंकामनुप्राप्ताः श्वसंतो नष्टचेतसः॥ ततो दशग्री

=पालव्यति

सर्वशाखामृगेंद्राणां भर्तारमपराजितं । तेजसा यशसा बुद्ध्या बलेनाभिजनेन च । यः कपीनतिसंभ्राजते हि-
मवानिव पर्वतान् । किष्किंधां यः समध्यास्ते गुहां वानरसंकुलां । दुर्गां पर्वतदुर्गस्थां कामरूपा महाबलः
यस्यैषा कांचनी माला शोभते शतपुष्करा । कांता देवमनुष्याणां यत्र लक्ष्मीः प्रतिष्ठिता । एतां मालां च तारां च कपि-
राज्यं च शाश्वतं । रामेण वालिनं हत्वा सुग्रीवे प्रतिपादितं । शतं शतसहस्राणां कोटिमाहुर्मनीषिणः । शतं
कोटिसहस्राणां शंकुरित्यभिधीयते । शतं शंकुसहस्राणां वृंदमाहुर्मनीषिणः । शतं वृंदसहस्राणां महावृं-
दमिहोच्यते । महावृंदमिहोच्यते । सहस्राणां शतं पद्ममिहोच्यते । शतं पद्मसहस्राणां महापद्ममिहोच्य-
ते । एष कोटिसहस्रेण शंकूनां च शतेन च । एष वृंदसहस्रेण महावृंदशतेन च । एष पद्मसहस्रेण महाप-
द्मशतेन च । एष सैन्येन सर्वेषां सुसंरब्धो न पार्थिवः । सुग्रीवो वानरेंद्रस्त्वां संग्रहारार्थमुद्यतः । इमां महाय-
ऊ समीक्ष्य वाहिनीं समुन्नतां प्रज्वलितग्रहोपमां । ततः प्रयत्नः परमो विधीयतां यथा जयः स्यान्न परैः पराज-
यः ॥ ॥ इति श्रीरामायणे युद्धकांडे शुकवाक्यं नाम सर्गः ॥ शुकेन तु समाख्यातं दृष्ट्वा तां हरिवाहिनीं । समीप-
स्थं च रामस्य भ्रातरं स्वं विभीषणं । लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणं । सर्ववानरराजानं सुग्रीवं चाप-
राजितं ॥ ईषदागतसंत्रासो जातक्रोधश्च रावणः । भर्त्सयामास तेजस्वी कथांते शुकसारणौ ॥ तावुवाच दश-
ग्रीवो मन्युना संप्रकंपितः । रोषगद्गदया वाचा संरब्धस्तर्जयन्निव । न तु तत्सदृशं नाम सचिवैरुपजीवि-
भिः । विप्रियं नृपतेर्वक्तुं निग्रहानुग्रहे प्रभुं । रिपूणां प्रतिकूलानां युद्धार्थमभिवर्त्ततां । उभाभ्यां सदृशं नाम

पश्यामो ज्ञात्वा तेषां बलाबलं । अवश्यं बलसंख्यानं कर्तव्यं जयलिप्सता ॥ अथैवमुक्तः शार्दूलो रावणेनोत्तमेश्वरः ॥
इदं वचनमारेभे वक्तुं रावणसंसदि । ऋक्षराजस्य पुत्रोस्ति राजन् राज्ञां सुदुर्जयः । पितामहसुतश्चात्र जांबु
वानिति विश्रुतः । सहस्राक्षसुतश्रीमान् सुग्रीवो वानरेश्वरः । राक्षसानामभावाय सबलः समुपस्थितः । सुषे
णश्चापि धर्मात्मा पुत्रो धर्मस्य वीर्यवान् । दृष्टः सोमात्मजश्चात्र राजन् दधिमुखो हरिः । सुमुखो वि
मुखश्चैव वेगदर्शी च वानरः । मृत्युर्वानररूपेण ननु मे षां प्रवेशितः । स्वयंभुवा महाराज मृत्योः पुत्राश्च ते
स्मृताः । पुत्रो हुताशनश्चैव नीलः सेनापतिः स्वयं । अनिलस्य तु पुत्रोत्र हनुमानिति विश्रुतः । नप्ता शक्रस्य दु
र्धर्षो बलवानंगदो युवा । मैंदश्च द्विविदश्चैव वीरौ तावश्विनोः सुतौ । पुत्रा वैवस्वतस्यात्र पंच कालांतको
पमाः । गजो गवाक्ष ऋषभ शरभो गंधमादनः । श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मजावुभौ । वरुणस्य तु
पुत्रोत्र हेमकूटः प्रतापवान् । विश्वकर्मसुतश्चात्र नलो नाम महाकपिः । येन सेतुर्महान् बद्धः सागरे वरु
णालये । दश वानरकोट्योत्र शूराणां युद्धकांक्षिणां । श्रीमतां देवपुत्राणां शेषं नाख्यातुमुत्सहे । पुत्रो दश
रथश्चात्र सिंहसंहननो युवा । दूषणो निहतो येन खरश्च त्रिशिरास्तथा । वाली च निहतो येन कबंधश्च महा
बलः । विराधश्चैव दुर्धर्षो राक्षसोनंतविक्रमः । नास्ति रामस्य सदृशो विक्रमे भुवि कश्चन । वक्तुं न शक्यो रा
मस्य विक्रमे सदृशो भुवि । जनस्थानगता येन वनस्था राक्षसा हताः । स एष वां समरे योद्धुं उद्यतः सग
रो बली ॥ लक्ष्मणश्चापि धर्मात्मा मातंगानामिवर्षभः । यस्य बाणपथं प्राप्य न जीवेदपि वासवः । राक्षसा ७
नां विशिष्टश्च तव भ्राता विभीषणः । परिगृह्य पुरीं लंकां राघवस्य हिते रतः । इति सर्वं समाख्यातं तवेदं द्वि
षतां बलं ।

वमुपक्लिताः पुनः अराबहिर्निर्ययुस्तानिशाचरा। गिरेः सुमीवेलस्य समापन्नासिवैन्यवेदयन्। नामबलंनव
द्वलं॥ ॥इतिवाल्मीकीये सुंदरकांडे नारस्रे षरोनाम॥ वाढमाणंविषर्मंज शार्दूलशोककर्शितं। मयांज नाषणा इतर
लिरुलतेरंगैः श्वसंतमिवपन्नगं। उवाचतत्सन्नेवरावणोभीमदर्शनः। अथयथावसं तेनसैदानश्रा
सिनिशाचरः। नासिकश्चिदमित्राणां क्रुद्धानांवशमागतः॥ इतितेनानुशिष्टस्तु वचोमंदमुदारयन्। म
हाराक्षसशार्दूलं शार्दूलोवाक्यमब्रवीत्। नतेवारयितुं शक्याराजन्वानरपुंगवाः। विक्रांताबलवंत
क्रशानत्र नः। अराघवेणापिरक्षिताः। नापिसंभाषितुं शक्याः संप्रश्नोपि नलभ्यते। सर्वतोरक्ष्यते पंथा वानरैः पर्वतो
पामेः। प्रविष्टमात्रोज्ञातोहं बलेतस्मिन्नचारिते। तथागृहीतो बलिभिर्बहुधाविप्रकर्शितः। जानुभिर्मुष्टि
भिर्दंतैस्तलैश्चापिहतोभृशं॥ विप्रणातास्मिहरिभिर्बलवद्भिरमर्षणैः। भ्रामयित्वाचसर्वत्र नीतोहंरा
मसंसदि। रुधिरास्रुतसर्वांगो विक्लवश्चलितेंद्रियः। हरिभिर्वध्यमानश्च याच्यमानः कृतांजलिः। राघवेण
परित्रातोजीवन्नेवंयदृच्छया॥ एषचक्रैःशिलाभिश्च पूरयित्वामहार्णवं। द्वारमाश्रित्यलंकायाः रामस्तिष्ठ
तिसायुधः। गारुडं व्यूहमास्थाय वानरैर्बाहुभिर्वृतः। मां विसृज्यमहातेजालंकामेवोपवर्तते। पुरः प्राकारमाया
तः क्षिप्रमेकतरं कुरु। सीतांवास्मैप्रयच्छाशु युद्धंवास्मैप्रदीयतां॥ मनसातानपपातैवं ततुक्रुद्धोराक्षसाधि
पः। शार्दूलं सुमहद्वाक्यं अथोवाचसरावणः। यदि मां प्रतियोत्स्यंते देवगंधर्वदानवाः। नैवसीतांप्रदास्या
मि सर्वलोकभयादपि॥ एवमुक्त्वामहातेजारावणः पुनरब्रवीत्। चारितानवतासेना केऽत्रशूराः केतत्रवान
राः। काःशाकतिवासौम्या वानरायेदुरासदाः। कस्यपुत्राश्चपौत्राश्च तत्वमाख्याहिराक्षस। तथात्रप्रति

नामयानदेयमाश्रित्य अजल्पसि । खरहंता स ते नत्रौ राघवः सर्वेरेह तः । क्रिचं ते सर्वथा मलं दर्पस्ते निहितो म
या । व्यसने नाम नः सा ते मम भार्या न विष्यसि । अल्पपुण्य निश्टतार्थे मूढे पंडितमानिनि । श्टणु मर्त्तुर्वधं सा
ते श्रोरं रक्षत्र वधं यथा ॥ गपायातः समुद्रांतं मां रक्ष्यं किल राघवः । वानरेंद्रप्रणीतेन बलेन महता वृतः । संनि
विष्टं समुद्रस्य तीरमासाद्य दक्षिणं । बलेन महता रामो व्रजत्यस्तं दिवाकरे । अथाध्वना परिश्रांतं अर्द्धरा
त्रे रक्षितं बलं । सुखसुप्तं समासाद्य वारितं प्रथमं वारे । तत्प्रहस्तप्रणीतेन बलेन महता मम । बलम
म्यागतं रात्रौ यत्र राघवः । पट्टिशाः परिघाश्चैव गदादंडमहायसाः । बाणजालानि शूलानि भास्करा
: कंपनाः शक्तयः । शक्तिष्टितोमरा श्चात्र चक्राणि मुशलानि च । अथ म्याथ म्यरक्षोभि र्वानरेषु निपातिताः । अथ
सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना । असक्तं कृतहस्तेन शिरश्छिन्नं महासिना । उत्पतन् स्वाङ्गितः दृष्टे निपतं
श्रायद्धक्रया । दिशं विप्रद्रुतः एवं लक्ष्मणः प्लवागैः सह । सुग्रीवो ग्रावयासीत् तेन भग्नः प्लवगाधिपः । निरस्त
हनूरकाशे हनुमान् राक्षसैर्हतः । चंद्रजानुस्कराजानुर्त्मा मुत्पतन् पतितो लवि । पट्टिशैर्बहुभिश्छिन्नः पति
तः पादपो यथा । मैंदश्च द्विविदश्चैव तौ निहितो वानरौ रणे । अश्वसंतानवंतौ तौ न रुधिरौघपरिक्लितौ । अ
सिना भ्यहन त्नु[redacted]नः अकार्म्यः सुमहाबलः । अभिशृष्टा न निर्भिन्नं पनशो यथा । नाराचैर्बहुभिश्छिन्न
शेते दर्यादरीमुखं । कमुदस्तु महातेजा निकंडःसायकैः कृतः । अंगदो बहुभिर्भिन्नः शूलैरासाद्य राक्षसैः । पति
तो रुधिरोद्गारी क्षितौ निपतितांगदः । हरयो मृदितास्तत्र नागेरथैश्चक्रे सुधापूरैः । शायानामृदितास्तत्र अक्रताणग
र्णारिव । प्रसृता अपरे त्रस्ता हन्यमाना दृष्टस्त्वतः । अनुत्र पन्नारक्षोभिः सिंहैरिव महाद्विपाः । सागरे पतिताः के

सुवेलेधिष्ठितं शैले शेषे कार्ये भवानुगतिः॥ इत्यार्षे रामायणे युद्धकांडे वानरस्यागमो नाम॥ ततस्तमक्षो
भ्यबलं लंकाधिपतये चरः। सुवेले राघवं शैले निविष्टं प्रत्यवेदयत्। चारेभ्यो रावणः श्रुत्वा प्राप्तं रामंम
हाबलं। जातोद्वेगोभवत्किंचित्सचिवानिदमब्रवीत्। मंत्रिणः शामेतोभ्यासं समायांतु समाहिताः।
आसन्नो मंत्रकालो हि संप्राप्ता रिपवो मम॥ तस्य तद्वु शासनं श्रुत्वा मंत्रिणोभ्यागमन्द्रुतं। ततः समंत्र
यामास सचिवैः सह रावणः। मंत्रयित्वा च दुर्द्धर्षैः क्षमं तत्समनंतरं॥ अथ तं प्रेषयामास गगने रावणो
बली॥ अथ तं प्रेक्ष्य तत्रस्थं राक्षसेंद्रं हि राघवः। विभीषणमुवाचेदं किमेतत्कृतमद्भुतं। सीतापह्रा
रको राजन्नु रावणो राक्षसेश्वरः। तदारोप्य धनुः क्षिप्रं संधयामास सायकं। पत्रिणा तेन तच्छिन्नं छत्रं
सूर्यसमप्रभं। तदा प्रशंसयामास राघवं राक्षसेश्वरः॥ शत्रोरपि गुणा वाच्या ग्राह्या दोषा वाच्या गुरोर
पि। कृत्तच्छेदो मया दृष्टो दूरापातान्वराघव। विसर्ज्य सचिवान्सर्वान्प्रविवेश स्वमालयं। ततो राक्षसमाना
घ विद्युज्जिह्वं महाबलं। मायाविनं महामायमब्रवीत राक्षसाधिपः। मोहयिष्यामहे सीतां मायया जन
कात्मजां। मायामयं रामशिरो गृहीत्वा राक्षस कृतं। मां त्वं समुपतिष्ठस्व महद्वसशरं धनुः॥ एवमुक्तस्त
थेत्याह विद्युज्जिह्वो निशाचरः। तस्मै तुष्टोभवद्राजा प्रददावथ भूषणं। अशोकवनिकां चापि सीतादर्शन
लालसः॥ नैरृतानामधिपतिः प्रविवेश महाबलः॥ ततो देवीमदैन्यार्हां ददर्श धनदानुजः। भर्तारं स
मनुध्यायंतीमशोकवनिकां गतां। उपास्यमानां घोराभिः राक्षसीभिरदूरतः। उपसृत्य ततः सीतां प्रहर्षं
वाक्येन हर्षयन् लोमहर्षयन्॥ इदं च वचनं धृष्टमुवाच जनकात्मजां। अधोमुखीं स्वखिन्नांगीं बालां तामुपविष्टां परांमुखीं। सांत्वयमा

खिन्ना। रुरोदमरुगतीबाला छिन्नेव कदली यथा। सा समुद्वीक्ष्य तां तु समुत्क्षाय अनिलभ्यवनेतनां। तच्छिरः समुपाघ्राय विल
लापायते करुणा। हा हृतास्मि महाबाहो वीरबन्धतमलुब्धता। इयं ते पश्चिमावस्था हतास्मि विधवा कृता। अद्यधर्म मरस्ताना
यौः पुत्रः पुरुषमिति श्रुतिः। मयि कस्मात्स्वनार्याकालेनासि निपातितः। दुःखाद्दुःखं अपन्नायां मग्नायां शोकसागरे
रादृशीनीरसं हृदयं हतस्त्वं मम कानरणात्। योपि मामुद्धत स्त्रात्तं सोपि त्वं किन्न पातितः। ताश्चत्रमममाकोरुष्ण्याव्वया
वसेनरायव। वसेने नविनाधेनु विवसावत्सलाकृताः। आदिष्टं दीर्घमायुस्ते यैरविंध्यपराक्रमं। अनृतं त्वं वचनं
तेषां अल्पायुरसि राघव। अदृष्टमृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित्। व्यसनानामुपायज्ञः कुशलः परिवर्जने
अप्रयानस्य तिअज्ञाप्राज्ञस्यापिसतस्तव। पवयेवमहाकालोक्रतानिअश्रुरव्ययः। उपरोषेमहाबाहोमांविहा
कृत्रियंना री। यस्तुदुःखितां। प्रियामिवशुभांनारींह्यर्थिवांह्यधिवाश्वरः। तयात्वं संपरिष्वधारोज्ययासुन्दरांसया। कालराज्याम
माक्ष्यघनीतः कमललोचनः। क्रगतस्त्वंमहाभ्बाहोमांविहाय तत्पुरिवनी। कृतामिनरेणोरूमिंबालिनापार्थिवर्ष
भः। अविर्तंसततं येत्रगंधमाल्यानुलेपनैः। इदंतद्रापिरत्नं ते विनिकीर्णं महीतले। आर्येरागनन्नुपित्रात्वमार्ये
त्रायिश्वराजनिः। पुरुषवह्निःक्रियावह्निः नूनंस्वर्गे समागतः। दिविनरूत्वश्वरूतश्वमहात्रकुञ्जरकृतालवः। पुण्यं महायज्ञकृताभिषेकः।
राजर्षिवंशंवगात्मनः सम वेत्सि। किं मां न प्रेषसे राजन् किं न मां नाभिभाषसे। बालां बालस्य सत्रां मां सवर्णां
सदुनारिणीं। संस्कृतं गृह्य तापाणिं नरिष्यामीतियत्त्वया। स्मरत्वं मम कांक्षनयमामपि दुःखितां। कस्मान्मां त्वं
विहायैकांगतोगतिमतांवर। अस्मात्लोकात्परं लोकं यकामामिह्यामिक। वंदनागुरुसंदिश्याङ्गं परिष्वक्तं ९
मया पुरा। कथाद्भिस्वक्रारं तेन्नं विपरिकृष्यते। अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः। अग्निहोत्रेण

वितृगगनके विद्धश्रिताः । रुद्राक्षद्राक्षानुसमारूढाः वानरैर्व्यतिमिश्रिताः । सागरस्य च तीरेषु सागरोपवनेषु च ।
पिंगाक्षास्ते विरूपाक्षैर्बहुभिर्बहवो हताः ॥ एवं ते निहितो भर्ता ससैन्यो मम सेनया । प्रसस्तो दंष्ट्र रजोध्वस्तमिदं तत्
स्याहृतं शिरः । ततः परमक्रुद्धो रावणो राक्षसेश्वरः । ष्ट रखं या सा तत्र वैदेह्या राक्षसामिदमब्रवीत् । राक्षसं घोर
कर्माणं निघ्नजिह्वं प्रवेशय । तेन तद्राघवशिरः संग्रामात् स्वयमाहृतं । निघ्नजिह्वस्ततो गत्वा शिरस्तच्च शरासनं
प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः । तमब्रवीत्ततो राजा रावणः श्वाग्रतः स्थितं । निघ्नजिह्वं महाजिह्वं सम्
पप्रारिवर्तिनं । अग्रतः कुरु सीतायाः शीघ्रं दाशरथेः शिरः । अवस्थां पश्चिमां भर्तुः कृपणां साधु पश्यतु ॥ एवमु
क्तं तद्रक्षः तच्छिरः प्रियदर्शनं । उपनिक्षिप्य सीतायाः क्षिप्रमन्तरधीयत । रावणश्चापि विक्षेप भास्वरं कार्मु
कं तदा । त्रिषु लोकेषु विख्यातं रामस्यैतदिति ब्रुवन् ॥ स विघ्नजिह्वेन शिरः सकार्मुकं । विशार्य मातांसश्रस्म रनाणः
तातले । निवेदयामास तस्याः समरे हतं पतिं ततो ब्रवीत्तां मम'मे'वशानुगां ॥ इत्यार्षे रामायणे युद्धकांडे माया
शिरोदर्शनो नाम सर्गः ॥ सा तां सा तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमं । नयने मुखवर्णं सर्वं च पप्रच्छ स्तनसदृशं राघवः
मुखमिंदुप्रभं सौम्यं गर्हितं कमललोचनाः । केशान् केशांतदेशं च तं च चूडामणिं शुभं । क्लिष्टां त्रसुसमात्रे
वपांकुरान् दशनानां स्वया ॥ एतैः सर्वैरभिज्ञानैः अभिज्ञाय सुदुःखिता । विजगर्हाथ कैकेयीं क्रोशन्ती कुर
राय था । सकामा खलु कैकेयी अनार्यां खलु न विषयति । कुलमुत्सादितं सर्वं यया कलहशीलया । अनार्याः
किं त्वं कैकेय्याः कृतं रामेण विप्रियं । मद्गृहाच्चीरसंवीतो राघवो यं विवासितः ॥ एवमुक्ता तु वैदेही वेपमाना तप

स्फ्नवादिनी॥५ समयश्रामांर

नोऽक्याय योध्यपरिगृह्याधिष्ठिताः॥ इत्यार्षे युद्धकांडे सीतासंमोहनो नाम॥ ॥तां त्वेवं मोहितां ज्ञात्वा सरमा नाम राक्ष
सी॥ आससादाथ विदेहीं प्रियां प्रणयिनीं सखीं॥ साहि तत्र कृतामित्रं सीतया रक्ष्यमाणया॥ राक्षसी रावणादिष्टा सानुक्रो
शा दृढव्रता॥ सा ददर्श सखीं सीतां सरमा नष्टचेतसं॥ उपविश्योत्थितां ध्वस्तां वडवामिव पांसुषु॥ तामुवाच तदाश्वास्य स
रमा प्रियवादिनी॥ मा विषादं विशालाक्षि कुरु स्वऽङ्गनकामके॥ उक्ता यद्रावणेन त्वं प्रत्युक्तोऽयं त्वया स्वयं॥ सखिस्ने
हेन तन्मे भीरु मया सर्वं स्वयं श्रुतं॥ लीनया गहने शून्ये भयमुत्सृज्य रावणात्॥ तव हेतोर्विशालाक्षि न हि मे जीवितं प्रि
यं॥ संभ्रांतश्च पुनः क्रांतो यदस्माद्राक्षसेश्वरः॥ तत्र मे विदितं सर्वं उपनिक्रम्य मैथिलि॥ न शक्यं सौप्तिकं कर्तुं रामस्य
विदितात्मनः॥ वधश्च पुरुषव्याघ्रे तस्मिन्नेवोपपद्यते॥ ते च शूरा हरिव्याघ्रा वानराः पादपायुधाः॥ सुरा देवेश्वरेणेव रामे
णाभिपालिताः॥ पीनवृत्तभुजः श्रीमान् महोरस्कः प्रतापवान्॥ धन्वी संहननोपेतो रुमतां तेजुवि। अविश्रुतः। अक्रितो
रक्षिता नित्यमात्मनश्च परस्य च॥ लक्ष्मणेन सह भ्रात्रा कुशली नास्त्रतत्ववित्॥ हन्ता परबलौघानां कुशलो ह्यु
पलक्षणः॥ न हतो राघवः सीते श्रीमान् शत्रुनिबर्हणः॥ प्रयुक्ता बुद्धिहीनेन सर्वभूतविरोधिना॥ इयं तेन नृशं
सेन माया मायाविना कृता॥ शोकस्ते निहितः सद्यः कल्याणं त्वामुपस्थितं॥ ध्रुवं ते भजते लक्ष्मीः प्रियं प्रीतिकरं शृणु
संतार्य सागरं रामः सह वानरसेनया॥ सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणं॥ सदृष्टः परिपूर्णार्थः काकुत्स्थः
समहाबलः॥ प्रेषितैः सागरान्तेषु राक्षसैरुपलक्षितः॥ तैस्तत्र प्रेषिता गुप्ता हराश्रुता प्रदक्षिणाः॥ अथ विसृज्य १०॥
पानीताः सान्निसारः पुरस्यह॥ एतां श्रुत्वा पृथुश्रोणि प्रवृत्तिं राक्षसाधिपः॥ एष मंत्रयते सर्वैः सचिवैः सह रावणः
इति ब्रुवाणा सरमा मैथिलीं नष्टचेतसं॥ सर्वोद्योगेन योधानां शब्दं श्रुत्वाऽवधारुणं॥ ताडितायास्तथा भेर्याः
श्रुत्वा प्रतिभयं स्वनं॥ उवाच सरमा सीतां इदं मधुरवादिनी॥ सन्नाहजननी ह्येषा भैरवा भीमवादिनी॥ एनान

सत्कारमहं ऽखं नोपलप्स्यसे। त्वया ऽघमुपपन्नानां त्राणमेकमागतं॥ परिभद्र्यति कौशल्या लक्ष्मणः शोकलालसा। तस्याः
संपरिरक्षक्या हरणं मम राक्षसा। तवानाख्यास्यते नार सोमके राक्षसैर्वधं। सा वां हं तं सुतं कवपांत थाराक्षसेद्वी
तं॥ रुदत्येनावदार्यैन कौशल्यानंत्र विष्यति। साधुघातयमांशाखं रामस्योपरि रावण। सुप्रियस्य प्रियां त्रायींकुरु कल्याण
मुत्तमं। शिरस्यस्मिन् शिरो देहि कार्यैकार्यं निवेशय। रावणानुगमिष्यामि गतिं नेतुर्महात्मनः। मुहूर्तमपि नेच्छामि
जीवितुं पापजीविता। समानयस्व पतिना कुरु कल्याणमुत्तमं। कृतं मया वेदविदां ब्राह्मणानां पितृगेहे। यासां त्व
णां त्रियोमंत्री तासां लोकामहोदयाः। क्षमायस्मिन् मयात्यागः सत्यं धर्मकृतज्ञता। अहिंसा नैव भूतानामतेकाम
तिर्मम॥ इति सा दुःखसंतप्ता विललापायतेक्षणा। तत्र तुः शिरो धनुश्चैव संधेद्युजनकात्मजा॥ एवं लालप्यमानायां सी
तायां तत्र रावणं। अभिरक्षाम नत्वोर्बलाध्यक्षः कृतांजलिः॥ एतस्मिन्नंतरे प्रहस्तो रावणस्य निवेदयत्। कार्यमित्या प्रमद
यिकं घोरं संज्ञुधाचोतलोचनः। विज्ञयश्चार्यपुत्रेति सोभिनाथ प्रणम्यच। आवच्छेत दा कर्थं राक्षसेंद्राय विस्मितः
अमात्यैः सहितः सर्वैः प्रहस्तसमुपस्थितः। किं विदात्ययिकं कार्यं आविख्यासुरिहागतः। एवमुक्तस्तु भगवान्
निर्जगाम स रावणः। स ह्यमात्यं प्रहस्तं तु ददर्श दूरतः स्थितं। सर्वैः समेत्य रक्षोभिर्मंत्रिभिः कृतनिश्चयः। सभां
प्रविश्य विदधे विदित्वा रामविक्रमं। अंतर्धानं तु कोषे तत्र च कार्मुकमुत्तमं। जगाम राक्षसे तस्मिन् निःक्रांते समनंतरं
राक्षसेंद्रस्तु भगवान् निःकंप्य स कृत तत्र सः। संमंत्रयामास तदा हितं तैर्मंत्रिभिः सह। अविदूरे स्थिताद्यस्य बलाध्
क्षाहितैषिणः। अब्रवीतान्निशम्यैव रावणो राक्षसेश्वरः। शात्रं त्रेरानिनादेन स्फुटकोलाहलेन मे। समानयध्वं से
नानि विमर्शेन क्रमो हि वः॥ न तत्क्षयेति प्रतिगृह्य तद्वचः समास्थितानष्टहिताय निर्गताः। बलाधिपास्ते चलयोगमाश्र्म

निवेद्य सकलं रामे प्रतिज्ञां चानिवर्तितां । न हि मे क्रममाणाया निरालंबे विहायसि । समर्थो गतिमन्वेष्टुं वायुरप्य
तिशीघ्रगः ॥ एवं श्रुत्वा गिरं तां सीता सरमामब्रवीत्ततः । मधुरं श्लक्ष्णया वाचा स्मितपूर्वमिदं वचः । समर्था गगने गंतुं
मपि वा त्वं रसातलं । अवगच्छामि कर्तव्यं सर्वं तस्यानमंतरं । मत्प्रियं यदि कर्तव्यं यदि मित्रास्ति तानव । वर्त्त
ते ज्ञातुमिच्छामि किं करोतीति रावणः । मां मोहयति दुष्टात्मा पीतमात्रेव वारुणी । संतर्ज्जयति मां नित्यं भर्त्सयच्च पि
वासत्क्षणं । राक्षसीभिः सुघोराभिः यो मां रक्षति नित्यशः । उद्विग्ना शंकया वास्मिन् न स्वस्थं मनो मम । यश्च
मामनुप्राप्तं अशोकवनिकागतं । तदिच्छामि कथितं तस्य निश्चयो वास्य यो भवेत् । निवेदयेथाः सर्वं मे परो मे स्या
द्नुग्रहः ॥ तामेवं वादिनीं सीतां सरमा वल्गुभाषिणीं । उवाच वचनं तस्याः स्पृशंती बाष्पविक्लवा । एष ते यद्यभि
प्रायस्तस्माद्गच्छामि जानकि । गृह्य शत्रोरभिप्रायमुपावर्तामि मैथिलि ॥ एवमुक्त्वा ततो गत्वा समीपं तस्य रक्ष
सः । शुश्राव कथितं सर्वं रावणस्य समंत्रिणः । सा श्रुत्वा निश्चयं तस्य निश्चितं दुरात्मनः । पुनरेवागमत्क्षिप्रमश्
शोकवनिकां शुभां । सा प्रविष्टा ततस्तत्र ददर्श जनकात्मजां । प्रतीक्षमाणां तामेव पद्महीनामिव श्रियं । तत्र सा स्वासन विरहिता २
तां पुनः प्राप्तां सरमां प्रियवादिनीं । परिष्वज्य च सुस्निग्धं ददौ च स्वयमासनं । इहासीना सुखं सर्वमाख्याहि
मम तत्त्वतः । क्रूरस्य निश्चयं तस्य रावणस्य समंत्रिणः । उपविष्टा हि सा तत्र आसने स्वर्णभूषिते । वक्तुं विनिश्चयं
तस्य रावणस्योपचक्रमे । नोत्सहत्यहृतो मोक्तुं युद्धे त्वामिति मैथिलि । सामात्यस्य नृशंसस्य निश्चयोयं सुनिश्चि
तः ॥ एषा तस्याक्षिरा बुद्धिर्मृत्युलोभादुपस्थिता । न ते न शक्या त्वं मोक्तुमनिरस्तेन संयुगे । मा चिंतां कुरु वैदेहि स ११
र्वे धाराघ्नतः शिरः । निहत्य रावणं सीते त्वां प्रियामुपलप्स्यते । एतस्मिन्नंतरे शब्दो भेरीशंखसमाकुलः । राघव
अहतेना २

दंतीगंजाराश्च शृणु तोयदनिःस्वनां । कल्प्यंते मत्तमातंगा युज्यंते रथवाजिनः । तत्र तत्र च संनद्धाः संपतंति पदातयः ।
आपाकः पूर्यते सर्वे राजमार्गाः समंततः । वेगवद्भिर्महावेगैर्नदद्भिरिव सागरः । शस्त्राणां च प्रसन्नानां चर्मणां
वर्मणां तथा । रथानां भूषितानां च भूषितानां च रक्षसां । प्रभा विसृजतां पश्य नानावर्णसमुच्छ्रिता । वनं निर्दहतो
वह्नेर्यथा रूपं विभावसो । घंटानां शृणु निर्घोषं रथानां शृणु निःस्वनं । हयानां हेषमाणानां शृणु तूर्यस्वनं तथा
उद्यतायुधहस्तानां राक्षसेंद्रानुयायिनां । रक्षसां संभ्रमो ह्येष तुमुलो लोमहर्षणः । श्रीस्त्वां भजति शोकघ्नी रक्ष
सां मार्तगमयं । रामात्कमलपत्राक्षि दैत्यानामिव वासवात् । अवजित्य जितक्रोधस्त्वामचिंत्यपराक्रमः । अविराद्
धि पूर्वेणालंकामधिगमिष्यति । विक्रमिष्यति रक्षःसु भर्त्ता ते सहलक्ष्मणः । यथा शत्रुषु विक्रांतो विष्णुना सहसेवा
वः । आगतस्य हि रामस्य क्षिप्रमंकगतां सखि । अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते । अश्रूण्यानंदजानि त्वं
त्वं वर्तयिष्यसि शोभने । समागम्य परिष्वक्ता तस्योरसि महोरसः । चिरान्मोक्ष्यसे सीते विकृतां जघनंगतां । घना
मेकां बहून्मासान्वेणीं रामस्त्वमानने । तस्य दृष्ट्वा मुखं देवि पूर्णचंद्रमिवोदितं । मोक्ष्यसे शोकजं वारि निर्मो
कमिव पन्नगी । रावणं समरे हत्वा नचिरादेव मैथिलि । त्वया समेतः प्रियया राघवो लप्स्यते सुखं । समागता
त्वं रामेण शोभिष्यसि वरानने । अवर्षेत तथैव महा पुनर्वर्षेण मेदिनी । गिरिवरमभितो हि वर्तमानो हय इव
मंडलमाशु यः करोति । तमिह शरणमभ्युपेहि सीते दिवसकरं प्रभवाय प्रजानां ॥ इत्यार्षे युद्धकांडे सरमा
वाक्यं नाम ॥ अथ तां जातसंतापां तेन वाक्येन मोहितां । सरमा ह्लादयामास पृथिवीं द्यौरिवांभसा । ततस्तस्या हितं
सख्युश्चिकीर्षंती हितं वचः । उवाच काले कालज्ञा स्मितपूर्वाभिभाषिणी । उत्सहेयमहं गत्वा त्वद्वाक्यमसितेक्षणे

ग्रीष्मामयणि॥२

=पावकाः।

नांउद्धेगोऊनितोमहान्॥ तेसंप्रति दुराधर्षाः अद्दाम्नाइव दुराधर्षाः॥ तपसा नाविता मानो धर्मे स्यानुग्रहे रतान॥ अ
अविघ्नेन यज्ञं तेन याज्ञे स्ते स्ते द्विजातयः॥ उक्क तेश्नो न विधिवद्वे दांश्चाभ्र' रधीयते॥ अनिमित्तयवरक्तांसिव
ह्मघोषानि नादयन्॥ दिशो विप्रध्यते सर्वाः स्तनयन्नारिवाम्बुजे॥ रुषामग्निकल्पानामग्निहोत्रमुपस्थितं॥ आ
दत्तेरक्षसां तेजो धूमोघो व्याकुलनउगह॥ तेषु तेषु वदेशेषु पुण्येषु सुहृद्वरानेः॥ वाध्यमानं तपस्ता बुंसता
पयति राक्षसान्॥ उत्पातान श्चाद्भुतान् दृष्ट्वा घोरान् बहुविधान् बहून्॥ विनाशमनुपश्यामि सर्वेषां रक्षसां
महत॥ खरानिस्तनिताघोरामेघाः प्रतिभयंकराः॥ शोणिताम्भिवर्षन्ति कामुकेन सर्वशः॥ वल्लतां वाह
नानांवे प्रपतंत्यश्रुबिंदवः॥ ध्वस्ता व्यस्ता विवर्णाश्च नक्षत्राणि यथापुरा॥ सर्वं नष्टमिदं मन्ये सैन्यं ते
राक्षसेश्वर॥ विष्णुं रामं महं मन्ये मानुषं देहमाश्रितं॥ न स मानुषमात्रो विराध वोद्ध विक्रमः॥ येन
बद्धः समुद्रस्य स सेतुः स महाद्भुतः॥ कुरुष्व नरराजेन सिंधिं रामेण रावण॥ यश्च प्रति निविष्टोसि
हित मुक्तानि निशाचर॥ सीताकृते महाबाहो महद्भयमुपस्थितं॥ तध्येमानि निमित्तानि जन्द्र येराक्ष
[illegible]॥ सेश्वर॥ विडाला गोमायवो गृध्रा वासंति वसु निरवं॥ प्रविश्य जं कासमयेसमहाबा(?)कुर्वते॥
कालीस्वापांडुरैर्दंतैः प्रहसत्यग्रतः स्थिताः॥ रथ्यासु बालकैर्नित्यं बहुशः परिकल्पते॥ ग्ल पुबलिक
र्माणि श्वेताः पर्युपभुंजते॥ खरा गोषु प्रजायन्ते मूषिका नकुलेषु च॥ माजीरा द्वीपिभिः सार्धं शूकराश्च व
निःसह॥

॥=लकुटपाषाणहस्तैर्भ्यते॥२

मध्याह्नकाले॥२

क्वाताक ता विश्वया:

यदि विना शंप्रतिनि विष्टोसि नान्निति बसि। तध हितमुक्तक
१२ रु।

स्यात्नवसैन्येकंपयनुसर्वेरक्षसान्। ततोमहावातसमारितेनघोरेणराष्ट्रेनसमुक्षितेन। विषादमागात्सकला
महापुरीवलोकसोराष्ट्रमग्नमाना।।२।। आर्षेरामायणेसरमावाक्यंनाम।। तेनभेरीनिनादेनशंखनादे
नरावण।। शुक्रस्तैर्ध्यानमास्थायसविवानभ्यविंदत।। अथतान्सविवांस्तत्रसर्वानामाष्यरावणः। उग्रसंनादय
न्सर्वान्अब्रवीत्तादृसेश्वरः। तरणंसागरस्यास्यविक्रमंबलसैन्ययोः। युक्तंवतोरामस्यसर्वंतस्तन्मयाश्रुतं।
तामर्षसागरंरामःसेतुनावानरैःसह। अमर्षीसगणःसोयंसामात्योनाभिविष्यति। निर्यातुराक्षसाःसर्वेनि
शितायुधपाणयः। निहंतुंवानरबलंतोवोविरामलक्ष्मणौ। ततःप्राज्ञःसुदृस्निग्धोमाल्यवान्नामराक्षसः।
उवाचरावणंमंत्रीवृद्धामात्योबहुश्रुतः। विद्यास्वभिविनीतोयोराजाराजन्नयानुगः।। सराज्यंस्थिरमैश्वर्यमरी
श्चकुरुतेवशे।। संदधानोहिकालेषुविग्रहंचारिभिःसह। स्वपक्षवर्धनंकुर्वन्महदैश्वर्यमश्नुते। हीयमा
नेनपर्येष्योराज्ञासंधिःसमेनवा। नशत्रुरभिवमंतव्यःस्वयंकुर्वीतविग्रहं। तन्मह्यंरोचतेसंधिस्सहरा
मेणरावण। यदर्थमभियुक्तास्स्मसासीतादीयतां। तस्यदेवर्षयःसर्वेगंधर्वाश्चजयैषिणः। विरोधं
मागमस्तेनसंधिस्तेतेनरोचतां।। असृजद्भगवान्पक्षौद्वावेवहिपितामहः। सुराणामसुराणांचधर्माध
र्मौरतान्ते। धर्मोविग्रसतेधर्मंततःकृतमभूद्युगं। अधर्मोग्रसतेधर्मंततस्त्रेताप्रवर्तते।। सत्वंयाव
रतालोकेधर्मोनिरकृतःपुरा। अधर्मःप्रहितश्चतेनास्मत्तमसावृतः। संप्रमादाद्विवृद्धस्तेधर्मोरामव्यपा
श्रयः। विवर्द्धयतिपक्षंसंसुराणांसुरभावतः। विषयेषुप्रसक्तेनयत्किंचित्कारिणात्वया। ऋषीणामग्निकल्पा

रामः

=दौ ४

= रामेणनिवारितांतरायः२

आदाय तु वनात्तां प्रसन्नानामितृत्रियं। किमर्थं वृतिदास्यामि राघवाय मन्याद्दिह। एतं वानरकोटीभिः स सुग्रीवं सल
क्ष्मणं। परपाके स्थितदृ होमिस्स्त्वं निहितं राघवं मया। धृंध्वे यस्य न तिष्ठंति देवता अपि संयुगे। रावणो मानुषं प्राप्य
भयमाहारये कथं। वि श्रामसि घे यमप्येवं न न मे यं तु कस्य वितु। एषमे सह जो दोषस्वभावो दुरतिक्रमः। य
दि तावत्समुद्रस्य सेतुर्बध्वो यद्दृच्छया। रामेण विस्मयः कोत्र यतस्तेन भयमागतं। कामं रामः सहोनात्मभिः सह
वानरसेनया। प्रतिजानामि ते सर्वैन जीवन्नु गतियास्यति। एवं ब्रुवंतं संरब्धं क्रुद्धं विज्ञाय रावणं। व्रीडि
तो माल्यवांस्तूर्ष्णीं तस्माद्देशादपाक्रमत्। जयाशिषा वराजानं वर्द्धयित्वा यथोचितं। माल्यवानभ्यनुज्ञा
तो जगाम स्वं निवेशनं। रावणस्तु सहामात्यैर्मंत्रयित्वा विमृश्य च। लंकायामतुलां गुप्तिं कारयामास राक्ष
सः। प्रहस्तं व्यादिदेशाथ पूर्वद्वारे रिसूदनं। दक्षिणे तु महावीर्यौ महापार्श्वमहोदरौ। पश्चिमे तु तथा द्वारे
पुत्रमिंद्रजितं स्वयं। व्यादिदेश महामायं राक्षसैर्बहुभिर्वृतं। उत्तरे वापि वद्वारे व्यादिश्य शुकसारणौ। स्व
यमत्र गमिष्येहमिति तान्मंत्रिणोब्रवीत्। एवं विधानं लंकायां कृत्वा राक्षसपुंगवः। कृतार्थं मन्यते मानं कृ
तांतवशमागतः। राक्षसं तु विरूपाक्षं महाबलपराक्रमं। मध्ये संस्थापयामास बहुभिः सह राक्षसैः। विस
र्जयामास ततः समंत्रिणो विधान मानापु पुरस्य पुष्कलं। जयाशिषामंत्रिजनेन पूजितो जगाम सोंतः पुरम १३
द्धिमतदा॥ ॥इति श्रीरामायणे युद्धकांडे लंकाविधानं नाम सर्गः॥ ३॥ नरवानरराजौ तु स तु वायुसुतः

=परिमंतादुत्यावानूईक्षा५

किंनरा राक्षसाश्चैव समेताश्चारणैः सह। पांडुरा रक्तपादाश्च विहगाः कालनोदिताः। राक्षसानां विनाशा
य विहगाः कालनोदिताः। कपोता गृहवारिणः। वाशीकत्वातिवासंति सारिकावेश्मसुस्थिताः। पतंति व्यथि
ताश्चैव निर्जिताः कलहैषिणः। करालो विकटो मुंडः पुरुषः पुरुषैः कृष्णपिंगलः। रक्षोगृहाणि सर्वाणि
काले कालोन्ववेक्षते। अयुग्यं हि अपश्यंति युद्धमानं दिनोद्विजाः। क्रव्यादा नद्ययिष्यंति मांसानि गज
वाजिनां॥ इदं च वस्तु स्वनिवेघ माल्यवान् परीक्ष्य रक्षोधिपतेः स्थितो ग्रतः। अनुत्तमेष्वुत्तमपूरुषो
बली बभूव तूष्णीं सम वेक्ष्य रावणं॥ स तद्वचो माल्यवतोभिभाषितं दशाननो न प्रशशंस मोरव्यैतः।
मृशं कुगर्हैवसदुष्टमानसो मुमूर्षुरन्यद्वचनोन्यदारयत्॥ श्री आर्षे श्रीरामायणे युद्धकांडे मा
ल्यवद्वाक्यं नाम॥ ॥ तत्र माल्यवतो वाक्यं हितमुक्तं दशाननः। नामर्षयत दुष्टात्मा कालस्य वशमा
गतः। स बद्ध्वा भ्रकुटिं वक्रे क्रोधस्य प्रतिलक्षणं। अमर्षात्परिवृत्ताक्षो माल्यवंतमथाब्रवीत्॥ हितबु
द्ध्या त्वयदिदं न तत्पुरुषमुच्यते। परपक्षं प्रशास्यैवं न तत् श्रोत्रसुखं मम॥ मानुषं कृपणं राममेकं शा
खामृगाश्रयं। समर्थं मन्यसे केन त्यक्तं पित्रा वनाश्रयं। रक्षसामीश्वरं मां च देवतानां भयंकरं। हीनं
मन्यसे केन हीनं मां सर्वविक्रमैः। वीरद्वेषेण वा शंके पक्षपातेन वा रिपोः। त्वयाहं परुषाण्युक्तः परप्रो
त्साहितेन वा। प्रभवंतं पदस्थं हि परुषं कोभिधास्यति। पंडितः शास्त्रतत्त्वज्ञो विना प्रोत्साहनाद्रुतं। आप

कैः हेतुभिः उपकारोपकारकं

=आधिक्यविभवासाअप्रदानेना १ सर्वस्वभावादेव काले यदिनलनां विक्रमः कार्यसंपादनसामर्थ्यो २

आपद्यपि धैर्याविचलनात् ।१ आदिमध्यावसानं युद्धं तन्निश्चयतयो ।२

सत्त्वेन गौरवात् । सदृशान्यस्य सर्वाणि रावणस्य दुरात्मनः । अत्र मनुर्नैकर्त्तव्यो रोषायवाम्मेनाषये । समर्थो ह्य
सि वीर्येण सुराणामपि साधये । तद्भवान्हरिवाराणां बलेन महता वृतः । विद्रोभ्य राक्षसीं सेनां तं वधिष्य
सि रावणं । रावणावरजे वाक्यमेवं ब्रुवति राघवः । शत्रूणां प्रतिषेधार्थमिदं वचनमब्रवीत् । कपीना
मुग्रवीर्याणां सहस्रैर्बहुभिर्वृतः । नीलः प्रहस्तं प्लवगो राक्षसं प्रतिबाधतां । अंगदो वालिनः पुत्रो ब
लेन महता वृतः । दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ । हनुमान्पश्चिमं द्वारं संपाद्य पवनात्मजः
निविशत्वप्रमेयात्मा कपिभिर्बहुभिर्वृतः । दैत्यदानवसंघानां रुषीणां च महात्मनां । विप्रकारप्रियः
क्रुद्धो वरदानबलान्वितः । परिक्रामति यः सर्वान्लोकान्संतापयन्प्रजाः । तस्य राक्षसराजस्य रावणस्य
वधे वृतः । उत्तरं नगरद्वारं अहं सौमित्रिणा सह । निपाड्योपगमिष्यामि रावणो यत्र राक्षसः । वानरें
द्रश्च बलवान्रुक्षराजश्च जांबुवान् । राक्षसेंद्रानुजश्चैव गुल्मो भवतु मध्यमः । न चैव मानुषं रूपं कपि
भिः कार्यमाहवे । दृश्यं नस्पति युद्धेऽठ संज्ञा वि वानरे बले । वानरा ह्येव नश्चिह्नं प्रधानेस्मिन्भविष्यति ।
वयं तु रक्षसां मध्ये सप्त योत्स्यामहे जनाः । अहं विवसहः भ्राता लक्ष्मणो नाम तेजसा । आत्मना पंचमश्चा
यं सखा मम विभीषणः । सर्वं कार्यं समुद्दिश्य मेवमुक्त्वा विभीषणं । सुवेलारोहणे बुद्धिं चकार मतिमान्स्व । १४
ततः स रामो महता बलेन प्रच्छाद्य सर्वां पृथिवीं महात्मा । प्रहृष्टरूपो ऽगामलंकां विभीषणं चार विधे
नियुज्य ॥ ॥ इत्यार्षे श्रीरामायणे युद्धकांडे सैन्यप्रविभाग विता नाम सर्गः ॥ ३७ ॥ श्रीरस्तु ॥

लंकानिरीक्षणार्थं पुनः सुवेलारोहणं कृतवान्रामः ।२ धर्मीद विवलितः ।२ परमार्थतो न हर्षशोकायत्तः ।२

कपिः। जांबुवानृक्षराजश्च रावणावरजस्तथा। अंगदो द्विविदो मैंदो लक्ष्मणो नल एव च। अमित्रविषयं प्रा
प्यासमवेता अमंत्रयन्। इयं सा लक्ष्यते लंका पुरी रावणपालिता। मानुषासुरगंधर्वैरमरैश्चापि दुर्जया।
पुर्यामेवं विधायां तु मंत्रयित्वा विनिश्चये। नित्यं संनिहितो ह्यत्र रावणो रावयन् जनान्। तथा तेषु ब्रुवाणेषु
रावणावरजोब्रवीत्। वाक्यं हेत्वर्थसंयुक्तं पुष्कलार्थं विभीषणः। अनलश्च शरभश्चैव संपातिः प्रघसस्तथा। ग
त्वा लंकाममात्या मे पुरीं पुनरिहागताः। भूत्वा शकुनयः सर्वे प्रविष्टास्ते महापुरीं। विधानं विहितं यच्च दृष्ट्वा
तत्समुपस्थिताः। संविधानं यदाहुस्ते रावणस्य दुरात्मनः। राजंस्तैः कथितं सर्वं यथातथ्यं च तच्छृणु। पूर्वं प्र
हस्तो बलवान् द्वारमाश्रित्य तिष्ठति। दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ। इंद्रजित्पश्चिमं द्वारं राक्षसैर्ब
हुभिर्वृतः। पट्टिशासिधनुष्पाणिरक्षितो रावणात्मजः। राक्षसानां सहस्रैस्तु सहस्रैर्बहुभिर्वृतः। उत्तरं
नगरद्वारं रावणः स्वयमास्थितः। विरूपाक्षस्तु महता शूलखड्गधनुष्मता। बलेन राक्षसैः सार्धं मध्यमं गुल्म
माश्रितः। एतानेवंविधान् गुल्मान् लंकायां समुदीक्ष्य ते। मामकाः सचिवाः सर्वे शीघ्रं पुनरुपागताः। सहस्रं कुंजरा
णां च रथानामयुतं तथा। हयानां चायुतं तत्र समग्रा कोटिरक्षसां। विक्रांता बलवंतश्च संग्रामेष्वनिवर्ति
नः। इष्टा राक्षसराजस्य नित्यमेव निशाचराः। एकैकस्यात्र युद्धार्थं राक्षसस्य विशांपते। परिवारः सहस्राणां
सहस्रमुपतिष्ठते। एतां प्रवृत्तिं लंकायां मंत्रिप्रोक्तां विभीषणः। रामं कमलपत्राक्षमिदं पुनरुवाच ह। कुवे
रं च यदा राम रावणः प्रत्ययुध्यत। षष्टिः शतसहस्राणि तदा निर्यांति राक्षसाः। पराक्रमेण वीर्येण तेजसा
=कार्यसंपादनोत्साहेन। सामर्थ्येन। प्रतापेन।

समभोमानि। समं तातुबकुद्धार्याद्धि। समानिबकुनि। सर्वारुतनवोयस्मिन्वनो स गीनूरुत्हनू काय वाति चक्रि॥
रिश्रेष्ठाः प्राकारमपरं कृतं॥ ते दृष्ट्वा वानराः सर्वे राक्षसानुयुद्धकांक्षिणः। समुद्रं विपुलानादान् तत्र रामस्य प
श्यतः॥ ततोस्तमगमत्सूर्यः संध्यया प्रतिरंजितः। पूर्णचंद्रप्रदीपा चाक्षपा समभिवर्त्तत। स नेत्रग्रहनक्षत्र
न भोद्दृश्यत सागरे। द्वितीयमिव चाकाशं सचंद्रग्रहतारकं॥ ततः स रामो हरिवाहिनीपतिः विभीषणश्चर्क्षि
पतिश्च जांबुवान्। स लक्ष्मणो यूथपयूथसंवृतो सुवेलपृष्टे न्यवसद्यथासुखं॥ इत्यार्षे श्रीरामायणे युद्ध
सुवेलारोहणं नाम॥ ३॥ ॥ ते रात्रिमुषिताः सर्वे सुवेले हरियूथपाः। लंकायां ददृशुर्दूराद्बुधारण्युपवना
नि च। समभौमानि रम्याणि विशालान्यायतानि च। दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः। चंपकाशोक
बकुलं शालतालवनायुतं। तमालवनसंछन्नं नक्तमालकसंवृतां। हिंतालैरर्जुनैः सर्जैः सप्तपर्णैश्च पु
ष्पितैः। तिलकैः कर्णिकारैश्च तथा पाटलिविक्रमैः। शुशुभे पुष्पिताग्रैश्च लतापरिक्षेपक्रमैः। लंकाकानन
रुः पुष्पैः यथेंद्रस्यामरावती। विचित्रकुसुमोपेतैः रक्तपल्लवकोमलैः। शाद्वलानि च नीलानि विचित्रा वनरा
जयः। रालकं मंजरीपुष्पं फलं किशलयानि च। धारयंत्यगमास्तत्र नराइव विभूषणं। ताच्चैत्ररथसंकाशं म
नोरुं नंदनोपमं। वनं सर्वर्तुकं रम्यं शुशुभे षट्पदाकुलं। दात्यूहको यष्टि साहर्न्नर्त्यमाने श्च बर्हिणेः। तथा प
रभृते श्च वशुशुभेतद्वनं महत्॥ तानि मत्तविहंगानि भ्रमराचरितानि च। भृंगराजाभिलीनानि कुररीसेवि
तानि च। कोलकेषु विघुष्टानि सारसाभिरुतानि च। विविधुखेन तस्तानि वनान्युपवनानि च। प्रहृष्टमुदिता २५
नाराक्षरयः कामरूपियाः॥ तेषां निवसतां तत्र वानराणां महौजसां। पुष्पसंसर्गसुरभिर्वीवौ प्राणसुखो
श्रण्यमकुसुमोद्गमस्तनं। अमिलितबकुपुष्पाशासाकोमलपत्राणि॥ ५ राजहंसवंदकजिवानि। २ निलः॥

= वङ्वेगविख्यातैः।पनशानेगैकतीयशानिः ५

सतुकृत्वासुवेलस्यबुद्धिमारोहणंप्रति। लक्ष्मणानुगतोरामंसुग्रीवमिदमब्रवीत्॥ विभीषणंचधर्मज्ञमनुरक्तं
निशाचरं। मंत्रज्ञंचकृतज्ञंचमधुरंश्लक्ष्णयागिरा। सुवेलंसाधुशैलेंद्रमिमंसानुशतैश्चितं। अधिरोहाम
हेसर्वेवत्स्यामोत्रनिशामिमां। लंकामालोकयिष्यामिनिलयंरावणस्यवा। येनमेमरणांतायहृताभार्याय
शस्विना। येनधर्मोनविज्ञातोनकुलंकुलशालिना। राक्षस्यानीचयाबुद्ध्यायेनतद्गर्हितंकृतं। तस्मिंश्चिव
र्द्धतेरोषःस्मृत्वातंपापराक्षसं। यस्यापचारान्नीचस्यसर्वान्वधिष्यामिराक्षसान्। बाणैर्वज्रनिभाकारैःसु
रारीनिववासवः। एकस्तुकुरुतेपापंकालपाशवशंगतः। नीचस्यात्मापचारेणकुलंयेनविनश्यति। एवंसंवर्ण
यन्नेवसक्रोधोरावणंप्रति। रामःसुवेलमारोढुंवासार्थंकृतभावनः। पृष्ठतोलक्ष्मणस्त्वेनमन्वगच्छत्समाहितः।
सशरंधनुरुद्यम्यसुमहद्विक्रमोपमं। अन्वारोहच्चसुग्रीवःसामात्यःसविभीषणः। हनूमानंगदोनीलोमैंदो
द्विविदएवच। गजोगवाक्षोगवयःशरभोगंधमादनः। पनसःकुमुदश्चैवप्रथुश्चहरियूथपः। एतेचान्येचब
हवोवानराशीघ्रविक्रमाः। अध्यारोहन्नुवोद्ग्राःशातयंतोमहाशिलाः। ततःसुवेलमारुह्यरामास्तैःसहवान सुग्रीऊ
रैः। निषसादगिरेस्तस्यशृंगेसमशिलातले। ततःकपिगणाःसर्वेसमारुह्यतियोजनं। आरोहंतसुवेलंउत्प्ल वैकः।
वंतोदक्षिणामुखाः। तेवायुवेगप्रवणाःतंगिरिंगिरिचारिणः। अध्यारोहंतशतशःसुवेलंयत्रराघवः। तेच
दीर्घेणकालेनगिरिमारुह्यसर्वतः। ददृशुःशिखरात्तस्माद्दिव्यामिवतांपुरीं। तांसुवर्णांवरद्वारांप्राकारव
शोभितां। लंकांराक्षससंपूर्णांददृशुःहरियूथपाः। प्राकारवलभासंस्थैःतमोनीलैर्निशाचरैः। ददृशुस्तेह

व्याघ्रस्येव रक्तस्त्व रा२२ मंडलपरिवेषनया ताराग्रहमंडलमेदनाद्या।४ संहारे।। अनिसूतः भयनिवेदकत्वात्।।

सृष्टे वानररक्षसां। वाताश्च परुषा वांति कंपते न वसुंधरा। पर्वताग्राणि वेपंते नर्द्दंति धरणीधराः। मेघाः क्रव्यात्प्रतीका
दीप्तांदिशं शाः परुषाः परुषस्वनाः। आदित्यपथमाविश्य जनयंतो महद्भयं। क्रूराः क्रूरं प्रवर्षंति मिश्रं रुधिरबिंदुभिः। रक्तचं
दनसंकाशा संध्या परमदारुणा। ज्वलच्च निपतत्येतदादित्यादग्निमंडलं। दीना दीनस्वरा घोरास्त्वप्रशस्ता मृगद्विजाः
रजन्यामप्रशस्तश्च संतापयति चंद्रमाः। कृष्णरक्तांशुपर्यंतो यथा लोकस्य पर्यये। ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः
नक्षत्रेण सुलोहितः। आदित्यमंडले लीनः पश्य लक्ष्मण दृश्यते। वंद्यमानं यथावद्धि नक्षत्राण्यभिपद्यते। युगांतमिव लोका
नां पश्य लक्ष्मण दृश्यते। कंकाः श्येनास्तथा गृध्राः नीचैः परिचरंति च। शिवाश्चाप्यशिवारावं नदंति महास्वनाः।।
क्षिप्रमद्य दुराधर्षां पुरीं रावणपालितां। अभियामो जवेनैव सर्वतो हरिभिर्वृताः। इत्येवं तु वदन्वीरो लक्ष्मणं
लक्ष्मणाग्रजः। तस्मादवततारासु पर्वताग्रान्महाबलः। अवतीर्य तु धर्मात्मा तस्माच्छैलात्स राघवः। परैरधृष्य
पुरस्कृत्य मक्षोभ्यं ददर्श बलमात्मनः। संनह्य तु ससुग्रीवं तदा रामो महद्बलं। अनस्कंपुरतो धन्वी लंकामभिमुखः पुरं। तं
विभीषणः सुग्रीवो हनुमाञ्जांबवान्नलः। ऋक्षराजोंगदो नीलो लक्ष्मणश्चान्वयुस्तदा। ततः पश्चात्सुमहती पृत
नार्द्देव नौकसां। प्रच्छाद्य महतीं भूमिं अनुयाया येन राघवः। शैलशृंगाणि शतशः प्रवृद्धांश्च महीरुहान्। जगृहुः कुं
जरप्रख्याः वानरा बाहुशालिनः। तौ त्वदीर्घेण कालेन रामः सुग्रीवलक्ष्मणौ। रावणस्य पुरीं लंकां आसेदतुः सुदुरास
दां। पताकामालिनीं रम्यां उद्यानशतशोभितां। चित्रवप्रां सुदुष्प्रापां उच्चप्राकारतोरणां। तां सुरैरपि दुर्धर्षां दृष्ट्वा रा
मप्रचोदिता। यथानिवेशं संपीड्य न्यवसंत वनौकसः। दशयोजनमाक्रम्य मंडलं वानरं बलं। परिक्षिप्य तदा लंकां १८
युद्धायाभिससार ह। लंकायास्तूत्तरद्वारं शैलशृंगमिवोन्नतं। रामः सहानुजो धन्वी जुगोप च रुरोध च। लंकामुपनि

= लंकानिवासिनां प्रविशननिर्गमनं संरुध्यार

तेषां निवेशस्तत्रासीत्प्रविभागैरनेकशः । अकंपयंस्ते लंकां ते निर्नादैर्नर्दतां वराः । सर्पीन्द्रिश्चतया यूथे मैंदी
वरणपाडिताः । उत्पपात रजश्चोर्द्धं कपोतारुणसंनिभं । अन्ये तु हरिशार्दूला विक्रांता हरियूथपाः । सुग्रीवेणा
भ्यनुज्ञाता लंकां जग्मुः पताकिनीं । वित्रासयंतो विहगांस्त्रासयंतो मृगद्विपान् । आस्फोटयंतो वल्गंतः सर्वे
रणसमुत्सुकाः । कंपयंतश्च लंकायां वनान्युपवनानि च । तेग्छङ्गिमहायूथैः महीं वरणपाडिताः । सख
निवरणोत्पिष्टा चकंपे च समंततः । रुरुदुः सिंहा वराहाश्च महिषाः सरभा मृगाः । तेन शब्देन वित्रस्ता जग्मुर्भी
ता दिशो दश । शिखरं संत्रिकूटस्य प्रांशुरेकोन भस्पृश । समंतात्पुष्पसंछन्नो महाजलदसन्निभः । श्वेत
श्चार्द्धं सविस्तीर्णो निर्मलाभ्रियसंनिभः । शक्यं श्रीमानू महाश्चिव दुः साप शकुनैरपि । मनसापि दुरारोहः
सादेशः किं पुनः कर्मणा । निविष्टा यस्य शिखरे लंका रावणपालिता । सा पुरी गोपुरैः श्चिन्ने र्विविधाकारतोरणैः ॥
कांचनेन च जालेन राजते न च शोभिता । प्रासादैश्च विमानैश्च लंका परमशोभिता । घनैरिवालपाये मध्यमं वि
आकाशं ष्णुपदं । यस्यास्तंभसहस्रेण प्रासादः सर्वकांचनः । कैलाशशिखराकारो दृश्यते खमिवोल्लिखन् । चैत्यः स रा
क्षसेन्द्रस्य रावणस्य दुरात्मनः । शतेन रक्षसां नित्यं यः समग्रेण रक्ष्यते । तां समृद्धां समृद्धार्थो लक्ष्मीवान् लक्ष्म
णाग्रजः । रावणस्य पुरीं रामो ददर्श सहवानरैः । तोरणच्छन्नसंबद्धां सविधानां प्रासादमालाभिरलंकृतां च । पुरीं
महायंत्रकपाटयुक्तां ददर्श रामः सहितो बलेन ॥ इति श्रीरामायणे युद्धकांडे लंकावलोकनो नाम सर्गः ॥ छ ॥ अथ
तत्र निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः । लक्ष्मणं संपरिष्वज्य वचो वददतं तदितः । प्रविगाह्योदकं तत्र सर्वे वनानि फलवं
ति च । बलं च प्रविभज्येदं वृद्धि तिष्ठाम लक्ष्मण । लोकक्षयकरं भीमं भयं पश्याम्युपस्थितं । निबर्हणं प्रवाराणां

६ हतमुखेन संतर्जनं । प्रार्थ्यानां क्रमयोगः तस्य वदनिश्चय राजधर्मः । पूर्वं हि हतमुखेन तर्जयेत् । पश्चाद्दंडपातः स्यात् । ६ देवतादिभिरप्यन्या यि नां दंडः क
रामः यः ।
तानां सहस्रैस्तु लंकां समभिवर्त्तत । वानरैर्बलवद्भिः सा बभूव द्रुमपाणिभिः । सर्वतः संवृता लंका दुःप्रवेशापि वायुना । नमस्तम्भि
राक्षसा विस्मयं जग्मुः सहसाभिनिपीडिताः । वानरैर्मेघसंकाशैः शक्रवीर्यपराक्रमैः । सहस्रैर्बहुभिश्चित्रनाव करिष्यो । १
मेघनिभैस्तदा । गिरिकूटप्रमाणैश्च वानरैरावृता दिशः । लंकायां वानवक्रष्टा माहोदधस्येव वर्द्धतः । सागरस्येव नि
स्वनस्य यथा स्यात्सलिलस्वनः । तेन शब्देन महता सप्राकारा सतोरणा । लंका प्रमथिता सर्वा रक्षसां नागतं भयं । रा
मलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी । बभूव दुर्द्धर्षतमा सर्वैरपि सुरासुरैः । राघवस्तन्निवेश्यैवं सैन्यं स्वर
क्षसां वधे । संमंत्र्य मंत्रिभिः सार्द्धं निश्चित्य च पुनः पुनः । आनंतर्यमभिप्रेप्सुः क्रमयोगार्थतत्त्ववित् । विभीषणस्यानुम
ते राजधर्ममनुस्मरन् । अंगदं वालितनयं समाहूयाब्रवीद्वचः । गच्छ सौम्य दशग्रीवं ब्रूहि मद्वचनादिदं । लंघयि
त्वा पुरीं लंकां भयं त्यक्त्वा गतव्यथः । भ्रष्टश्रीकं गतैश्वर्यं मुमूर्षुं नष्टचेतसं । ऋषीणां देवतानां च गंधर्वाप्सरसां तथा
नागानामथ यक्षाणां राज्ञां च रजनीचर । यच्च पापं कृतं मोहादवलिप्तेन राक्षस । नूनं ते विगतो दर्पः स्वयंभूव
अपकारस्म रदानजः । तस्य दंडधरस्तेहं मार्यो हरणकर्शितः । दंडं धारयिष्यामि लंकाद्वारे व्यवस्थितः । पदवीं देवतानां च ईश्वर २
रुषीणां विनराक्षसा । राजर्षीणां च सर्वेषां गमिष्यामि युधि स्थिर । बलेन येन मे सीता मायया राक्षसाधम । माम स्थिरो नवा ।
पक्रामयित्वा वै हृता वा स्तद्विदर्शय । अराक्षसमिमं लोकं कर्त्तास्मि निशितैः शरैः । न चेच्छरणमभ्येषि मामुपाद
याभि मैथिलीं । लंकैश्वर्यं परित्यज्य कृतराज्याकृतासनः । रक्षस्व जीवितं मूढ मम निर्यामि मैथिलीं । धर्मात्मा रक्ष सदत्वा ४
सां श्रेष्ठः संप्राप्तोयं विभीषणः । लंकैश्वर्यं महद्धीमान् मद्धस्तः पालयिष्यति । न हि राज्यमधर्मेण भोक्तुं क्षणम
पि त्वया । शक्यं मूर्ख सहायेन त्वज्ञेनाविजितात्मना । युध्यस्व वा धृतिं कृत्वा शौर्यमालंब्य राक्षस । मच्छरैस्त्वं रणे १९
शांतस्ततः पूतो भविष्यति । यद्याविशसि लोकांस्त्रीन् पक्षीभूतो मनोजवः । मम चक्षुष्पथं प्राप्य न मे जीवन्
=अवशेन । २ =अधिपरित्यजवादिना । ३ विभीषणे
८

=उच्चशैलशृंगसंनिभवाः॥

श्वेताद्रर्भिरिं।केला [illegible]।५

विष्टे श्रीरामे दशरथात्मजे॥ लक्ष्मणानुवरे वीरे युधिताः सर्वराक्षसाः॥ नान्यो रामाद्धि तद्द्वारं समर्थः परिरक्षितुं॥ राव
राधिष्ठितं तद्धि वरुणेनेव सागरं॥ राक्षसैः साधुभिरुग्रैः अभिगुप्तं समंततः॥ वीर्यविक्रमसंपन्नं पातालमिव दानवैः
राक्षसैर्विविधाकारैः शुशुभे सा महाचमूः॥ समंताद्बहुनिर्गुप्ता सा सर्पैर्भोगवती यथा॥ विशस्तानि च योधानां बहूनि
विविधानि च॥ तस्यामायुधजातानि चित्राणि ददृशे तदा॥ पूर्वं द्वारमार द्य नीलो हरिचमूपतिः॥ मैंदश्च द्विविद
श्चोभौ श्वेतं गिरिमिवारुणौ॥ अंगदो दक्षिणं द्वारं जग्राह पृतनावृतः॥ ऋषभेण गवाक्षेण गजेन पनसेन च॥ हनु
मान्पश्चिमं द्वारं ररक्ष बलवान् कपिः॥ प्रघसश्च प्रमाथी च यत्रास्य सविवाकुभि॥ मध्यमे च स्वयं गुल्मे सुग्रीवः
समतिष्ठत॥ सह सर्वैः कपिश्रेष्ठैः सुपर्णश्वसनोपमैः॥ वानराणां षट्त्रिंशत्कोट्यः ख्याताः सह यूथपैः॥ निषी
ड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः॥ शासनादथ रामस्य सुग्रीवः स विभीषणः॥ द्वारे द्वारे प्लवंगानां कोटीकोटी
निवेशयत्॥ पश्चिमेन तु रामस्य सुग्रीवः सह जांबुवान्॥ अदूरे मध्यमे गुल्मे तस्थौ बहुबलानुगाः॥ ते तु वानर
त्य राक्षसानीकं हनुमान् मारुतात्मजः ॥ गिरिशृंगं ततो गृह्य धूम्राक्षं विदधावत् बली ॥ तमापतंतं धूम्राक्षो गदामुद्य
म्य वीर्यवान् ॥ विनर्दतं हनुमंतं गदयाक्रम्य संयुगे ॥ तस्मै क्रुद्धः सरोषेण गदां तां बहुकंटकां ॥ न्यपातयत धूम्राक्षः
मूर्ध्नि देशे हनूमतः ॥ ताडितः स तया तत्र गदया भीमरूपया ॥ स तं न देशे महावीर्यो मारुतिर्गलसाध्वसः ॥ स कपिर्मा
रुतबलस्तं प्रहारमचिंतयन् ॥ धूम्राक्षस्य शिरोमध्ये गिरिशृंगमपातयत् ॥ स विह्वलितसर्वांगो गिरिशृंगेण पोथितः ॥
पपात सहसा भूमौ विकीर्ण इव पर्वतः ॥ निहतं राक्षसं दृष्ट्वा हतशेषा निशाचराः ॥ त्रस्ताः प्रतिगता लंकां वध्यमाना
वानौकसैः ॥ स जघ्नुः धूम्रं निहतो रुवक्त्रः सुविह्वलः शोणितलोहिताक्षः ॥ प्रवाकु तथा शोणितमुज्झिरन् मुखात् ×तां६
×तं५ प्रपात भूमौ वनष्ट चेताः ॥ विनिहत्य नरेन्द्रान् निशाम्य ह्रितत निंतरकर्दमां महीं ॥ रिपुवधजनितश्रमप्रह
ष्टः पवनसुतः ससुहृद्भिरर्चितस्तु ॥ ॥ इत्यार्षे रामायणे धूम्राक्षवधः ॥ धूम्राक्षं निहतं श्रुत्वा रावणः क्रोधमूर्च्छितः ॥ ब
लाध्यक्षमुवाचेदं कृतांजलिमुपस्थितं ॥ शीघ्रं निर्यांतु दुर्धर्षा राक्षसा भीमविक्रमाः ॥ अकंपनं पुरस्कृत्य सर्वशस्त्र ३३
विशारदं ॥ एष शास्ता च गोप्ता च नेता च युधि बुद्धिमान् ॥ भूतिकामश्च मे नित्यं नित्यं च समरप्रियः ॥ न चकंपयितुं
शक्यः स वैरपि सुरासुरैः ॥ अकंपनो कंपनः श्रीमान् आदित्य इव तेजसा ॥ एष जेष्यति काकुत्स्थं सुग्रीवं च महाबलं ॥

तेनाम वेगाहरयो नर्दमानाः सहस्रशः । समंततो राक्षसान् घोरान् नामानि बभाषिरे । पुनश्च तुमुलस्तेषां संग्रामः स
मपद्यत । तद्युद्धं वानराणां तु तेषां संग्रामशालिनां । शिलाभिर्विपुलाभिश्च बहुशाखैश्च पादपैः । वानरा मथिताः के
चित् केचित् नखैर्विदारिताः । राक्षसा मथिताः केचित् वानरैर्जितकर्मभिः । वमन्तो रुधिरं केचित् मुखैः रुधिरलोच
नाः । पार्श्वे विदारिताः केचित् केचिद्राशीकृता भुवि । शिलाभिश्चूर्णिताः केचित् नखैः केचित् विदारिताः । ध्वजैर्विमर्दि
तैर्भिन्नैः खड्गैश्च विनिपातितैः । रथैर्विमथितैः केचित् केचित् मथिता वाहनाः । वानरैर्भीमविक्रान्तैः राक्ष
सा व्यालवेगिभिः । राक्षसाः करजैस्तीक्ष्णैः मुखेषु च विदारिताः । विरूपवदना घोरा विप्रकीर्णशिरोरुहाः । म
ताः शोणितगन्धेन निपेतुर्धरणीतले । अन्ये च परमक्रुद्धा राक्षसा भीमदर्शनाः । तलैरेवाभिपातैश्च वज्रस्पर्शै
श्च वानरान् । वानरैरापतन्तिश्च वेगिता वेगवत्तरैः । मुष्टिभिश्चरणैश्च पादपैश्च विपोथिताः । सैन्यं स विकृतं दृ
ष्ट्वा धूम्राक्षो राक्षसैर्वृतः । क्रोधेन कदनं चक्रे वानराणां युयुत्सताम् । प्रासैः प्रमथिताः केचित् उद्वेगैः शोणितं मु
खैः । भुजैरस्त्राहताः केचित् पतिता धरणीतले । परिघैः पतिताः भग्नाः भिन्दिपालैः परश्वधैः । पट्टिशैराहताः
केचित् केचित् निर्विद्धलीकृताः । केचिद्विमथिताः भीमा रुधिरार्द्रा वनौकसः । केचित् विनिकृत्ता नष्टसंज्ञा क्रो
शसुन्धि । विभिन्नहृदयाः केचित् एकपार्श्वेन शायिनः । विदारितास्त्रिशूलैश्च केचिद्दंष्ट्राभिर्विदारिताः । ततः सुभी
मं महद्युद्धं हरिवानरराक्षसाम् । अस्त्रवृक्षास्त्रबहुलं शिलापादपसंकुलं । विविक्तं व्याकुलं तावेव असन्नं बभूव
सः । धनुर्ज्यातंत्रिमधुरं हिक्कातालसमायुतं । मंदस्तनितसंगीतं युद्धगांधर्वमाबभौ । धूम्राक्षस्तु धनुष्पाणिर्वा
नरान् रणमूर्द्धनि । हसन् विद्रावयामास दिशस्तान् शरवृष्टिभिः । धूम्राक्षेणार्दितं सैन्यं मथितं प्रेक्ष्य मारुतिः ।

=उर्धी२

४नू१ =वायाा२

शशामा
चक्रुर्मही दारुणकर्दमां॥ हतानां रुधिरौघेण संसादान्निहतं रजः। शरा रश्मितसंस्कार्यैर्बभूव वसुंधरा। क्रमशः क्रिशि
लाग्रास गदापरिघतोमरैः। राक्षसा हरयश्चैव चक्रुरन्योन्यमोजसा॥ बाहुभिः पर्वताकारैः रस्पंतः पर्वतोपमाः। वा
नरान् सूदयामासु संरब्धा रजनीचराः। वानराश्चापि संक्रुद्धा सिंहनादं मह्ताक्रम शिलाशमभिः। अभिजघ्नुरतिक्रम्य शाखा
भिः क्षिप्रवीर्य्यतः॥ एतस्मिन्नन्तरे वीरा हरयः कुमुदो नलः। मैंदोथ द्विविदः क्रुद्धाश्चक्रुर्युद्धमनुत्तमं॥ ते मुष्टिभि
र्महावेगा राक्षसानां चमूमुखे। कदनं सुमहच्चक्रुः लीलया हरियूथपाः। अभिनेरुस्मपुरतो शिलापादपवर्षि
णः। उत्कृष्टगर्जितरवा मेघा इव बभुस्तदा॥ तथा नरेंद्रेगणावत्तदंतं शस्त्रासुनागाश्चरथद्विपानां महोदधिः क्षु
ब्धमिवात्युरूपं निशाचराणां बलमाबभासे॥ निपातयंतोतिबलान्निशाचरान् तलप्रहारैः करजैश्च वेजिताः। विवे पृथक्कृताः।
रुरुत्रिः प्लवगेश्वरा रणे बलानि रक्षोधिपतेस्तदानीं॥ इत्यार्षे श्रीरामायणे अकंपननिर्याणो नाम सर्गः॥ ★ रक्षसां वान
रैर्दृष्ट्वा सुमहत्कदनं कृतं। क्रोधमाहारयामास तेषां तीव्रमकंपनः॥ क्रोधमूर्छितवेगस्तु धुन्वन् परमकार्मुकं। दृष्ट्वा तु
कर्म शत्रूणां सारथिं वाक्यमब्रवीत्॥ अत्रैव त्वरितं याहि सारथे यत्र वानराः। एते हि संहिता घ्नंति राक्षसान् सुबहून्
रणे॥ एतैर्हि राक्षसानां के कदनं सुमहत्कृतं। मय्यिति ष्टति राज्ञ्ये ना'भीवानरपुंगवाः। प्रसमंपचंत्यवर्षंति सैन्ये
मम सुदुःसहे। अत्रैव तावत्त्वरितः सारथे नय मे रथं। एते हि बलवंतश्च भीमकायाश्च वानराः। क्रमाशैलप्रहरणाति
ष्ठंति प्रमुखे मम। एतान् निहंतुमिच्छामि समरश्लाघिनो रणे। एतैर्हि राक्षसानां के हंतक्रिया निरंतरैः॥ ततः प्रचलि ३४॥
ताश्वेन रथेन रथिनां वरः। हरीनभ्यपतत्क्रोधात् किरन् बाणैरकंपनः। नस्थातुं वानराः शेकुः किंपुनर्योद्धुमाह
वे। अकंपनशरैर्भग्नाः सर्व एव प्रदुद्रुवुः। तान् मृत्युवशमापन्नान् अकंपनवशानुगान्। समाक्ष्य हनुमान् ज्ञाती

वानरांश्चापि घोरांश्च वर्धने षति राक्षसः॥ प्रतिगृह्य स तामाज्ञां राज्ञस्तस्य महाबलः॥ बलं संत्वरयामास तदा लघुपराक्र
मः॥ ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः॥ निर्ययू राक्षसा मुख्या बलाध्यक्षप्रणोदिताः॥ रथमास्थाय यत्तु आमानव
सकांचनभूषणः॥ सदाश्वैः संबालैर्युक्तो हेमजालविभूषितैः॥ राक्षसैः संवृतो भीमैः स तप्तकांचनकुंडलिः॥ सख
ड्गी कवची बाणी निर्ययौ स बलानुगः॥ अकंपनो वृतो घोरैः राक्षसैस्तु महाबलैः॥ तस्य निर्गच्छतस्तूर्णं अकस्मात्तु रथ
वाजिनः॥ ऊघानैः सहसापक्रत्यय विक्लवे तसः॥ आस्यं दत्ते क्षणं वापि सत्वं युद्धाभिकांक्षिणः॥ बिभेद मुखवर्णश्च
कंको विस्वर्यमायायौ॥ अकस्माद्दारुणो गृध्रो ध्वजाग्रे समलीयते॥ ग्लानोभवत् स्वरो तस्य सद्यो बाकुलस्वयोत्तरः॥ अकंपनमुक्तः
सघः॥ तस्मिन् काले तु रक्षसः॥ आकुलं गगनं चासीत् दुर्दिनं रूक्षमारुतं॥ उच्चुक्रुशुर्मृगाश्चास्य वाचः क्रूरा भयावहः॥
उक्तुः स्वरं व दीप्तं व निस्वरं मृगपक्षिणः॥ स तु सिंहोचितस्कंधः शार्दूलसमविक्रमः॥ तानुत्पातानधःकृत्वा निर्जगा
मनिशाचरः॥ तस्य निर्यातमानस्य नगर्याः सह राक्षसैः॥ बभूव सुमहान्नादः क्षोभयन्निव सागरं॥ तेन शब्देन
वित्रस्ता वानराणां महाचमूः॥ द्रुमशैलप्रहरणा योद्धुं समवतिष्ठता॥ तेषां युद्धं महाघोरं संजज्ञे कपिरक्षसां॥ रा
मरावणयोरर्थे समभित्यक्तजीवितं॥ सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसन्निभाः॥ हरयो राक्षसाश्चैव परस्पर
ऊभिषिषिणः॥ तेषां विनदतां शब्दः संयुगे षुतरस्विनां॥ शुश्रुवे सुमहांस्तस्मिन्नन्योन्यमभिगर्जतां॥ रजश्च सहसो
द्धूतं सुभीममभवत्तदा॥ सर्वा ता हरिरक्षोभिः संरुरोध महद्दिशः॥ अन्योन्यं रजसा तेन कौशेयारुणपांडुना॥ संवृतं =२४
क्षमक्षेण ददृशुर्न रणाजिरं॥ न ध्वजो वा पताका वा वर्मिणस्तुरगोपि वा॥ आयुधं स्यंदनं वापि ददृशे तेन रेणुना॥ श
ब्दस्तु तुमुलस्तत्र नदतामभिधावतां॥ शुश्रुवे विपुलः संख्ये न रूपाणि प्रकाशिरे॥ हरीनेव सुसंक्रुद्धा हरयो जघ्नु
राहवे॥ राक्षसाश्चापि रक्षांसि निजघ्नुः समरे तदा॥ ते परांश्च विनिघ्नंतः स्वांश्च वानरराक्षसाः॥ रुधिरार्द्रां तदा

कोशेयंरुमिकाशोकां४

मुक्तितः ॥ उत्पाट्य सहसा वृक्षं कृत्वा वेगमनुत्तमं ॥ शिरस्यभिजघानाशु निशाचरमकंपनं ॥ तेन वृक्षप्रहारेण वज्रे
णेव बिडौजसा ॥ राक्षसो वानरेंद्रेण प्रेक्षितो यमसादनं ॥ तं दृष्ट्वा पतितं भूमौ अकंपनमकंपनं ॥ व्यथिता राक्षसाः
सर्वे क्षितिकंपे नगा इव ॥ त्यक्त्वा प्रहरणाः सर्वे राक्षसास्ते पराजिताः ॥ लंकामभिविविशुस्त्रस्ता हन्यमाना प्लवंग
मैः ॥ ते मुक्तकेशाः संविग्नाः भग्नमाना पराजिताः ॥ भयात्त्रमजलांगा निःश्वसंतो विशृंखलाः ॥ अन्योन्यमभि
नर्दंतो विविशुर्नगरीं तदा ॥ पृष्ठतस्त्रासंमूढाः प्रेक्षमाणा मुहुर्मुहुः ॥ तेषां संयजुता संख्यं विशतां च पुरीं भया
त् ॥ राक्षसानां जवं दृष्ट्वा विनेदुस्ते वानरोत्कसः ॥ तेषु लंकाप्रविष्टेषु राक्षसेषु प्लवंगमाः ॥ समेत्य हरयः सर्वे हनूमं
तमपूजयन् ॥ सोपि प्रहृष्टस्तान् सर्वान् वानरान् प्रत्यपूजयत् ॥ हनुमान् सत्वसंपन्नो यथार्हमनुरूपतः ॥ वि
नेदुश्च यथाकालं हरयो जितकाशिनः ॥ पुनश्चाकृष्यकः पतितान् सत्रागनेव राक्षसान् ॥ एवं स संप्रजयहृवी
नूल्वा कर्म सुदुःष्करं ॥ आजगाम महाबाहुर्यत्र रामः सलक्ष्मणः ॥ स वीरशोभामभजन्महाकपिः निहत्य
रक्षःखरसाह्यवाप्तवान् ॥ महासुरं भीममममित्रतापनो यथैव विष्णुर्बलिनं चमूमुखे ॥ अपूजयन् देवगणा
स्ततः कपिं स्वयं च रामोतिरथश्च लक्ष्मणः ॥ तथैव सुग्रीवमुखाः प्लवंगमाः विभीषणश्चैव महाबलो यायिनः ॥
इत्यार्षे युधकांडे अकंपनवधः ॥ ५ ॥ ततस्तु रावणः क्रुद्धः श्रुत्वा हतमकंपनं ॥ पुरं प्रतियायौ लंकां स नीकुंभ बत्राम
संरुद्धपु मानवेक्षितुं ॥ तां राक्षसगणैर्गुप्तां गुल्मैश्च बहुभिर्वृतां ॥ ददर्श राजा राजेंद्रो बहुध्वजपताकिनी ॥ रुद्धां तु नग
रुषसं रीं दृष्ट्वा रावणो राक्षसेश्वरः ॥ उवाचामर्षितः काले प्रहस्तं युद्धकोविदं ॥ पुरस्योपनिरुद्धस्य सहसा पीडितस्य च
धातान् प नान्यं समर्थं पश्यामि युद्धे युद्धविशारद ॥ अहं वा कुंभकर्णो वा त्वं वा सेनापतिर्मम ॥ इंद्रजित् वा निकुंभो वा वहेयु
र्भारमीदृशं ॥ स त्वं बलमितः शीघ्रमादाय परिगृह्य च ॥ विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ निर्याणादे ३५
व ते वीर चपला हरिवाहिनी ॥ नदंतां राक्षसेंद्राणां श्रुत्वा नादं द्रविष्यति ॥ चपला ह्यविनीताश्च चलचित्ताश्च वान
रात्रुवधन कर्णा।२

=रा ४

=नगु ६

संप्रतस्थे महाबलः॥ तं महाप्लवगं दृष्ट्वा सर्वे ते प्लवगाधिपाः। समेता समरे वीरं समग्राः पर्यवारयन्॥ हनूमंतं वर्त्ते
दृष्ट्वा बभूवुर्हरियूथपाः। विश्वस्ता बलिनः सर्वे बलवंतमुपाश्रिताः॥ अकंपनस्तु शिलाभं हनूमंतमुपस्थितं
महेंद्रमिव धाराभिः शरैरभ्यवर्षत। अचिंतयित्वा तान् बाणान् शरीरे पततः शितान्॥ अकंपनवधार्थनम
हामाविदधे मनः। स प्रहस्य महातेजा हनुमान् पवनात्मजः। रक्षःसकाशमभिदुद्राव कंपयन्निव मेदिनीं॥ तस्याथन
र्द्दमानस्य तं दीप्यमानस्य तेजसा। बभूव रूपं दुर्द्धर्षं शक्रस्येवोद्यताशनेः। आत्मानं त्वप्रहरणं बुद्ध्वा क्रोधसम =क्रोध
न्वितः। ह॰॰ शालमुत्पाटयामास गिरिशृंगमिवोच्छ्रितं। गृहीत्वा तं महाशालं पाणिनैकेन मारुतिः। विनद्य सुम
हानादं त्रासयामास राक्षसान्॥ ततस्तमभिदुद्राव निशाचरमकंपनं। निहंतुमनुविं क्रुद्धो वज्रेणेंद्र इवाहवे
आपतंतं च दृष्ट्वा शालहस्तं च मारुतिं। ताडयामास बाणाग्रैः शालं चाप्यस्य विच्छिदे। छिन्नं तु वृक्षं सहसा व्यवधू
य महाकपिः। समुत्पाट्य गिरेः शृंगं अभिदुद्राव राक्षसं। अकंपनस्तु तं दृष्ट्वा गिरिशृंगं समुद्यतं। दूरादेव महाबा
णैः अर्द्धचंद्रैरदारयत्। तत्पर्वताग्रमाकाशे रक्षोबाणैर्विदारितं। विकीर्णं पतितं दृष्ट्वा हनुमान् विस्मितोऽभवत्
सोऽथ कर्णसमासाद्य रोषदर्पान्वितो हरिः। तरुमुत्पाटयामास महागिरिमिवोच्छ्रितं। तं गृहीत्वा महास्कंधं महाका
यो महाद्युतिः। प्रगृह्य परमप्रीतो भ्रामयामास वीर्यवान्। प्रधावन्नुरुवेगेन प्रभंजन् परान्क्रमान्॥ हनुमान्
परमक्रुद्धश्चरणैः कंपयन्महीं। राक्षसान् सगजारोहान् सरथान्सहयद्विपान्। जघान समरे क्रुद्धः पदातींश्चा
परान्बहून्॥ तदंतकमिव क्रुद्धं समरे प्राणहारिणं। हनुमंतमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः। तमापतंतं संरब्धं
राक्षसानां भयावहं। ददर्शाकंपनो वीरश्चुक्रोध च महाबलः। स चतुर्दशभिर्बाणैर्निशितैर्मर्मभेदिभिः। बिभे
द स महावीर्यं हनुमंतमकंपनः॥ स तथा तेन विद्धस्तु बहुभिर्मार्गणैः शितैः। हनुमान्ददृशे वीरो रुधिरेणास

नरवानरनाशाय रावणार्थे न संशयः ॥ लंकाया निर्ययौ क्षिप्रं बलेन महता वृतः ॥ ततो दुंदुभिनिर्घोषं पर्जन्यनिन
दोपमः ॥ शुश्रुवे शंखशब्दश्च प्रयाते वाहिनीपतौ ॥ यूहेनेवातिघोरेण प्राग्रेणास विनिर्ययौ ॥ गजयूथनिकाशेन बलेन महता
रतः ॥ विनर्दतो रवान्घोरान् राक्षसाऽग्रमुरग्रतः ॥ भीमरूपा महाकायाः प्रहस्तस्य पुरःसराः ॥ सागरप्रतिमौघेन बले
न महता वृतः ॥ प्रहस्तो निर्ययौ क्रुद्धो कालांतकयमोपमः ॥ तस्य निर्याणघोषेण राक्षसानां च गर्जतां ॥ लंकायां सर्वभूता
नि विनेदुः विकृतैः स्वरैः ॥ विभ्रमाकाशमावृत्य त्रासस्रवं समं खरस्वनं ॥ ववर्षे रुधिरं देवः प्रहस्तस्य रथोपरि ॥ ध
जमूर्द्ध्नि गृध्रोस्य निलीनो दक्षिणामुखः ॥ वमंत्यः पावकज्वालाः शिवा घोरा ववासिरे ॥ अंतरिक्षात्पपातोल्का वायुश्च
=ग्र७ परुषो ववौ ॥ अन्योन्यमभिसंरब्धाः ग्रहाश्च न चकाशिरे ॥ प्रयातस्य च संग्रामे छाया च विकृताभवत् ॥ अश्रुपूर्णमुख
■श्चास्य दक्षिणं स्खलितो हयः ॥ सारथिर्बहुशश्चास्य पतन्नाम च गाहतं ॥ प्रतोदो न्यपतद्धस्ताद्धरिणाद्धयशालिनः
दीप्ति निर्याणश्रीश्च तस्यासीद्भास्वरा या सुदुर्लभा ॥ सा ननाश मुहूर्तेन समे च स्खलिता हयाः ॥ तान् समास्थ्य ग्रशोत्पातान् करमण
प्रहस्तो भृशदारुणान् ॥ आभवीर्यं विदृष्ट्वा नो राक्षसा निर्ययौ च हा ॥ कालो भवेयं कालस्य देहे यमपिपातकं मर्ये
मरणधर्मेण संयोजयितुमुत्सहे ॥ तस्य तद्ध्वनिं श्रुत्वा प्रहस्तस्य रणाजिरे ॥ सुसंरब्धस्तराजगम्भः राक्षसायुद्धकांक्षि
णः ॥ ततस्तमभिनिर्यांतं प्रख्यातबलविक्रमं ॥ युद्धिनानाप्रहरणा कपिसेनाभ्यवर्तत ॥ अथ घोषः सुतुमुलः कपीनां
समजायत वृक्षानारुजतां चैव गुर्वीश्चागृह्णतां शिलां ॥ उभे उमुदिते सैन्ये रक्षोगणवानरौकसां ॥ वेगितानां समर्था
नामन्योन्यवधकांक्षिणां ॥ रक्षसां वानराणां च बभूव तुमुलो ध्वनिः ॥ ततः प्रहस्तः कपिवाहिनीं तां अभिप्रतस्थे नि
धनाय दुर्मतिः ॥ विवृद्धवेगं च ननाद वदारुणं यथा मुमूर्षुः शलभो विभावसुं ॥ ॥ इत्यार्षे युद्धकांडे प्रहस्तनिर्याणो रुद
नामसर्गः ॥५८ ॥ ततः प्रहस्तं निर्यांतं भीमं भीमपराक्रमं ॥ गर्जंतं सुमहाकायं राक्षसैरभिसंवृतं ॥ ददर्श महती से
ना ॥

अकृतात्मा कृपः।। निरालंबो निःसहायः।

राः। श्रोर्षंतेन सहितैर्यांति सिंहनादमिवद्विपाः। नर्दंतं वांसमालक्ष्य रामः सौमित्रिणा सह। अथ वंशस्थे निरालं-
बः प्रहस्तवशमेष्यति। श्रापत्सु संशयः श्रेयो नत्विनिःसंशयं कृतं। प्रतिलोमानुलोमं वा यद्वान्यत्मनसो हि-
तं। रावणेनैवमुक्तस्तु प्रहस्तो राक्षसाधिपः। राक्षसेंद्रमुवाचेदं असुरेंद्रमिवोशना। राजन् मंत्रितं पूर्वं कुश-
लैर्मंत्रिभिः सह। विवादश्चापि नौवृत्तः समवेक्ष्य परस्परं। प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया। अप्रदा-
नः।४ ने पुनर्युद्धं दृष्टमेतत्तदेव हि। सोहं दानैश्च मानैश्च सततं पूजितस्त्वया। सांत्वैश्च विविधै राजन् किं न कुर्यां प्रि-
यं तव। मद्बाणाशनिवेगेन हतानां तु रणाजिरे। अद्य तृप्यंति मांसेन पक्षिणः काननौकसः। न हि मे जीवितं रक्ष्यं पु-
त्रदारधनानि वा। संपश्य मां जुहूषंतं त्वदर्थे जीवितं रणे।। एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः। उवाचेदं बलाध्यक्षा-
न् प्रहस्तः पुरतः स्थितान्। समानयत मे क्षिप्रं राक्षसानां महद्बलं। अद्य तांनाशयिष्यामि वेगेन हरिवाहिनीं। इ-
त्युक्तास्ते प्रहस्तेन बलाध्यक्षाः कृतत्वराः। बलमुद्योतयामासुस्तस्मिन् राक्षसमंदिरे। साबभूव मुहूर्तेन तिग्मै- नीत्रा।
नानायुधध्वजाः। लंका राक्षसवीरैस्तैर्गजैरिव समाकुला। हुताशनं तर्पयितां ब्राह्मणांश्च नमस्यतां। हव्यगंधप्रति-
वहन् सुरभिर्मारुतो ववौ। तर्पयित्वा वने तस्मिन् विधिवज्जातवेदसं। स्रजश्च विविधाकाराः शिरोभिरभिमंत्रि-
ताः। संग्रामसज्जाः संहृष्टाः धारयंति महाबलाः। ब्राह्मणान् स्वस्तिवाचाग्रे संग्रामायाभवन् स्थिताः। धनुर्हस्ताः कव-
चिनो वेगेनाप्लुत्य राक्षसाः। रावणं प्रेक्ष्य भर्तारं प्रहस्तं पर्यवारयन्।। अथामंत्र्य वराजानं भेरीमाहत्य भैर-
वां। आरुरोह रथं दिव्यं प्रहस्तः सज्जकार्मुकः। अरण्यं रावणेनैव प्रहस्तस्तेन कल्पितं। आरुह्य स रथश्रेष्ठं कां-
चनांगदकुंडलः। सर्वायुधसमोपेतं किंकिणीजालनादितं। हयैर्महाजवैर्युक्तं सम्यक्सूतसमन्वितं। महा-
जलदनिर्घोषं श्रामवंशार्कभास्वरं। उग्रध्वजनिर्घोषं वरूथोपस्करान्वितं। सुवर्णजालसंयुक्तं प्रहसंतमिव
श्रिया।

रिव पुष्पितैः ॥ हतवीरौघवप्रां तु भग्नायुधपरिद्रुमां ॥ शोणितौघमहातोयां यमसागरगामिनीं ॥ यकृत्प्लीहमहा-
पंकां विनिकीर्णांत्रशैवलां ॥ भिन्नकायशिरोमीनामंगावयवशाद्वलां ॥ गृध्रकंकबडकाकीर्णां हंससारसनादितां
मेदःफेनवृताकीर्णां योधस्तनितनादितां ॥ तां कापुरुषदुस्तारां युद्धभूमिमयीं नदीं ॥ नदीमिव घनापाये हंस-
सारससेवितां ॥ राक्षसाः कपियोधाश्च तेरुस्ते दुस्तरां तदा ॥ यथा पद्मरजोद्धूतां नलिनीं गजयूथपाः ॥ व्यगाहंत
तथा वा राहरिराक्षसपुंगवाः ॥ ततः सृजंतं बाणौघान् प्रहस्तं स्यंदने स्थितं ॥ ददर्श तरसा नीलो विनिघ्नंतं प्ल-
वंगमान् ॥ ततः परमदुर्मर्षमापतंतं महाकपिः ॥ प्रहस्तं ताडयामास वृक्षमुत्पाट्य वीर्यवान् ॥
स तेनाभिहतः क्रोधान्नदन्राक्षसपुंगवः ॥ ववर्ष शरवर्षाणि प्लवंगमचमूपतौ ॥ तत् यथा गोवृषो वर्षं
शारदं शीघ्रमागतं ॥ अपारयन्वारयितुं प्रतिगृह्णाति निमीलितः ॥ एवमेव प्रहस्तस्य शरवर्षं प्लवंगमः ॥ रथवः
निमीलिताक्षः सहसा नीलः सेहे विदारुणं ॥ रोषितः शरवर्षेण शालेन महता वृक्षः ॥ ततः ॥ निजघान हयान्
नीलो प्रहस्तस्य मनोजवान् ॥ सहस्ताद्बाणमुत्सृज्य प्रहस्तः सशरासनं ॥ प्रगृह्य मुशलं घोरं स्यंदनादव-
पुप्लुवे ॥ ततस्तौ वाहिनीमुख्यौ जातकोपौ तरस्विनौ ॥ तस्थौ क्षतजदिग्धांगौ प्रभिन्नाविव कुंजरौ ॥ उल्लि-
खंतौ सुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरं ॥ सिंहशार्दूलसदृशौ सिंहशार्दूलविक्रमौ ॥ विक्रांतौ समरे वीरौ संयु-
गेष्वनिवर्तिनौ ॥ आकांक्षंतौ यशः प्राप्तुं वृत्रवासवसंयुगे ॥ आजघान ततो नीलं ललाटे मुशलेन सः ॥ प्रह-
स्तः परमायत्तस्तस्य सुस्राव शोणितं ॥ ततः शोणितसंरक्तः प्रगृह्य तं महातरुं ॥ प्रहस्तस्योपरि क्रुद्धो विस-
सर्ज महाकपिः ॥ प्रहारमविचिंत्यास्तु प्रगृह्य मुशलं महत् ॥ अभिदुद्राव बलिनं बली नीलं प्लवंगमं ॥ तमुग्र- २७
वेगं संरब्धमापतंतं महाकपिः ॥ नीलः संप्रेक्ष्य जग्राह महाकायो महाशिलां ॥ तस्य युद्धाभिकामस्य मृधे मु-

वानराणां बलीयसां। अभिसंजातहर्षाणां प्रहस्तमभिगर्जतां। पट्टशास्त्यृष्टिबाणाश्च शूलानि मुशलानि च। गदाश्च
परिघाश्चैव विविधाश्च परश्वधाः। धनूंषि च विचित्राणि राक्षसानां जयैषिणां। प्रगृह्य तान्यशेषाणि वानरान्प्रति
धावतां। वृक्षान्पुष्पितांश्चैव पादपान् वानरर्षभाः। शिलाश्च विविधाश्चैव योद्धुकामाः प्लवंगमाः। तेषामन्योन्यमासा
द्य संग्रामः सुमहानभूत्। बहूनामश्मवृष्टिं च शरवृष्टिं च मुंचतां। बहवो राक्षसा युद्धे बहून्वानरयूथपान्।
वानराश्चापि रक्षांसि जघ्नुश्च परान्बहून्। शूलैः प्रमथिताः केचित् वानरा राक्षसैर्युधि। परिघैराहताः केचित्केचि
च्छिन्नाः परश्वधैः। निरुच्छ्वासाः पुनः केचित् निपेतुर्धरणीतले। वक्षस्पार्श्वास्तलैश्चान्ये मुष्टिभिश्चाहताभृ
शं। प्रवमन्शोणितं वक्त्रात् विकीर्णदशनेक्षणाः। आर्त्तस्वरं च नदतां सिंहनादं च गर्जतां। बभूव तुमुलः शब्दो
हरीणां रक्षसां तथा। वानरा राक्षसाश्चैव वीरमार्गमनुव्रिताः। विवृत्तनयनाः क्रुद्धाः चक्रुः कर्माण्यभीतवत्॥
एतस्मिन्नंतरे शूराः प्रहस्तस्य पदानुगाः। नरांतकः कुंभहनुः महानादः समुन्नदः। एते प्रहस्तसचिवाः जघ्नुः
सर्वान्वनौकसः। तेषामापततां वेगं निघ्नतां च वनौकसां। द्विविदो गिरिशृंगेण जघानैकं नरांतकं। दुर्मुखः
पुनरास्थाय बलात्स विपुलं द्रुमं। अपरोद्ध्यं प्रहस्तस्य समुन्नदमपोथयत्। जांबुवांस्तु संरब्धः प्रगृह्य त्वाचवि
पुलां शिलां। अपातयत महातेजा महानादस्य वक्षसि॥ अथ कुंभहनोस्तार स्तरस्तासंयुगे बली। वृक्षेणाम
हताः प्राणान् कपिस्तस्य समाददे। अमृष्यमाणस्तत्कर्म प्रहस्तस्तो रथमास्थितः। चकार कदनं घोरं धनुष्पाणिर्व
नौकसां॥ तत्र तस्याप्रमेयस्य सागरस्येव संप्लवः। आवर्त्तैरिव संजज्ञे बलस्य महतो महान्॥ महता हि शरौघेण
प्रहस्तो युद्धकोविदः। अर्दयामास संक्रुद्धो वानरान्परमाहवे॥ १०० वानराणां शरीरैश्च राक्षसानां च मेदि
नी। बभूव निचिता तत्र पर्वतैरिव सर्वतः। सा मही रुधिरौघेण प्रच्छन्ना स्म प्रकाशते। प्रच्छन्ना माधवे मासि पलाशैः

त्रिशिरा हता॥ आयुधव्यग्रहस्तैश्च राक्षसैश्च समं ततः॥ सर्वांस्तु रक्षिता देवी यत्रास्ते राक्षसाधिपः॥ कृत्वे ण्प्रियमा
णेन अतिकायः पुरःसरः॥ कामरूपश्च रामस्य मन्त्रिवीज्यमानश्चामरैः कृतैः॥ शतार्द्धमार्गे बहुलंध्वजमालापरोपितं
उच्चार्य च कुर्वन्विवेश नगरं पाणिभिः॥ प्रविश्य च समादिष्ट्वा प्रमदया द्योतमानया॥ कृष्टं तरानलं साउ मयस्य कृ
हिता तदा॥ आश्वास्तां देवीं ततो राज्ञा स्त्रियां संरक्षस्व निजां॥ दृष्ट्वा ससंभ्रमं पूर्वं परिष्वज्य दशाननः॥ मंत्रिणां तु ततस्ते
षां आसनान्यादिदेश ह॥ सौवर्णे सुविचित्राणि सोपधानानि सर्वशः॥ ते चासने उपविष्टेषु अन्येषां तेषु मंत्रिषु
पर्यंके उपविष्टेषु देवी मंदोदरी ततः॥ अतिकायो महाबाहुः पितरं चाभिवाद्य तं॥ मातरं चाभिवाद्याथ वदास
नगतो भवत॥ अक्षस्य वधसंतप्तो महाकायो वध्यार्द्दितः॥ लंकायाश्चावमर्द्देन कषायउत्तलोचनः॥ संग्राममभि
कांक्षन्स व्याकुलेनांतरात्मना॥ अब्रवीद्धि पुत्रः सोथ महागंभीरनिस्वनं॥ किमागमनकार्यं ते देवि शास्त्रं तु कु
र्यतां॥ हर्षं मम समापन्नं किं भवत्यत्र मिहागता॥ मंत्रिभिस्सहिता किं वितु ब्रूहि साध्वि यथातथं॥ एवमुक्ते तु
वचने देवी वचनमब्रवीत्॥ विज्ञाप्यं श्वशुरा राजेन्द्र यावे वा त्वय्युक्तांजलिः॥ नापराधश्च कर्त्तव्यो वद् यामममा
नद॥ हता मे नगरी रुद्धा हता मे राक्षसा हताः॥ रक्षांक्ष सहिता वीरा अहस्तेन सा हि वचत्॥ मत्वं तं युद्धकामं व
निर्गंतुं कृतनिश्चयं॥ इति संविग्नराजेन्द्र ममागमनकारणं॥ न च युद्धं अनुषक्तश्च तत्तु तस्य महात्मनः॥ महात्मा
गसमर्थस्य यस्य नाथर्था व्याहृता॥ लक्ष्मणस्य च सौमित्रे। यस्य नास्ति समो युधि॥ न च मानुषमात्रो सौ रामो द
शरथात्मजः॥ एकेन येन नाविष्टं बहवो राक्षसा हताः॥ चतुर्दश सहस्राणि जनस्थाननिवासिनां॥ खरश्च नि
हतः संख्ये तदा रामेण मानुषः॥ त्रिशिराश्च कबंधश्च विराधो दंडके हतः॥ शरणौकेन वाली च तदा रामेण मानु ३८
षः॥ शांकाने नमहाराजकुमारा च स्य वधश्च दपि॥ पितुश्च वचनाद्रामः प्रविष्टो दंडकं वनं॥ ब्रह्मचर्यव्रते युक्तो सह
भ्राता वनेचरः॥ तस्य भार्या जनस्थानात् किमानीता पतिव्रता॥ अकारणं कृतं तत्ते दोषायं समुपस्थितः॥ पतिव्रता

शालयोधिनः। प्रहस्तस्य शिलां नीलो मूर्ध्नि तूर्णमपातयत्। सा तेन कपिमुख्येन विमुक्ता महती शिला। बिभे
द बहुधा घोरा प्रहस्तस्य शिरो महत्। स गतासुर्गतश्रीको गतसत्त्वो गतेन्द्रियः। पपात सहसा भूमौ छिन्नमू
ल इव द्रुमः। विभिन्नशिरसस्तस्य बहु सुस्राव शोणितं। शरीराद निःसरं बहु रुधिरं प्रस्रवणादिव। हते प्रह
स्तेन नीलेन तदकंपनमहद्बलं। रक्षसामगतहर्षं लंकामभिपपात ह। अशक्तसमिति स्थातुं निहते
वाहिनीपतौ। सेतुबंधं समासाद्य विकीर्णं सलिलं यथा। हते तस्मिंश्चमूमुख्ये न कश्चित्पुरतो भवत्। तस्मि
न्रक्षोबलगणाध्वानमूकत्र मागतं।। ततस्तु नीलो विजयी महाबलः प्रशस्यमानः स्वकृतेन कर्मणा। समे
त्य रामेण सलक्ष्मणेन च प्रहृष्टरूपो थ बभूव यूथपः।। तस्मिन्हते राक्षससैन्यनाथे प्लवंगमामेघ[illegible]न्यु ×न।७
दे।। भीमा युद्धसागरं तल्यरूपं प्रदुद्रुवे राक्षससराक्षसैन्यं।। गत्वा तु नीलेन हतं शरांशुः सेनापतिं सानुचरं प्रहस्तं तत्रा
पि तेषां स निशम्य वाक्यं रक्षोधिपः क्रोधवशं जगाम।। समागतं नीलहतं निशाम्य कौशोदितः क्रोधवशाभिभूतः। महाब
लानुयुद्धनिशारदांश्च जवाव तान् निरुत्तयोधमुख्यान्।। ।।इत्यार्षे श्री युद्धकांडे प्रहस्तवधो नाम सर्गः।।८।। प्रहस्त
स्य वधं श्रुत्वा रावणो भ्रान्तमानसः। राक्षसानादिदेशाशु राक्षसेन्द्रो महाबलः। कार्या रात्रुषु नानज्ञायेरिद्बलसू
दनः। सुरदिलः सैन्यपालो मे सानुयात्रः सकुंजरः। सोहं रिपुविनाशाय विजयस्य विवृद्धये। स्वयमेव गमिष्या
मि रणशीर्षमनिवर्तनः।। अद्य तद्वानरानीकं सहरामं सलक्ष्मणं। निर्दहिष्यामि बाणौघैः शुष्कं वनमिवानलः। =श्लो ५
अद्याहं तर्पयिष्यामि पृथिवीं कपिशोणितैः। रामं च लक्ष्मणं चैव रामं च लक्ष्मणं चैव नेष्ये च यमक्षयं। एवमु
क्त्वा महातेजा रावणो लोकरावणः। अगच्छत्सहसा क्रुद्धः सर्वसैन्येन संवृतः। X ।।संग्राममभिकांक्षंतं रावणं X
कृत्य भामिनी। हता सा रुरायायो देवी नाम्ना मंदोदरी तदा। माल्यवंतं करेणाथ पूपाक्षसहिता उसा। मंत्रिर्मं
त्रतत्वज्ञैस्तथान्यैर्मंत्रिसत्तमैः। राक्षसैरावृता सर्वैः वैजऊर्जर पाणिभिः। योधिद्भिश्चैव वृद्धाभिस्तथा कन्या ○

२१

कार्तवीर्यार्जुनो यथा। मारुध्या मोक्षमार्गं त्वं मारुध्यां कुलसंक्षयं। मारुध्याः पुरनाशं च मारुध्याः पुत्रसंक्षयं।
हितं सर्वं श्रवाम्येषा कुरुष्व वचनं मम।। ।।इत्यार्षे रामायणे मंदोदरीवाक्यं।। तस्यास्तद्वचनं श्रुत्वा प्रियाया राक्ष
सेश्वरः। उक्तं दीर्घं विनिश्वस्य निरीक्ष्य च समासदः। हसन्मंदोदरीं गृह्य वाक्यमेतदुवाच ह। श्रयाहं हितकारि
एषा वचो यद्धि भाषितं त्वं न तन्मनसि मे देवि प्रविवेश शात्रियं प्रिये। देवान् जित्वा रणे पूर्वं ससुरासुरमानवान्।
प्रणमे मानुषे कस्मात् वानरेश्च समन्वितं। प्रणम्य रामं काकुत्स्थं किं वक्ष्ये सर्वदेवताः। कादरं वाक्यमे भद्रेऽ
वितं हततेजसः। हत्वा तस्य पुरा भार्यां आनंदवासुधरुणां। राक्षसान् घातयित्वा च लंकां पाल्यव सर्वतः। राघवं
प्रणमे कस्मात् दीनवीर्ये च अबलः। राघवं प्रणमिष्याहं कथं जानि तमुत्सहे। एष मे सहजो भावो नियं मनसि
धिष्टितः। अविज्ञज्ञेप तवादेवि ननमे यं हि कस्यचित्। न धुनासि ततो येन शरबैघच्छिवाक्रांतो। प्रतिबिंबं तु ते
मर्तासकथ्यं करुणं वदेत्। त्रिलोक्ये स पुमान्नास्ति यो मे यानिजितो रणे। देवतानां बलं हत्वा देवराजो महाजि =या ८
तः राघवं प्रणमे कस्मात् श्रद्धिश्छिवा उदेहिनां। मारुध्या हृदि संतापं जयिष्ये हि द्विजस्मिते। हनिष्ये लक्ष्मणं चैव
राघवं नापि वानरान्। सुग्रीवं च हरिष्यामि हनुमंतं च वानरं। न तु संधिं करिष्यामि राघवेण सहाहवे तु। विदेहीना
र्पयिष्यामि राघवस्य भयादहं। सौत्रतं न तु संधिं च करिष्यति स राघवः। सागरं तु महद्बद्ध्वा रुद्ध्वा लंकां सकान
नां राक्षसान् अवरान् हत्वा। संधिं कुर्यां कथं प्रिये। न चाहं। संधिमिच्छामि कदाचिदपि भामिनि। गच्छ त्वं भवनं वि =चं ४
श्र श्रासर्नमे तसुखोदयं। मारुध्या हृदि संतापं अहं यास्ये रणाजिरं। अघ्नुस्सर्वान् हनिष्यामि वानरान्नरणमू
र्शनि। पुत्राश्च मे महावीर्या मेघनादपुरोगमाः। अंतःपुराय गच्छ त्वं ससुरवैभवसरक्षेमा।। एवमुक्त्वा परिष्वज्य ३९
भार्याप्रीतमनाइव। अवेवेश ततो देवी स्वयं सा भवनोत्तमं। चिंतयामास तद्वीरं विग्रहं सम्प्रपश्चिकिर्तं। रावणस्तु

= रघु २

विरोधस्तु दोषमाहवते महान् ॥ तन्मध्ये रोचते बुद्ध्या एतेषां मंत्रिणां तथा ॥ राममार्यास्सता साध्वी रामायस्त्र प्रतिदीयतां
विनाशयेण नाविनोक्तं पूर्वमेव महात्मना ॥ ततस्तु च वशोपस्य तस्य साहाय्यं करिष्यति ॥ रत्नानि विविधरत्नानि प्रेषयामर
भूतमे ॥ सीतां विवमहाश्वान्तु सुवर्णं वाहनानि च ॥ मणिमुक्ताप्रवालं च तथा रजतमेव च ॥ माल्यवान् गृह्य सर्वं
उपपाकृश्चताधिवच ॥ अतिकायं तथा नार्यं कार्याकार्यविशारदः ॥ विभीषणो गतः पूर्वामेनि स्तत्र गाते धेन्वं ॥ संधिं
करिष्यते व्यक्तं राघवं प्रणिपत्य हि ॥ संमान्य मैथिलीं नास्मै प्रदास्यति विभीषणः ॥ माल्यवांश्च महाकायो राक्ष
सानां हितेरतः ॥ राघवं याव्य शिरसा संधिं कुर्वन्तु रावणः ॥ सांत्वं मौदं तथा दानं राज्ञो रामे तत्र यं स्मृतं ॥ कनिष्ठं सवैतो
युद्धपुत्रश्चाष्ट वर्षं तथा ॥ संशयं वाम नागत्वा किं जितेन करिष्यति ॥ नं च लात्सुधिसिद्धिश्च हन्यते हन्यसे पि वा ॥ तस्मा
द्ध युद्धं नरोनेन संधिं कुरु दशानन ॥ प्रणिपत्य महाबाहो राघवं प्रतिनंदनं ॥ प्रदीयतामस्म सा सीता सुसंधिस्ते ०
नरोवर्ता ॥ सांप्रतं संशयो राजन् पुरस्यांतः पुरस्य च ॥ आत्मनो राक्षसश्रेष्ठ वर्त्तते नात्र संशयः ॥ तस्माद्राजन्
प्रवासप्य पुरस्य च कुलस्य च ॥ रक्षणीयश्च यत्नाम सर्वमात्मन्यधिष्ठितं ॥ कुंभकर्णस्तदा रामः सत्यवादी नव ×कू७
सलः ॥ धर्मनित्यो महासत्त्वः शरणागतवत्सलः ॥ कुरु तेन यतः संधिं रामे दशरथात्मजे ॥ लक्ष्मणे च महाबा
हौ नियंत्राष्ट हितेरते ॥ प्रहस्तेन कृतं किं च युध्यता राक्षसान्बले ॥ धूम्राक्षेण च राजेंद्र निर्यं समरदुर्ग क्षिप्ता ॥ म
महाकायेन च तथातिकायेन राक्षसाः ॥ अकंपनेन वीरेण युध्यता राक्षसेश्वर ॥ तथान्ये बलिनि श्चैव किंक
र्तं वानरे बले ॥ निहता दूषणः कश्चित् बलोद्दे रोपि रावणः ॥ येषां वायाद्विमेतानः कुबेर वरुणा नपि ॥ यमो वै
तस्खतो येषां तथान्ये देवदानवाः ॥ येषां नास्ति समो वार्यो स्तेहता वानरैर्युधि ॥ न वापि वानराः क्रुद्धाः हृष्टं पादप
योधिनः ॥ रक्षमाणोऽत्र रामेण सुग्रीवेण च पालिताः ॥ तत्र मे रोचते संधिं सह रामेण रावण ॥ योग्यश्च राघवो मि
त्र

कांचनवर्मयानि विविधानि उपकरणानि यस्य ॥ =नंदकुमार्ति ।२ =अश्विनीकुमारकेता ।७

हर्यंकोवन वित्रमौडंश्चारूढ्यसंख्यायधन प्रकाशं । आसंससुधयम्यमरीविनर्द्धं देवांतकाख्योशनितुल्यवेगः ॥ याश्चैष म्र
र्तनिशितं प्रगृह्य विधुन्वमर्मकांचनवज्रसारं । गजेंद्रमास्काय शशिप्रकाशं आयाति योसौ त्रिशिरा तरस्वी ॥ आसोनजल
कलिनः मृतनिकाशरूपः कुंभः पृथुव्यूढसुजातवक्षाः । समाहितः पन्नगराजकेतुः विस्फारयन्भाति धनुर्धनुष्मान् ॥ याश्चैक तरुक
आंकनदवज्राग्रजुष्टं दीप्तं वक्षुमरं परिघं प्रगृह्य । आयाति रक्षोबलकेतुभूतो योसौ निकुंभोद्भुत घोरकर्मा ॥ याश्चैषचापासि नागस्त्रः
शरौघजुष्टं पताकिनं पावकदीप्तरूपं । रथं समास्थाय विभात्युदग्रो नारांतकोसौ नगशृंगयोधी ॥ याश्चैष कालानलदी
व्याघ्रादि प्तरूपः खड्गी धनुष्मान्कवची किरीटी । गजेंद्रमास्थाय गिरिप्रकाशं खरस्वरो यं मकराक्षनामा ॥ याश्चैष नानाविध घो
मुखयु ररूपे र्व्याघ्रोष्ट्रनागेंद्रमृगाश्ववक्त्रैः । भूतैर्वृतो भाति विवृत्तनेत्रैः । योसौ सुराणामपि दर्पहंता ॥ यत्रैतदिंदुप्रतिमं विभा
क्तैः ति ॥ छत्रं सितं सूक्ष्मशिलाकमग्र्यं अत्रैष रक्षोधिपतिर्महात्मा भूतैर्वृतो रुद्र इवावभाति ॥ योसौ किरीटी चलकुंडला
स्यो महेंद्रविंध्योपमभीमकायः । महेंद्रवैवस्वतदर्पहंता रक्षोधिपः सोयमुपैति रुष्टः ॥ नित्येष एव न रक्षसेंद्र
सोत्रतिभाषितं । प्रत्युवाच ततो रामो विभीषणमरिंदमः ॥ अहो दीप्तो महातेजा रावणो लोकरावणः ॥ आदित्य इव दुःप्रेक्षो
राक्षसो भाति रश्मिभिः ॥ सुव्यक्तं लक्षयते नास्य रूपं तेजःसमन्वितं । देवदानववीराणां वपुरेवं विधं कृतं ॥ यादृशं राक्षसें
द्रस्य वपुरेतद्विराजते ॥ तथैवास्यानुगास्तुल्याः पुत्रापौत्रास्तथानुजाः । सर्वे पर्वतसंकाशाः सर्वे पर्वतयोधिनः ॥ सर्वे
दीप्तायुधधरा योधा अस्य महौजसः ॥ भाति राक्षसराजोसौ प्रदीप्तैर्भीमविक्रमैः ॥ भूतैः परिवृतस्तीक्ष्णैर्देहवद्भि
रिवांतकः ॥ एवमुक्त्वा ततो रामो धनुरादाय वीर्यवान् । लक्ष्मणानुचरस्तस्थौ समुद्धृतशरासनः ॥ ततः स रक्षोधिपति
र्महात्मा रक्षांसि तान्याह महाबलानि । द्वारेषु चर्यागृहगोपुरेषु सुनिर्वृतास्तिष्ठत निर्विशंकाः ॥ स एवमुक्त्वा त्रिदिशें ४०॥
द्रशत्रुरुग्र्यप्यनापं सरारं प्रदीप्तं । विदारयन्वानरसागरौघं महाझषः पूर्णमिवार्णवौघं ॥ तमापतंतं सहसानि
रीक्ष्य दीप्तेषुचापं युधि राक्षसेंद्रं । ततो हरीशः सहसाजगाम तं रावणं योद्धुमतिप्रचंडः ॥ बलात्समुद्धृत्य महा

तोवाक्यं राक्षसानिदमब्रवीत्। कल्प तामेरथः शार्ङ्गं क्षिप्रमानाय तांतिकं। अथक्रोधविमोक्षामिनिःश्वस्य दृढयेश
र्य। देवासुरे यथापूर्वं रुद्रेणानिहतांधकं। चिरकालेसितंयुद्धं एतन्मेराघवेण ह। अथदृष्णीशय्यावाणानिकु
काइवपन्नगाः। रामंसमत्रिधार्वंतु निषाग्निप्रतिमाःशिता। सुतेजसेरुक्मपुंखे स्वस्तेजाधीति हिरण्मयैः। रा
रिरापदपयाम्येनमुक्तानिरि वक्रंजरं। वानमूरान्सुबहून्दृष्ट्वा राघवाज्ञात्र चोदितान्। सरामानुजवि
क्रांतान्तेनसार्धंस्नुपागतान्। इत्यार्षे रावणवाक्यं नाम॥ ॥स एवमुक्त्वा तु विमानरूपं रथंतुरंगैर्बहुनि
स्तुयुक्तं। प्रकाशमानंवपुषापरेण समारुरोहामरराजशत्रुः॥ सशंखभेरीपटहप्रणादैराक्ष्वेडितास्फो।
टितसिंहनादैः। प्राण्यैस्सर्वैश्राप्यनिप्रयुज्यमानस्तदाययौ राक्षसराजमुख्यः। सशैलजीमूतविकाशरूपैः
महास्वनैःपावकदीप्तनेत्रैः। बालैर्वृतोराक्षसयोधवीरैर्गतैर्दृष्टैरुरुद्र इवामरेशः॥ ततोनगर्याःसहसाम
स्तेजानिःक्रम्य तद्वानरसैन्यमुग्रं। महार्णवाभं स्तिमितं ददर्श समुद्यतं पा[illegible]शैलहस्तं। ततोक्षसानीकमतिप्र
वृद्धं आलोक्य रामो भुजगाम बाहुः। बिभीषणंशास्त्रभृतांवरिष्ठं ज्वाना[illegible]लाग्रगत स्वरस्वा॥ नानापताकाध्वजशस्त्र
जुष्टं प्रासासिशूलाशनिचक्रहस्तं। कस्येदमक्षोभ्यमनीत सैन्यं नागेंद्रराजोपमनागजुष्टं॥ ततःसरामस्य वचो निश
म्य विभीषणःशुक्रसमानबुद्धिः। शशंसरामाय बलप्रवेगान् महात्मनांराक्षसपुंगवानां॥ योसौगजस्कंधगतोमहा
मानवोदितार्कोपमताम्रवक्त्रः। सकंपयन्नागशिरोभ्युपैति राजन्नवेह्येतमकंपनाख्यं॥ योसौरथस्थोमृगराज
राजकेतुर्धुन्वन्धनुःशक्रधनुःप्रकाशं। करैरिवाभाति विवस्वान्[illegible] इंद्रजित्राक्षसराजपुत्रः। यश्चैषविन्ध्यास्तर
वेंद्रकल्पोधन्वीरथस्थोतिरथोतिवीरः। विस्फारयन्चापमतुल्यमानं नाम्नातिकायोतिविवृद्धकायः॥ योसौ
नवार्कोपमताम्रचक्षुरारुह्यघंटानिनदप्रणादं। खरखरंगर्जतिवै महात्मा महोदरोनामसएषवीरः। योसौ

रथं तस्य समासाद्य तोद्यम्या क्षिप्य सारथेः। त्रासयन् रावणं धीमान् हनुमान् वाक्यमब्रवीत्॥ देवदानवगन्धर्वा यक्षाश्च
सह पन्नगैः। अवध्यश्चात्र यामग्ना वानरेभ्यस्तु ते भयं॥ तद्वद्देवाः पर्यर्पञ्च यद्वाउरगराक्षसाः। वांमन्न मघपञ्च
वानरेभ्यो भीमविक्रमः। एष मे दक्षिणो बाहुः पञ्चशाखः समुद्यतः। निरसिष्यति ते देहाद्भूतात्मानं चिरोषितं॥ क्षि
प्रं प्रहर निःशंकः स्थिरां कीर्तिमवाप्नुहि। विक्रमं च विदित्वा ते नाशयिष्यामि [illegible]॥ रावणस्य वचः श्रुत्वा वायुसू
नुरभाषत। प्रहृतं मे मया पूर्वमक्षं स्मर्तव्य तत्सुतं। एवमुक्तो महातेजा रावणो राक्षसाधिपः। आजघानानिलसुतं
तलेनोरसि वीर्यवान्॥ स तथाभिहतस्तेन मुहूर्तं व्यचलत्कपिः। आजघानाभिसंक्रुद्धस्तलेनैवामरद्विषं॥ तथा
स तेनाभिहतो वानरेण तरस्विना। दशग्रीवः समुद्धूतो यथा भूमितले बलः। संग्रामे तं तथा दृष्ट्वा रावणं तलताडि
तं। ऋषयश्चारणाः सिद्धा नेदुर्देवाश्च सासुराः॥ अथाश्वस्य महातेजा रावणो वाक्यमब्रवीत्। साधु वानर वीर्येण श्लाघ
नीयोसि मे रिपुः॥ रावणेनैवमुक्तस्तु हनुमान् वाक्यमब्रवीत्। धिगस्तु मम वीर्यस्य यत्त्वं जीवसि राक्षस। सकृत्तु प्रह
रेदानीं दुर्बुद्धे किं विकत्थया। ततस्त्वां मामको मुष्टिर्नयिता यमसादनं। एवमुक्तस्तु संक्रोधो रावणः स महाबलः। ते
न वानरवाक्येन कोपस्तस्य महानभूत्। स क्रोधाग्निपरीतात्मा त्ररुक्षाल सराधवद्यथा। संरक्तनयनश्चापि समुष्टिमक
रात्तदा। समुष्टिं पातयामास वज्रकल्पं महायशाः। हनुमदुरसि व्यूढे स चचाल महाकपिः। विह्वलं तं समर्तं दृष्ट्वा हनुमं
तं महाबलं। रथेनातिरथः क्षिप्रं नीलं प्रतिसमाद्रवत्। सोन्तकप्रतिमैर्बाणैः परमर्मातिभेदिभिः। क्षिप्रमाप्लरयामा
प्लरयामास नीलं हरिचमूपतिं। स शरौघसमायस्तो नीलः परमदारुणः। गिरिं मलयशैलाग्रं रक्षोधिपतयेऽसृ ४१
जत्॥ हनुमानपि तेजस्वी समाश्वस्तो महाबलः। नीलेन सह संसक्तं रावणं वीक्ष्य वीर्यवान्। स रावणवधार्थं च चक्रा
र सुमतिं तदा। संवीक्ष्यमाणो युद्धेप्सुः सरोषः समभित्वरत्। नीलेन सह संसक्तो रावणो राक्षसाधिपः। न योग्यं

धराग्रं कुंभावरक्षोधिपतिं हरीशाः॥ ताः किल वृक्षशृंगं बहु वृक्षसानुं प्रगृह्य विक्षेपसरावणाय॥ तमापतंतं प्रसमीक्ष्य राज
बिभेद बाणैर्यमदंडकल्पैः॥ तस्मिन् प्रवृक्षो तमवृक्षखंडे शिलेविकीर्णे सुविचित्रसानौ॥ महाहि कल्पं शरमुग्रध
न्या समाससाद त्वराक्षस दृप्यपेंद्रः॥ स तं गृहीत्वानिलतुल्यवेगं स विस्फुलिंगं ज्वलनप्रकाशं॥ विक्षेप राजा हरिकृथपाय
ससायकेरावणबाहुमुक्तः। शक्राशनिःस्वयवपुः शिताग्र॥ सुग्रीवमासाद्य बिभेद वेगात्। गुहेरिताः क्रौंचमिवोग्र
शक्तिः॥ स सायकार्त्तो विपरीतचेता कूजन् व्यथार्त्तो निपपात भूमौ॥ तं वीक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टायुधिया
तुधानाः॥ ततो गवाक्षो गवयः सदंष्ट्रो मैंदो गजो ज्योतिर्मुखो नलश्च॥ शिलाः समुत्पाट्य विवृद्धकायाः। समाससदन्ते किल
राक्षसेंद्रं॥ तेषां प्रहारान् स चकार मोघान् रक्षोधिपो बाणगणैः शिताग्रैः॥ तान् वानरेंद्रानपि बाणजालैः बिभे
द घोरैर्जनदचित्रपुंखैः॥ ते वानरेंद्रास्त्रिदशारिबाणैर्भिन्ना निपेतुर्भुवि भिन्नरूपाः॥ ततस्तु तद्वानरसैन्यमुग्रं प्र
च्छादयामास स बाणजालैः॥ ५०० ते वध्यमानाः पतिताग्र्यवीरा नानद्यमानाः भयशल्यविद्धाः॥ शाखामृगा रावणसा
यकार्त्ता जग्मुः शरण्यं शरणं च रामं॥ ततो महात्मा सधनुर्धनुष्मान् आदाय रामः सहसा जगाम॥ तं लक्ष्मणः प्रां
जलिरभ्युपेत्य उवाच वाक्यं परमार्थयुक्तं॥ कामार्यसुपर्याप्तो वधायास्य दुरात्मनः॥ हनिष्याम्यहमद्यैव अनु
जानीहि मां विभो॥ ततोब्रवीन्महातेजा रामः सत्यपराक्रमः॥ गच्छ वत्स वनं वेदं निबोध मम लक्ष्मण॥ रावणो हि म
हाबाहुर्बहुमायो महाधनुः॥ त्रैलोक्येनापि संक्रुद्धो दुःप्रधृष्यो न संशयः॥ तच्छिद्राणि मार्गस्व स्वछिद्राणे निरक्ष्य न॥
चक्षुषा धनुषा चैव रक्षात्मानं समाहितः॥ राघवस्य वचः श्रुत्वा संपरिष्वज्य पाडितं॥ अभिवाद्य ततो रामं ययौ सौमि
त्रिराहवं॥ स रावणं वारणहस्तबाहुर्ददर्श दीप्तोद्यतभीमबाणं॥ प्रच्छादयंतं शरवृष्टिजाले स्तान् वानरान् बा
णनिकीर्णदेहान्॥ तं आलोक्य महातेजा हनुमान् मारुतात्मजः॥ निवारयन् शरजालानि अभ्ययुध्वत्रावणं॥

ऊं२ किं स्तुतिं करोषि सि

मक्क

विपरीतबुद्धे। अस्मिन् क्षणे यास्यसि जीवलोकं संसाध्यमानो मम बाणजालैः। तमाह सौमित्रिरविस्मयेन गर्जंतमुग्रं
शरचापपाणिं। राजन् न गर्जंति ।।। महाप्रभावाः किं कत्थसे श्रीकृतवत्रमघ जानामि वीर्यं तव राक्षसेंद्र बलं प्रतापं
च पराक्रमं च।। अयं स्थितोहं शरचापपाणिरागच्छ किं मोघविकत्थनेन।। स एवमुक्तः कुपितः ससर्ज रक्षोधिपः स
प्तशरान् सपुंखान्। तान् लक्ष्मणः कांचनचित्रपुंखैश्चिच्छेद बाणैर्निशितैः सुपत्रैः।। तानु प्रचिंत्य बाणान् सहसानि
कृत्तान् निकृत्तभोगानिव पन्नगेंद्रान्। नव वर्षबाणान् वलिताग्रमौलि महेंद्रबाणाशनितुल्यवेगान्।। स बाणवर्षं
अप्रेरितं ववर्ष दिव्यं रामानुजे कार्मुकसंप्रयुक्तं। क्षुरार्धचंद्रोत्तमकर्णिभल्लैः शरांश्च चिच्छेद न चुक्षुभे च। स लक्ष्मणश्चा
शु शरान् शिताग्रान् महेंद्रवज्राशनितुल्यवेगान्। संधाय चापे ज्वलनप्रकाशान् ससर्ज रक्षोधिपतेर्वधाय। स तांस्तु
चिच्छेद निशाचरेंद्रश्छित्वा च तान् लक्ष्मणमाजघान। शरेण कालाग्निसमप्रभेण स्वयंभुदत्तेन ललाटमध्ये। स लक्ष्म
णो रावणसायकार्त्तश्चचाल चापं शिथिलं प्रगृह्य। पुनश्च संज्ञां प्रतिलभ्य कृच्छ्रात् चिच्छेद चापं त्रिदशेंद्रशत्रोः।।
तं छिन्नचापं त्रिभिराजघान बाणैस्तथा दाशरथिः शिताग्रैः। स सायकार्त्तो विचचाल राजा कृच्छ्राच्च संज्ञां पुनरास
साद। स छिन्नचापः शरताडितांगः स्वेदार्द्रगात्रो रुधिरावसिक्तः। जग्राह शक्तिं परमां प्रचंडां स्वयंभुदत्तां युधि देवश
त्रुः। स तां सधूमानलसंनिकाशां वित्रासनीं वानरराक्षसानां। चिक्षेप शक्तिं सहसा ज्वलंतीं सौमित्रये राक्षसरा
✻ ष्ट्रनाथः।। प्रदीप्यमानां रघुनंदनस्तामुरस्यथान्यैस्तमनांतरे। विक्षोर विंत्यं स्वं भागं नाम्नानं प्रतिसोस्मरेत्। ततो दान
वदर्पघ्नं सौमित्रिं देवकंटकः। ✗ बाणैरनिलप्रकाशैः तथापि सा तस्य विवेश शक्तिः स्तनांतरे दाशरथेर्विशा
लां।। शक्त्या तया त्रासो मित्रि ताडितस्स स्तनांतरे।। विक्षोर विंत्यं स्वं भागं नामानं प्रतिसोस्मरेत्। ततो दानवदर्पघ्नं
सौमित्रिं देवकंटकः। तं पीडयित्वा बाहुभ्यां अप्रभुर्लंघने भवत्। तं गृहीत्वा च बाहुभ्यां चिंतयामास रावणः। हि ४२
मवान् मंदरो मेरुः कैलाशो वा महागिरिः। शक्यो भुजाभ्यां संवोढुं न त्वयं रघुनंदनः। विक्षोराप्येनं भागस्त्वसमग्रो
=भवता र्य रथ्यात्रिरूढमंगल्ताद्व्युपचक्रमो।२ =वधेऽस्माटनेवा प्रजग्मुः।२ =देहमास्थितः।।

हि मया योद्धुं कृतधर्मविजानता। रावणश्च महातेजा तद्धृङ्गं नवभिः शरैः। आजघान सुतीक्ष्णाग्रैस्तद्विशीर्य पपात ह
विकीर्णं तच्छरैः शृङ्गं दृष्ट्वा हरिचमूपतिः। नीलोऽग्निरिव जज्वाल क्रोधेन परवीरहा॥ सोऽश्वकर्णान्धवानुत्तालान् चूतांश्चा
पि सुपुष्पितान्। अन्यांश्च विविधान्वृक्षान् नीलश्चिक्षेप संयुगे। स तानापततः शीघ्रं शरैश्चिच्छेद रावणः। नीलश्चाभ्यव
र्षद्गात्रे दशग्रीवस्य लाघवं। अभिवृष्टः शरैर्घोरैर्मेघैरिव महाबलः। ह्रस्वं कृत्वा ततो रूपं ध्वजाग्रे स पपात ह। पाव
कात्मजमालोक्य ध्वजाग्रे पर्यवस्थितं। जज्वाल रावणः कोपात् ततो नीलो ननाद च॥ ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे न तं
हरिं। स सौमित्रिस्सुग्रीवो दृष्ट्वा स्मयत राघवः। रावणोऽपि महासत्त्वं कपिलाघवविस्मितः। संभ्रमाविष्टहृदयो न किंचि
दत्रापद्यत। नादं चक्रुः समाविष्टा लब्धलक्षाः प्लवंगमाः। नीलस्य लाघवं संभ्रांतं दृष्ट्वा रावणमाहवे। वानराणां प्रणा
देन संक्रुद्धो रावणस्तदा। अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतं। आग्नेयेनाथ संयुक्तं गृहीत्वा रावणः शरं। ध्वजशी
र्षे स्थितं नीलं उदैक्षत निशाचरः॥ ततोऽब्रवीत् महातेजा रावणो राक्षसाधिपः। कपे लाघवयुक्तोऽसि मायया पर
या युतः। यदि त्वं रक्षसि प्राणान् मायया वानराधिप। तानि तान्यात्मरूपाणि विसृजन्नु बहुशो रणे। वध ध्याय मया क्षि
प्तः सायकोऽस्त्राभिमंत्रितः। जीवितं त्वां हि रक्षंतं जीविताद्भ्रंशयिष्यति॥ एवमुक्त्वा महाबाहुः रावणो राक्षसाधिपः।
संधाय बाणमस्त्रेण चमूपतिमताडयत्। सोऽस्त्रयुक्तेन बाणेन नीलो वक्षसि ताडितः। निर्दह्यमानः सहसा निप
पात महीतले। पितृमाहात्म्यसंयोगात् आत्मनश्चैव तेजसा। जानुभ्यामपतद्भूमौ न च प्राणैर्व्ययुज्यत। विसंज्ञं वान
रं दृष्ट्वा दशग्रीवो रणोत्सुकः। रथेनांबुदघोषेण सौमित्रिं समुपाद्रवत्॥ तमाह सौमित्रिरदीनसत्त्वो विस्फारयंतं ध
नुरप्रमेयं। आगच्छ मां योधय राक्षसेंद्र न वानरांस्त्वं प्रति योद्धुमर्हसि॥ स तस्य वाक्यं प्रतिपूर्णघोषं ज्याशब्दमुग्रं च नि
शम्य राजा। आसाद्य सौमित्रिममित्रसाहं तु कोपत्कोपादपि वेद माकृः। दिष्ट्यासि मे राघव शस्त्रमार्गं प्राप्तोऽन्तिकं वे

।सु१

शारैस्ताड्कैः। अथैन्द्रशत्रुं तरसा जघान बाणेन वज्राशनिसंनिभेन। भुजांतरे व्यूढसुजातरूपे वज्रेण मेरुं भगवानि
वेन्द्रः। यो वज्रपाताशनिसंनिपातैर्न चुक्षुभे नापि चचाल राजा। स रामबाणाभिहतो भृशार्तश्चचाल चापं च मुमोच वीरः।
तं विह्वलन्तं प्रसमीक्ष्य रामः समाददे दीप्तमथार्धचंद्रं। तेनार्कवर्णं सहसा किरीटं चिच्छेद रक्षोधिपतेर्महात्मा। तं नि
र्विषाशीविषसंनिकाशं शान्तार्चिषं सूर्यमिवाप्रकाशं। गतश्रियं कृत्तकिरीटकूटं उवाच रामो युधि राक्षसेन्द्रं॥ कृतं
त्वया कर्म महत्सुभीमं हतप्रवीरश्च कृतस्त्वयाहं। तस्मात्परिश्रांत इव व्यवस्य न त्वां शरैर्मृत्युवशं नयामि। स प्र
मुक्तो हतमानदर्पो निकृत्तचापः स शरः ससूतः। शोकार्दितः कृत्तकिरीटकूटो विवेश लंकां सहसा गतश्रीः। तस्मि
न्प्रविष्टे रजनीचरेंद्रे महाबले दानवदेवशत्रौ। हरीन् विशल्यान् सह लक्ष्मणेन चकार रामः परमाहवाग्रे। त
स्मिन् प्रभग्ने त्रिदशेन्द्रशत्रौ सुरासुरा भूतगणा दिशश्च। ससागराः सर्षिमहोरगाश्च चचाल भू'म्बुचराः सुराश्च
इत्यार्षे श्रीरामायणे युद्धकांडे रावणभंगो नाम॥ स प्रविश्य पुरीं लंकां रामबाणभयार्दितः। विनिश्वसंस्था
राजा बभूव व्यथितेंद्रियः। मातंग इव सिंहेन गरुडेनेव पन्नगः। अभिभूतो भवद्राजा राघवेण महात्मना। ब्रह्मद
ण्डप्रकाशानां विद्युत्सदृशवर्चसां। स्मरन् राघवबाणांस्तान् विव्यथे राक्षसाधिपः। स कांचनमयं दिव्यमाश्रित्य
परमासनं। अवेक्ष्यमाणः सचिवान् रावणो वाक्यमब्रवीत्। सर्वं तत्खलु मे मोघं यत्तप्तं परमं तपः। यदिंद्रेण स
मानोऽहं मानुषेण पराजितः। पुराणं ब्रह्मणा इदं वचस्तन्मामुपस्थितं। मानुषेभ्यो विजानीहि भयमित्येव तत्तथा। देव
दानवगंधर्वैर्यक्षराक्षसपन्नगैः। अवध्यत्वं मया प्राप्तं परिभूतास्तु मानुषाः। यत्रापि हिमवच्छृंगे क्रुद्धो नंदश्च
शापत। तस्यैव तुल्यवदनैरपि रुद्धा हि मे पुरा। तयोर्महात्मनोर्वाक्यं नान्यथा यदि सांप्रतं। सत्यं विभीषणेनोक्तं य
च्चा वाक्यं महात्मना। तदिदं मामनुप्राप्तं विभीषणवचः शुभं। तस्य धर्मार्थयुक्तस्य नान्यथा याति सांप्रतं। मया दर्पेण ब
लोसेकाच्च। अन्यच्चापि निशितं तदा। तद्धन्यथा परिणितं मम दौरात्म्यचेष्टितैः। नातिमोहि दिवस्य पौरुषे नियतात्म ४३
तिः। दैवपौरुषसंयोगात् नित्यं सिद्धिरवाप्यते। सकामं वेतो रक्षंतु नगरीं विसर्म ततः। राक्षसाश्चित्रतिष्ठंतु वप्र
मारुह्य सांप्रतं।

रा२

एतस्मिन्नंतरे क्रुद्धो रावणं पवनात्मजः । आजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना । तेन मुष्टिप्रहारेण रावणो भी-
मविक्रमः । जानुभ्यामपतद्भूमौ चचाल च पपात च ॥ विसंज्ञं रावणं दृष्ट्वा समरे भीमविक्रमं । ऋषयो वानराश्चैव
नेदुर्देवाश्च सासुराः । हनुमानपि तेजस्वी लक्ष्मणं शुभलक्षणं । अनयद्राघवाभ्यासं बाहुभ्यां परिगृह्य वै । वायु x
सूनोः सुहृत्वेन भक्त्या परमया च सः । अकंप्योऽप्यसि शत्रूणां लघुत्वं संनिदर्शयन् । सा समुत्सृज्य तं शक्तिः सौमि-
त्रिं युधि दुर्मदं । रावणस्य रथे तस्मिन् स्वस्थानं प्रत्यपद्यत । रावणोपि महातेजाः प्राप्य संज्ञां महाहवे । आददे नि-
शितान् बाणान् जग्राह च विपुलं धनुः । आश्वस्तश्च विशल्यश्च लक्ष्मणः शत्रुसूदनः । विष्णोर्भागममिंत्यं स्वमात्मा-
नं च वसोस्मरत् । एतस्मिन्नंतरे दृष्ट्वा रावणस्य पराक्रमं । लक्ष्मणं च समाश्वस्तं सैन्यं च मुदितं पुनः । निपातितमहा-
वीरां वानराणां महाचमूं । दृष्ट्वा रामो रणगतं रावणं प्रत्ययाद्युधि । अथैनमुपसंगम्य हनुमान्वाक्यमब्रवीत् ॥ मम
पृष्ठं समारुह्य जहीमं पापराक्षसं ॥ श्रुत्वा हनुमतो वाक्यं युक्तं रामोन्वमन्यत । एवमुक्त्वाथ संक्रुद्धः समारूढः प्लवंगमं
राघवः समरे भर्तुर्हंतुकामो निशाचरं । ऐरावणमिवेंद्रस्तु हनुमंतं समाश्रितः ॥ अथ तं रावणं संख्ये ददर्श मनुजा- ऊ
धिपः । तमालोक्य महातेजाः प्रत्ययाद्रघुनंदनः । विरोचनमिव क्रुद्धो विष्णुरभ्युद्यतायुधः । ज्याशब्दमथ कुर्वन् स वज्र- रामः
निःष्पेषनिःस्वनं । गंभीरोद्ध्यया वाचा राक्षसेंद्रमुवाच ह । तिष्ठ तिष्ठ मम त्वं हि कृत्वा विप्रियमीदृशं । क्व नु राक्षसशार्दूल
गंता मोक्षमवाप्स्यसि । यदींद्रवैवस्वतभास्करान्वा स्वयंभुवैश्वानरशंकरान्वा । गमिष्यसि त्वं दशधा दिशो वा तथापि
मया । मे नाद्य विमोक्ष्यसे मे । यश्चैष शक्त्या निहतस्त्वयाद्य विषादमभ्येत्य सहसाभिपन्नः । स एष रक्षोगणराज मृत्युं तं प्र-
धक्ष्यते वितवसैन्यकर्त्ता ॥ राघवस्य वचः श्रुत्वा राक्षसेंद्रो महाकपिं । आजघान शरैस्तीक्ष्णैः कालवैश्वानरोपमैः ।
राघवं वहतस्तस्य ताडितस्यापि सायकैः । स्वभावतेजोयुक्तस्य भूयस्तेजोऽभ्यवर्धत ॥ ततो रामो महातेजा रावणेन
कृतव्रणं । दृष्ट्वा प्लवगशार्दूलं क्रोधस्य वशमागतः । हनुमानपि तेजस्वी व्यवर्धत महाबलः । विक्षेवेगेन महता शरै-
रग्निशिखोपमैः ॥ तस्यापि संगम्य रथं सचक्रं साश्वध्वजं चापि महापताकं । ससारथिं सोशनिशूलखड्गं रामः प्रचिच्छेद

माल्ययोगैः सुगंधिभिः। धूपं सुगंधं ससृजुः तुष्टुवुश्च परंतपं। कुंभकर्णं महानिद्रं बोधनायोपचक्रमुः॥ जलदा इव ते
नेदुर्यातुधानास्ततस्ततः। बिभिदुश्चास्य गात्राणि निश्वसंतोभिनदंस्तथा। अथ खिन्ना न शेकुस्ते तत्र बोधाय राक्ष-
साः। ततो गुरुतरं यत्नं दारुणं समुपाक्रमन्। शंखान्नापूरयामासुः शशांकसदृशप्रभान्। तुमुलं युगपच्चापि नेदु-
र्भेरीममर्षणाः। नेदुश्चास्फोटयामासुश्चिच्छिदुश्चापि राक्षसाः। कुंभकर्णविबोधार्थं चक्रुश्च विपुलस्वनं। उष्ट्रा-
नुष्ट्रान् खरान्नागानजघ्नुर्दंडकशांकुशैः। भेरीशंखमृदंगांश्च सर्वप्राणैरवादयन्। निजघ्नुश्चास्य गा-
त्राणि महाकाष्ठकटंकरैः। मुद्गरैर्मुशलैश्चैव सर्वप्राणसमुद्यतैः॥ तं शंखभेरीपटहप्रणादमाक्ष्वेडि-
तास्फोटितसिंहनादं। दिशो द्रवंतस्त्रिदिवं क्रमंतः॥ श्रुत्वा विहंगाः सहसा निपेतुः॥ यदा तु तैः संनिनदैर्महा-
त्मा न कुंभकर्णो बुबुधे प्रसुप्तः। ततो मुसंडीमुशलानि विवरक्षोगणास्ते जगृहुर्गदाश्च॥ तं शैलशृंगैर्मुशलैर्गदाभि-
र्वृक्षैस्तले मुद्गरमुष्टिभिश्च॥ सुखप्रसुप्तं भुवि कुंभकर्णं रक्षांस्युदग्राणि तदा निजघ्नुः। तेन राक्षसेन महता
लंकासमभिपूरिता। सपर्वतवना सर्वा स तु नैव प्रबुध्यत॥ ततो सहस्रं भेरीणां युगपत्समहन्यत। मृष्टकांचन-
=२१.५ कोणानां असक्तानां समंततः॥ एवमप्यतिनिद्रस्तु यदा नैव व्यबुध्यत। शापवश्यतया सुप्तः ततः क्रुद्धा निशाचराः।
ते क्रोधसमाविष्टाः सर्वे भीमपराक्रमाः। तद्रक्षो बोधयिष्यंतश्चक्रुरन्ये पराक्रमं। अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महा-
स्वनान्। केशानप्यारुरुजुश्चान्ये कर्णावन्ये दशंति च। अन्ये तु बलिनस्तस्य कूटमुद्गरपाणयः। मूर्ध्नि वक्षसि गात्रे-
षु निर्दयं समताडयन्। मृदंगपटहान्भेरीः शंखान्कुंभमुखांस्तथा। दशराक्षससाहस्राऽजघ्नुर्भीमपराक्रमाः॥ ४४
राक्षसानां सहस्रं हि शरीरेस्य प्रधावति। कुंभकर्णस्तथा सुप्तो नैव सप्रत्यबुध्यत। रज्जुजालाविनद्धानि घंटानामि

सत्वाः प्रतिमदृप्तौ च देवदानवदर्पहा। ब्रह्मशापाभिभूतश्च कुंभकर्णो विबोध्यतां। समरे जितमात्मानं प्रहस्तं च हतं
रणे। ज्ञात्वा रक्षोबलं भीमं आदिदेश महाबलः। द्वारेषु यत्नः क्रियतां प्राकारश्चाधिरुह्यतां। निद्रावशसमाविष्टः कुंभ
कर्णो विबोध्यतां। स हि संख्ये महाबाहुः ककुदं सर्वरक्षसां। वानरान् राजपुत्रौ च क्षिप्रमेव वधिष्यति। रामबाणाभिरस्ता
नां संक्रमेऽस्मिन् सुदारुणे। निधमिष्यति नः क्षिप्रं कुंभकर्णो महद्भये। नव षट् दश चाष्टौ च मासान् हि स्वपिति राक्षसः
तं विबोधयत क्षिप्रं कुंभकर्णं महाबलं। कुंभकर्णः सदा शेते मूढो ग्राम्यसुखे रतः। किं करिष्याम्यहं तेन शक्रतुल्य
बलेन हि। ईदृशे संभ्रमे घोरे येन साह्याय कल्पते। ते तु तद्वचनं श्रुत्वा राक्षसेंद्रस्य राक्षसाः। जग्मुः परमसंभ्रान्ताः
कुंभकर्णनिवेशनं। ते तथा तु समादिष्टा राक्षसा भीमविक्रमाः। गंधान् माल्यं तथा पानं भक्ष्यं चादाय सत्वराः। आसाद्य
भवनं तस्य विविशुस्तेन पाज्ञया। तत्र विस्तमहाद्वारं सर्वतो योजनायतं। कुंभकर्णगृहं पुण्यं पुष्पगंधशुभं शुचि।
विबोधयिषवः सर्वे तस्मिंस्तस्य महागृहे। तस्य निश्वासपवातेन कुंभकर्णस्य रक्षसः। राक्षसा बलवंतोपि स्था
तुं नाशक्नुवंस्तदा। कुंभकर्णस्य निश्वासैरपकृष्टा महाबलाः। यतमानाः सुकृच्छ्रेण ततः प्रविविशुर्गृहं। संप्रविश्य
तदा रम्यं गृहं कांचनकुट्टिमं। ददृशुर्नैर्ऋतव्याघ्रं शयानं भीमविक्रमं। ऊर्ध्वरोमांचिततनुं श्वसंतमिव पन्नगं। वि
त्रासयंतं निश्वासैः शयानं पिशिताशनं। भीमप्राणबलं भीमं पातालविपुलाननं॥ ते तु तं विकृतं सुप्तं विकीर्णमिव
पर्वतं। कुंभकर्णं महानिद्रं प्रसुप्तं बोधयिषवः॥ ततः परिष्कृतास्ते तु राक्षसा भीमविक्रमाः। नीलांजनचयाकाराः
कुंभकर्णसमापगाः॥ ततो पटुकः क्षिप्रं ते कुंभकर्णस्याग्रतः स्थले। भक्ष्याणां मेरुसंकाशं राशिं परमतर्पणं। मृगा
णां महिषाणां च वराहाणां च संचयान्। चक्रुर्नैर्ऋतशार्दूला राशिमन्नस्य चाद्भुतं। ततः शोणितकुंभांश्च मद्यानि वि
विधानि च। पुरस्तात् कुंभकर्णस्य चक्रुस्त्रिदशशत्रवः। लिलिपुश्च परार्ध्येन चंदनेन सुगंधिना। वस्त्रैश्चाच्छादयामासु

=ज्ञा१ =श्रींदकद

ततो व्यागम्य ते सर्वे पुनरागम्य राक्षसाः ॥ कुंभकर्णमिदं वाक्यमूचुः रावणनोदिताः । द्रष्टुमिच्छति ते राजा सर्वराक्षसपुं
गवः । गमने क्रियतां बुद्धिर्भ्रातरं संप्रहर्षय ॥ कुंभकर्णस्तु दुर्द्धर्षो भ्रातुराज्ञाय शासनं । तथेत्युक्त्वा महावीर्यः शय
नादुत्पपात ह ॥ प्रक्षाल्य वदनं हृष्टः स्नातः परमभूषणः । पिपासुस्त्वरयामास पानं मदसमीरणं । ततस्ते त्वरितास्त
स्य राक्षसा रावणाज्ञया । मद्यं भक्ष्यांश्च विविधान् क्षिप्रमेवानयंस्तदा । महिषाणां वराहाणां मांसं मद्यं च संस्कृतं । प्र
हर्षणार्थं मनसा व्यात्तास्यो दीप्तलोचनः । आददे क्षुधितो मांसं शोणितं तृषितोऽपिबत् । मेदःकुंभांश्च मद्यस्य पपौ शक्रारि
पुस्तदा ॥ भुक्त्वा वान्यत्तु बहुविधं किंचिन्निर्हृष्टमना ह्यभूत् । पानाद्यघटसहस्रं तु तथा भुक्त्वा च भोजनं । स संकुंभान् संजर
=श्या १ घ्नान् महिषान् शल्यपावरान् । अष्टौ पशुशतान्येव पुरुषानेकविंशतिं । एतत्संभक्ष्य सुमहत् दावाग्निरिव तत्क्षणं । कुं =३६
=ह्रु ८ भकर्णो महारक्षो गमनायोपचक्रमे । स रोषश्चाक्रूररोमांश्च तेजोबलसमन्वितः ॥ ततः स्वकर्मनिद्रां वा समायुक्ते निशा
चराः । शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् । स सर्वान् सांत्वयामास नैर्ऋतान् नैर्ऋतर्षभः । बोधनात् विस्मितश्चा
पि राक्षसानिदमब्रवीत् । किमर्थमिह वा गम्य भवद्भिः प्रतिबोधितः । कच्चित्कुशलं राज्ञो भयं वा नेह किंचन । कच्चि
द्राक्षसराजस्य न खल्वप्रियमागतं । नह्यल्पकारणे सुप्तं बोधयिष्यंति मामिह ॥ तदाख्याताघतत्त्वेन मत्प्रबोधे हि
कारणं । अथवा ध्रुवमन्येभ्यो भयं परमदारुणं । यदर्थं त्वरितः सर्वैर्भवद्भिः प्रतिबोधितः । अद्य राक्षसराजस्य भय
मुत्पादयाम्यहं । शातयिष्ये महेंद्रं वा मर्दयिष्यामि वानलं ॥ एवं ब्रुवाणं संक्रुद्धं कुंभकर्णमरिंदमं । यूपाक्षः सचिवो
राज्ञः कृतांजलिरुवाच ह ॥ नाद्य देवकृतं किंचित् भयमस्ति निशाचर । गंधर्वदानवेभ्यो वा कुतः पन्नगभोगिनां ॥ ८५
यादृशं मानुषाद्राज्ञो भयं घोरमुपस्थितं । वानरैः पर्वताकारैर्लंकासं परिवारिता । सीताहरणदुःखार्तात् रामात्
नः परमं भयं । एकेन वानरेणेयं पूर्वं दग्धा महापुरी । अक्षः कुमारो निहतो मंत्रिपुत्राः सकिंकराः । स्वयमिच्छति
वोद्धुं पौलस्त्यं देवकंटकं । मृतकल्पो रणान्मुक्तो

=न्र२ म१

श्च सर्वशः। बोध्यमानो महाकायो न प्रायुध्यत राक्षसः। ततो गजसहस्रं हि शरीरे स्य प्रधावति। मर्द्यमानोपि न तथा प्र
बुध्यत स राक्षसः। ते राक्षसास्ततः खिन्नाश्चक्रुरन्यं पराक्रमं। प्रमदाश्चाक्रयामासुः स्तुभ्रू मणिकुंडलाः। नाग
राक्षसकन्याश्च तथा गंधर्वयोषितः। मनुजानां दुहितरः किंनराणां तथैव च। प्रविष्टा भवनं रम्यं तस्य कांचनकुट्टिमं।
ताश्च विस्रस्तजघनाः सर्वाः पीनपयोधराः। स्त्रियो हि गीतवादित्रैः कुंभकर्णाग्रतः स्थिताः। दिव्यादिव्यैरलंकारैर्दि
व्यधूपेन धूपिताः। दिव्यगंधाः सुगंधाश्च क्रीडयोन्नवनोत्तमे। ताश्च सर्वा विशालाक्ष्यः सर्वाः कांचनसुप्रभाः। सर्वा रूप
गुणोपेताः सर्वाभरणभूषिताः। सर्वा विस्रस्तजघनाः सर्वाः पीनपयोधराः। सर्वाः कमलपत्राक्षो नालकंचित
मूर्द्धजाः। तासां नूपुरशब्देन मेखलानां स्वनेन च। गीतवादित्रशब्देन स्वरेण मधुरेण च। दिव्येनैव च गंधेन स्पर्शे
न विविधेन च। विबुद्धः कुंभकर्णो वै त्रासादो भीमदर्शनः। सहन्यमानो गिरिवद्धशृंगेरविंतयंस्त्रांउमल =स्तु२
प्रहारान्। निद्राक्षयात्कोपनिपीडितश्च विजृंभमाणः सहसोत्पपात। महाभुजो वासुकितक्षकाभो निक्षिप
वाहो गिरिशृंगसारो। विवृत्य वक्त्रं वडवामुखाभं निशाचरेशो विकृतं जजृंभे। विजृंभमाणोतिबलः प्रबुद्ध
तराक्षसः। निश्वासश्चास्य संजज्ञे। संवर्तकस्वानलः। तस्य तज्जृंभमाणस्य वक्त्रं पातालसंन्निभं। ददृशे मेरुशि
खरे दिवाकर इवोदितः। दीप्तताम्रास्यजिह्वस्य निघ्नत्सदृशपद्मणा। भीमे ददृशतुर्नेत्रे दीप्ताविव महा
ग्रहौ॥ रूपमुत्थितस्तस्य कुंभकर्णस्य संबभौ। तापांते सबलाकस्य मेघस्येव विवर्द्धतः॥ तद्विनिर्जंततो रक्षः कषायी
कृतलोचनं। विहरन् सर्वतो दृष्टिं तानुवाच निशाचरान्। किं निमित्तमहं सुप्तो भवद्भिः प्रतिबोधितः॥ ते तमुक्ताप्पभीमाभी
कं। भीममनिन्द्यपराक्रमं। राक्षसास्त्वरिता जग्मुः दशग्रीवं निवेदितुं। ते निगम्य दशग्रीवं भाषानं परमासने। कृत्वा बद्धांजलि
पुटाः सर्व एव निशाचराः। प्रबुद्धः कुंभकर्णोसो भ्राता ते राक्षसेश्वर॥ किं तेन वाथ निर्यातु द्रक्ष्यसेनमिहागतं। रा
वणस्त्वब्रवीद् हृष्टो राक्षसान् राक्षसेश्वरः। द्रष्टुमेनमिहेच्छामि यथा न्यायं तमर्चितं॥

द एवमुक्तस्तु वचनं॥ स दृष्टो राजपुत्रेण रामेणाक्लिष्टकर्म्मणा॥ विभीषणो महाप्राज्ञः काकुत्स्थमिदमब्रवीत्॥ येन वैव
स्वतो युद्धे वासवश्च पराजितः। एष विश्रवसः पुत्रः कुंभकर्णो निशाचरः। एतेन देवा युधि दानवाश्च यक्षा भुजंगाः पिशि
ताशनाश्च। गंधर्वविद्याधरगुह्यकाश्च सहस्रशो राघव संयुगस्थाः॥ शूलपाणिनमायांतं कुंभकर्णं महाबलं। हंतुं न शे
कुस्त्रिदशाः कालोयमिति मोहिताः॥ प्रकृत्या एष तेजस्वी कुंभकर्णस्सुदुर्जयः॥ अन्येषां राक्षसेंद्राणां वरदानकृतं
बलं। एतेन जातमात्रेण क्षुधितेन महात्मना। भक्षितास्सरसः सत्त्व महेंद्रानुचरा दश। ऋषीणां च सहस्राणि रक्षसा
नेन राघव। भक्षितानि सहस्राणि सत्वानि सुमहांत्यपि। तास्वद्य भक्ष्यमाणासु प्रजा भयनिपीडिताः। यांति स्म शरणं श
क्रं तं चाप्यर्थं न्यवेदयन्॥ स कुंभकर्णं कुपितो महात्मा जघान वज्रेण शितेन शक्रः। स शक्रवज्राभिहतो महात्मा च
चाल कोपाच्च भृशं ननाद। तस्य नानद्यमानस्य कुंभकर्णस्य राक्षसः। श्रुत्वा प्रणादं वित्रस्ताः प्रजा भूयो वितत्रसुः।
ततः कोपान्महेंद्रस्य कुंभकर्णो महाबलः। विकृष्यैरावताद्दंतं जघानोरसि वासवं। कुंभकर्णप्रहारार्त्तः सोव्य वा।
थितवासवः॥ ततो निषेदुः सहसा देवगंधर्वराक्षसाः। प्रजाभिः सह शक्रस्तु ययौ स्थानं स्वयंभुवः। कुंभकर्ण
स्य दौरात्म्यं शशंसाथ प्रजापतेः। प्रजानां भक्षणं चापि देवानामपि धर्षणं। आश्रमध्वंसनं चापि परस्त्रीहरणानि च।
एवं प्रजा यदि त्वेष भक्षयिष्यति राक्षसः। अचिरेणैव कालेन शून्या भूमिर्भविष्यति॥ वासवस्य वचः श्रुत्वा सर्वलोक
पितामहः। रक्षः समाह्वयामास कुंभकर्णं ददर्श च। कुंभकर्णं समीक्ष्यैव विस्मितोभूत्प्रजापतिः। तत एनं महावीर्यं
स्वयंभूरिदमब्रवीत्। ध्रुवं लोकविनाशाय पौलस्त्येनासि निर्मितः। यस्मात्त्वमीदृशः क्रूरो लोकं हिंसितुमुद्यतः। त
स्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसि। ब्रह्मशापाभिभूतश्च निपपात स राक्षसः। पुरा हि रत्नवान्नंदिगोक ४६
र्णस्स्म तपोवने। भ्रातरं पतितं दृष्ट्वा निद्रया समभिप्लुतं। ततः परमसंभ्रांतो रावणो वाक्यमब्रवीत्। उप्तोयं काननं
=पितृत्वं र रक्षःफलकाले न पात्यते। न नप्तारं स्वयं न्याय्यं शप्तुमेवं प्रजापते। नायं स्व वचनं मिथ्या स्वपत्येष विनिश्चयः। का
लश्च क्रियतामस्य स्वप्ने जागरणे तथा। रावणस्य वचः श्रुत्वा स्वयंभूरिदमब्रवीत्। शयिता ह्येष षण्मासान् एकाहं जा
ग

रामेणामिततेजसा। यन्न देवैः कृतं पूर्वं न दैत्यैर्न च दानवैः। कृतं तद्धि हि रामेण विमुक्तः प्राणसंशयात्॥ स त्वं पा
कृत्व वत्स वा भ्रातुश्च भयमागतं। कुंभकर्णो विनद्याथो रूपाक्षमिदमब्रवीत्। सर्वमद्येव रूपाक्ष हरिसैन्यं सलक्ष्मणं
राघवं च रणे हत्वा पश्चाद्द्रक्ष्यामि रावणं। राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः। रामलक्ष्मणयोश्चैव स्वयं पास्या
मि शोणितं॥ तस्य तद्वाक्यं गदतो निशम्य सगर्वितं रोषविवृद्धघोरं। महोदरो रावणयोधमुख्यः कृतांजलिर्वाक्यमिदं ब
भाषे। पश्चादपि महाबाहो शत्रून् युधि विजेष्यसे। त्वद्दर्शनपरं तावद्भ्रातरं द्रष्टुमर्हसि॥ महोदरवचः श्रुत्वा राक्षसैः
परिवारितः। कुंभकर्णो महातेजाः संप्रतस्थे महाबलः। उत्क्रान्तो सम्मध्यानां तदा राक्षसपुंगवः। पीत्वा घटसहस्रं स
=छे७ गमनायोपचक्रमे। सो गच्छन् तूर्णं नरश्रेष्ठैर्योगणैः समावृतः। कुंभकर्णः पदन्यासैः कंपयन्निव मेदिनीं। ईषत्कुक
टमतश्च तेजोबलसमन्वितः। कुंभकर्णो बभौ घोरः कालांतकयमोपमः॥ स राजमार्गं वपुषा विदीपयन् सहस्र
रश्मिर्नगवानिवांशुमान्। जगाम नेत्रांजलिमालयावृतः शतक्रतुर्वेश्म न सिवस्वयंभुवः। तमद्रिशृंगप्रतिमं किरीटिनं
स्पृशंतमादित्यमिवात्मतेजसा। वनौकसः प्रेक्ष्य विवृद्धमद्भुतं भयार्दिता दुद्रुविरे समं ततः। केचिच्छरण्यं शरणं स्म =छे१०
रामं व्रजंति केचिद्व्यथिताः पतंति। केचिद्दिशः संव्यथिताः प्रयांति केचिद्भयार्ता भुवि शेरते स्म॥ इत्यार्षे श्रीरामाय
णे युद्धकांडे कुंभकर्णप्रबोधनो नाम सर्गः॥ ७॥ ॥ ततो रामो महातेजा धनुरादाय वीर्यवान्। कुंभकर्णं महाबाहुं कि
ददर्श हि किरीटिनं। तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनं। क्रममाणमिवाकाशं पुरा नारायणं प्रभुं। स्थूलं तत्सम
हारान्तं नीलदंष्ट्रं भयावहं। सतोयांबुदसंकाशं कांचनांगदधारिणं। कुंभकर्णं महाकायं ददर्शातिभयंकरं। यं दृष्ट्वा ×बा४
विद्रुता दिक्षु वानरा लोमहर्षणं महत्। विकृतां वाहिनीं दृष्ट्वा वर्द्धमानं च राक्षसं। युधि विस्मितमिदं रामो विभीषणमुवाच ह॥
कोऽयं पर्वतसंकाशः किरीटी हरिलोचनः। लंकायां दृश्यते वीर सविद्युदिव तोयदः। पृथिव्यां केतुभूतोऽयं महानेकोऽत्र
दृश्यते॥ यं दृष्ट्वा वानराः सर्वे विद्रवंति दिशो दश प्रयातु। आचक्ष्व मे महान् कोऽयं राक्षसो यदि वासुरः। न मायेवं विधं रूपं

भकर्णो महाबलः। संरक्तनयनः कोपात् रावणं वाक्यमब्रवीत्। किमर्थं महमाहृत्य त्वया राजन् प्रबोधितः। शंसक
स्माद्भयं ते च कोऽद्य प्रेतो भविष्यति। यदि दीनो भयं राजन् यदि वापि स्वयं कृतं। यमं हि यमयिष्यामि ग्रसयिष्यामि पा
वकं। आदित्यं पातयिष्यामि सनक्षत्रं महीतले। शतक्रतुं वधिष्यामि पास्यामि वरुणालयं। पर्वतांश्चूर्णयिष्यामि
दारयिष्यामि मेदिनीं। देवान् विद्रावयिष्यामि त्रैलोक्ये पार्थिवोत्तम। दीर्घकालप्रसुप्तस्य कुंभकर्णस्य विक्रमं। अद्य पश्यं
क्षाः परामृष्टः सुस्राव रुधिरं बहु। स संप्राप्य चिरात् संज्ञां ऋषभो वानरर्षभः। महापार्श्वं महाबाहुः तलेनाभिज-
घान ह॥ निपपात महाबाहुर्वानरेंद्रेण सूदितः। विकीर्णनयनो भूमौ विगतासुर्गतायुधः॥ तस्मिन् हते भ्रात-
रि रावणस्य तन्नैर्ऋतः तद्बलमर्णवाभं। त्यक्तायुधं केवलजीवितार्थं दुद्राव भिन्नार्णवसंनिकाशं॥ इति म-
हापार्श्ववधो नाम सर्गः॥ ॥ स्वबलं व्यथितं दृष्ट्वा तस्मिन् संग्राममूर्धनि। भ्रातॄंश्च निहतान् संख्ये शक्रतुल्यपराक्र-
मान्। पितृव्यौ निहतौ चैव समरे च पलायिनौ। महोदरमहापार्श्वौ भ्रातरौ राक्षसर्षभौ। चुकोपाथ महातेजा ब्र-
ह्मदत्तवरो युधि। अतिकायो महावीर्यो देवदानवदर्पहा। स भास्करसहस्रस्य संघात इव राक्षसः। रथं च नो-
दयामास वाक्यं चेदमुवाच ह। निहितानां महात्मानां दग्धस्य नगरस्य च। संभ्रमो वैह मघा क्रहत्वातौ रामल-
क्ष्मणौ। रघुवंशं हनिष्यामि मे ष्विलीफलपुष्पदं। अशास्वायस्य सुग्रीवः सर्वे न हरियूथपाः। कर्मणा स्यकि- ६०
तो मूलं आ तरौ रामलक्ष्मणौ। मूले हते हतं सर्वं तो हनिष्यामि संयुगे। स दिशो दश बाणौघै रथेनानिरथी-

वक्षस्य२ माडूं नंकरिष्यामि।३ मेरा।

द्रात्मजस्तदा। जानुभ्यां पतितो भूमौ पुनरुत्पपात वा। तं चोपनतं त्रिशिराः शरैराशीविषोपमैः। बाणैर्हरिपतिः पूर्वं ललाटे
निजघान घनं तदा। ततो गदां परिगृह्य त्रिभिर्निरुतपुंगवैः। हनूमानपि विज्ञाय नीलश्चापि ततः क्लिष्टः॥ ततस्त्रिक्षेप शैला
ग्रं नीलस्त्रिशिरसे तदा। तच्चावरणसंस्तोधीमान् बिभेद निशितैः शरैः। तद्बाणशतनिर्भिन्नं विदारितशिलाघनं। सवि
स्फुलिंगसंन्नादं निपपात गिरेः शिरः। तद्वेष्टितमालोक्य हर्षाद्देवांतकस्तदा। परिघेणाभिदुद्राव मारुतात्मजमाहवे तम ४
वे। तमापतंतमालोक्य हनूमान् कपिकुंजरः। आजघान तदा मूर्ध्नि वज्रवेगेन मुष्टिना॥ समुष्टिनिःष्पिष्टविशीर्णमूर्द्धा
विकीर्णदंताक्षिविलंबजिह्वः। देवांतको राक्षसराजसूनुर्गतासुरुर्व्यां सहसापपात॥ इति देवांतकवधसर्गः॥ ॥
तस्मिन्हते राक्षसराजसूनौ महाबले संयुति देवशात्रौ। नीलं त्रिमूर्द्धा कपिवः शरैराधैव वर्षजांबूनदचित्रपुंखैः। शि
रू तैः शरैस्तिरस्क्रियमाणो विभिन्नगात्रः [illegible] कपिसैन्यपालः। विसृष्टगात्रोति बभूव नीलो लिष्टं मितः खेन महाबलेन।
ततस्तु नीलः प्रतिलभ्य संज्ञां स शैलमुत्पाट्य सवृक्षखंडं। सदूरमुत्प्लुत्य च वेगमग्रवेगो महोदरं तेन जघान मूर्ध्नि। स तेन शै
लेन समाहतस्तदा रक्षो हतो भूमितले पपात ह। महोदरे जीवितमुत्ससर्ज संस्य यथा गजः सिंहबलाभिभूतः। पितृव्यं
निहतं दृष्ट्वा त्रिशिराः क्रोधमूर्च्छितः। हनुमंतं ससर्ज क्रुद्धो निर्व्याधनिशितैः शरैः॥ ततो हनूमान्तलयच्च हर्त्या त्रिशिरसस्समद्
विददारन खैः क्रुद्धो गजेंद्रान्मृगराडिव। स च शक्तिमथादाय कालरात्रिमिवांतकः। हनुमति अनिक्षेप त्रिशिरारा
वणात्मजः। निबखान तदा शूरो वानरेंद्रस्य वक्षसि। खड्गप्रहाराभिहतो हनूमान्प्लवगोत्तमः। स जघान त्रिशिरसं
तलेनोरसि वीर्यवान्। स तथाभिहतस्तेन ध्वस्तहस्ताम्बरो भुवि। निपपात महातेजास्त्रिशिरास्तदा। पततस्तस्य
संभ्रांता राक्षसाश्च महाकपिः। ननाद गिरिसंकाशस्तापयन्सर्वराक्षसान्। अमृष्यमाणस्तं घोरं त्रिशिराः क्रोधमूर्च्छि
तः। समुत्पत्य हनूमंतं आजघान समुष्टिना। शितेन खड्गेन महाशिरांसि कपिः समस्तानि सकुंडलानि। क्रुद्धः स
चिच्छेद तदा हनूमान्वधाय मंजस्य च शिरांसि शक्रः। तानि आयताक्षाण्यगसंनिभानि प्रदीप्तवैश्वानरसप्रभाणि॥

=प्रजापतिः।१ वृत्रासुर २। =सतस्या२ =पर्वतोपमानि।१ =हनुमंतः२

दशग्रीवो महातेजा राजा वैश्रवणानुजः। भीमकर्मा महोत्साहो रावणो राक्षसाधिपः। तस्यैष वीर्यवान्पुत्रो रावणप्रति
मो रणे। वृद्धसेवी श्रुतधरः सर्वास्त्रविदुषां वरः। अश्वपृष्ठे रथे नागे खड्गे धनुषि स्यंदने। भेदे सांत्वे च दाने च नये मंत्रे च
संमतः। यस्य प्रभावः सुमहान् कथ्यते देवदानवैः। तनयं विद्धि मालिन्यास्त्वतिकायेति यं विदुः। अनेनाराधितो ब्रह्मा
तपसा भावितात्मना। अस्त्राणि चास्य दत्तानि रिपूणां च पराजयः। सुरासुरैरवध्यत्वं दत्तमस्य स्वयंभुवा। एतच्च कव
चं दिव्यं रथश्चैवैष भास्करः। एतेन शतशो देवा दानवाश्च पराजिताः। रक्षितानि च रक्षांसि यक्षाश्च युधि सूदिताः॥ व
ज्रं विष्टंभितं बाणैर्येन शक्रस्य धीमतः। पाशः सलिलराजस्य युद्धे प्रतिहतः पुरा। एषोऽतिकायो बलवान् राक्षसानां
महारथः। राक्षसस्य सुतो धीमान् देवदानवदर्पहा। तदस्मिन् क्रियतां यत्नः क्षिप्रं पुरुषपुंगव। पुरा वानरसैन्यानि
क्षयं नयति सायकैः। ततोऽतिकायो बलवान् प्रविश्य हरिवाहिनीं। विस्फारयामास धनुर्ननाद च मुहुर्मुहुः। तं भीमव
पुषं दृष्ट्वा रथस्थं रथिनां वरं। अभिपेतुर्महात्मानः प्रधाना ये वनौकसः। द्विविदः कुमुदो मैंदो नीलः सरभ एव च। पा
दपैर्गिरिशृंगैश्च युगपत्समुपाद्रवन्। तेषां वृक्षांश्च शैलांश्च शरैः कनकभूषितैः। अतिकायोऽतितेजस्वी चिच्छेदास्त्रवि
दां वरः। तांश्चैव सर्वान् स हरीन् शरैः सर्वायसैर्बली॥ विव्याधाभिमुखान् संख्ये भीमकर्मा निशाचरः। तेऽर्दिताः शरवर्षेण भि
न्नगात्राः प्लवंगमाः। न शेकुरतिकायस्य पुरतः स्थातुमाहवे। तत् सैन्यं हरिवीराणां त्रासयामास राक्षसः। मृगयूथा
मिव क्रुद्धो हरिर्यौवनदर्पितः॥ स राक्षसेंद्रो हरिसैन्यमध्ये नायुध्यमानं निजघान कंचित्। उत्पत्य रामं स महाधनुष्मान्
सगर्वितो वाक्यमिदं बभाषे॥ अयं स्थितोऽहं शरचापपाणिर्न प्राकृतं कंचन योधयामि। यस्यास्ति शक्तिर्व्यवसाययुक्ता
ददातु मे शीघ्रमिहाद्य युद्धं॥ तत्तस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहंता। अमृष्यमाणश्च समुत्पपात जग्रा
ह चापं ततः प्रहस्य। पुरस्तादतिकायस्य विकृष्य महद्धनुः। पूरयन्निव महीं शैलानाकाशं सागरान्दिशः। ६१
घोरो ज्यातललक्ष्मणस्योग्रस्त्रासयामास राक्षसान्। सौमित्रेर्धनुषो घोषं श्रुत्वा प्रतिभयं तदा॥ विसिस्मिये महातेजा रा
क्षसेंद्रसुतो बली॥ अथातिकायः कुपितो दृष्ट्वा लक्ष्मणमग्रतः। आदाय निशितं बाणमिदं वचनमब्रवीत्॥ बालस्त्व

म२ =ए३

नादयन् परमंक्रुद्धोराघवंप्रतिज्ञ गिमवान्। पूरितास्तेन शब्देन नगा गिरिसकंदराः। सं चचाल महासर्वा त्रस्तः
सिंहमिवेद्धिपः। स विस्फार्य महच्चापं किरीटी मृष्टकुंडलः। नाम विश्रावयामास ननाद च महास्वनं। तेन सिं
x हप्रणादेन नाम्नः संश्रावणेन च। घोराश्चैन च नामेन त्रासयामास वानरान्। ते तस्य रूपमालोक्य निरंतास्वस्य
विक्रमात्। भयार्ता वानराजस्ता विद्रवंतद्दिशोदश। अतिकायं समासाद्य सर्वे ते भ्रष्टचेतसः। शरण्यं शर
णं जग्मुर्लक्ष्मणाग्रजमाहवे॥ न ततिकार्यं काकुत्स्थो रथस्थं पर्वतोपमं। ददर्श धन्विनं वेगात् गर्जंतं काल
मेघवत्। तं दृष्ट्वा स महाघोरं राघवोपि विसिस्मिये। वानरान् सांत्वयित्वा च विभीषणमुवाच ह। कोयं पर्व
तसंकाशो धनुष्मान् हरिलोचनः। युक्ते स्वरसहस्रेण विशाले स्यंदने स्थितः। यः शरैः शूलैः शितैः खड्गैः
मुज्ञरैः स परश्वधैः। सोर्चिष्मानिर्वतो भाति भूतैरिव महेश्वरः। कालजिह्वाप्रकाशाभिर्य एषोत्र विराज
ते। आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः। धनूंषि वास्य सक्तानि हेमपृष्ठानि सर्वतः। शोभयंति रथश्रेष्ठं
शक्रचापमिवांबुदं। कोयं राक्षसशार्दूलो रणभूमिं विराजयन्। अभ्येति रथिनां श्रेष्ठो रथेनादित्यवर्चसा। ध्वज
लोव७ शृंगप्रतिष्ठेन राहुणाभिविराजता। सूर्यरश्मिनिभैर्बाणैर्दिशो दश विराजयन्। त्रिनतं मेघसंकाशं हाटकहेमपृष्ठमलं त्रिशूलं ?
कृतं। इंद्रस्येव धनुस्तस्य कार्मुकं भाति विश्रुतः। सध्वजः सपताकश्च सानुकर्षो महारथः। चापादिभिः समायुक्तो मेघस्त
च५ नितनिस्वनः। विंशतिर्दश चैवाष्टौ तूणा रथवरे स्थिताः। कार्मुकाणि च भीमानि गदाश्चोग्रप्रदर्शनाः। द्वौ च खड्गौ रथगतौ पार्श्व
स्थौ पार्श्वशोभिनौ। किंशुसरौ वदिवौ न दशहस्तप्रमाणतः। रक्तमाल्यांबरधरो महापर्वतसंनिभः। कालः कालमहा
समेघं श्या वक्त्रो मेघस्थ इव भास्करः। कांचनांगदनद्धाभ्यां भुजाभ्यामेष शोभते। शृंगाभ्यामिव दीप्ताभ्यां हिमवान् पर्वतोयथा
कालमिव कुंडलाभ्यां च तस्यैतत् भाति वक्त्रं शुभेक्षणं। पुनर्वस्वंतरगत इव परिपूर्णो निशाकरः॥ आचक्ष्व मे महाबाहो कोयं राक्षस
विरुदा। ३ पुंगवः। यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः। स पृष्टो राजपुत्रेण रामेणामिततेजसा। आचचक्षे महातेजा राघवाय विभी
षणः।

=धेनकूमेर च५

यं यूथपांश्चापि दुद्रुवे । संत्रास्य वानरीं सेनां शरवर्षैर्महाभुजः । सौमित्रिमभिदुद्राव पुनरेव महामृधे । तमापतंतं
सहसा प्रत्यगृह्णान्महाभुजः । लक्ष्मणो राक्षसश्रेष्ठं शरैरग्निसमप्रभैः । ततो विद्याधरा भूता देवा देवर्षयस्तथा
गुह्यकाश्च महात्मानस्तद्युद्धं ददृशुस्तदा ॥ ततोतिकायः कुपितो धनुष्यारोप्य सायकं । लक्ष्मणाय प्रचिक्षेप संक्षि
पंतमिवांबरं । तमापतंतं विशिखं शरमाशीविषोपमं । अर्द्धचंद्रेण चिच्छेद लक्ष्मणः परवीरहा । तं निकृत्तं शरं दृ
ष्ट्वा कृत्तभोगमिवोरगं । अतिकायो भृशं क्रुद्धो पंचबाणान् समाददे । तांश्च शरान् प्रचिक्षेप लक्ष्मणाय निशा
चरः । तानप्राप्तान् शरैस्तीक्ष्णैश्चिच्छेद युधि लक्ष्मणः । स तान् छित्वा शरान् तीक्ष्णान् लक्ष्मणः पुरुषर्षभः । आददे
निशितं बाणं ज्वलंतमिव तेजसा । तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः । विचकर्ष च वेगेन ससर्ज च वराक्षसे
त्र सृष्टेन विसृष्टेन शरेणानतपर्वणा । ललाटे स राक्षसश्रेष्ठमाजुघानं माजघान स वीर्यवान् । ललाटे तु शिरोमग्नस्त
स्य भीमस्य राक्षसः । ददृशे शोणितेनाक्तः पन्नगेंद्र इवाहवे । राक्षसः प्रचकंपाथ लक्ष्मणेषु प्रताडितः । रुद्रबाणाह
तं घोरं यथा त्रिपुरगोपुरं । चिंतयामास चाश्वस्य विमृश्य च महाबलः । साधु मुक्तेन बाणेन श्लाघनीयोसि मे रि
पुः । इत्येवं सविनिश्चस्य निगृह्य च भुजावुभौ । स रथोपस्थमास्थाय ययौ प्रमादतश्चोत्तमं । त्रीनेकं पंच सप्तेति
सायकान् राक्षसर्षभः । आददे संदधे चापि विचकर्षोत्ससर्ज च । ते बाणाः कालसंकाशा राक्षसेंद्रध
नुश्च्युताः । हेमपुंखा रविप्रख्याश्चक्रुर्दीप्तमिवांबरं ॥ ततस्तान् राक्षसान् दृष्ट्वा शरौघान् राघवानुजः
असंभ्रांतः स चिच्छेद बहुभिर्निशितैः शरैः । तान् शरान् युधि संप्रेक्ष्य निकृत्तान् रावणात्मजः । क्रुद्धो
पातिसुरेशारिर्जग्राह निशितं शरं । तं संधाय महातेजाः विससर्ज महामृधे । तेन सौमित्रिमायांतं आजघा
न स्तनांतरे । अतीव स तेन सौमित्रिस्ताडितो युधि वक्षसि । सुस्राव रुधिरं भूरि मदमत्त इव द्विपः ।

ते १

मसि सौमित्रे विक्रमेष्वविचक्षणः। गच्छ किं कालसदृशं मां योधयितुमिच्छसि। नहि मद्बाहुसृष्टानां शराणां नतपर्वणां। सो
ढुमुत्सहते वेगं अंतरिक्षमथो मही। सुखप्रसुप्तं कालाग्निं प्रबोधयितुमिच्छसि। न्यस्य चापं निवर्तस्व मा प्राणांस्त्वं विमोक्ष्यसे
अथवास्त्वं प्रतिष्टब्धो न निवर्त्तितुमर्हसि। तिष्ठ प्राणान् परित्यज्य गमिष्यसि यमक्षयं। पश्य मे निशितान् बाणान् अरि
दर्पनिसूदनान्॥ ईश्वरायुधसंकाशान् तप्तकांचनभूषणान्। सितपीतारुणमलक्कोस्तीमुक्ता विक्रमे भूषणः। एष ते
सूर्यसंकाशो बाणः पास्यति शोणितं। मृगराडिव क्रुद्धो गजराजस्य शोणितं। यद्यपि त्वां वधिष्यामि नामकीर्तिर्न विष्य
ति। अज्ञातबलवीर्यस्य ख्यातस्य त्रिदिवालये। कामं तु यदि ते कामो मां योधयितुमाहवे। यत्नात् गृह्णाण स्वशरांस्तत
तं१ स्य कर्माणि। श्रुत्वातिकायस्य वचः सरोषं सगर्वितं संयति राजपुत्रः। न विव्यथे चुक्रोध बलेर्धृतात्मा उवाच नेनं स
लतो महात्मा॥ न वाक्यमात्रेण भवान् प्रधानो न कत्थमानाः सत्पुरुषा भवंति। मयि स्थिते धन्विनि बाणपाणौ वि
दर्शयस्वात्मबलं दुरात्मन्। कर्मणा दर्शयात्मानं न विकत्थितुमर्हसि। मयि स्थिते पौरुषेणयिंदियो युक्तो स्व
शूर इत्युच्यते। सर्वायुधसमायुक्तो धन्वी रथवरे स्थितः। शरैर्वा यदि वा शस्त्रैर्दर्शयस्व पराक्रमं। ततः शरांस्ते नि
शितैः पातयिष्याम्यहं रणे। मारुतः कालसंपक्वं वृंतात्तालफलं यथा॥ अद्य ते मामका बाणास्तप्तकांचनभू
षणाः। पास्यंति रुधिरं देहात् पुरा देवा यथामृतं। बालोयमिति विज्ञाय मामवज्ञातुमर्हसि। बालो वा यदि वा वृद्धो
नानिक मति। मृत्युं जानीहि संयुगे। किं दर्पः क्षुद्रसर्पेण बालेन न विपद्यते। एकेन हि शरेण त्वां हंतुं शक्नोमि राक्षस। द
र्शय त्वमिदानीं मे वीर्यमस्त्रबलं तथा। ततस्त्वां नाशयिष्यामि दृष्ट्वा पौरुषविक्रमं॥ लक्ष्मणस्य वचः श्रुत्वा
हेतुमत्परमार्थवत्। अतिकायः प्रचुक्रोध बाणं चापि समाददे। तमापततं सौमित्रिस्त्रिधा विच्छेद लाघवा
त्। रावणिः परमामर्षात् शरैरेनमुपाद्रवत्॥ ततः शरसहस्रेण संछादयद्रघुनंदनं। विनीषणांवसामां
॥ अयं पुष्पपोथ्यापिकुत्रवे॥

तं लक्ष्मणोत्सृष्टममोघवर्त्तं तं समापतंतं श्वसनप्रकाशं। तीक्ष्णाग्रधारोन्नतचित्रपुंखं ततोतिकायः समरे दद
र्श तं प्रेक्षमाणः सहसातिकायो जघान बाणैश्च शितैरनेकैः। स सायकस्तस्य सुपर्णवेगः ततोतिके
न जगाम पार्श्वं। तमागतं प्रेक्ष्य तदातिकायो बाणं प्रदीप्तानलकालकल्पं। जघानशक्त्यृष्टिगदाकुठारैः शू
लैर्हलैश्चाप्य विपन्नचेष्टः। तान्यायुधान्यद्भुतविक्रमाणि मोघानि कृत्वा स शरोग्निकल्पः। प्रगृह्य तद्वारुकिरी
टजुष्टं तदातिकायस्य शिरो जहार॥ तच्छिरः सशिरस्त्राणं लक्ष्मणेन प्रमर्दितं। पपात सहसा भूमौ शृंगं हि
मवतो यथा॥ ततोह तान् राक्षसपुंगवांस्तान् सकुंभकर्णातिरथातिकायान्। रक्षोगणा वारहतावशिष्टा
ते रावणाय त्वरिताः शशंसुः॥ इति युद्धकांडे अतिकायवधः॥ ॥ ततो हतांस्तान् स निशम्य मुमोह रो
काश्रुपरिप्लुताक्षः। भ्रातृवधं पुत्रवधं च घोरं विचिंत्य शूरस्तु [illegible]ले प्रगाढे। ततस्तु राजानमवेक्ष्य दीनं शो
कार्णवे संपरिवर्तमानं। रथर्षभो राक्षसराजसूनुरथेंद्रजिद्वाक्यमिदं बभाषे॥ न तात मोहं प्रतिपाद
कालो यदिंद्रजिज्जीवति नैर्ऋतेंद्रः। नेंद्रारिबाणाभिहितो हि कश्चित् प्राणान् समर्थो युधि साधयेत्तु यः॥
पश्याद्य रामं सह लक्ष्मणेन मद्बाणनिर्भिन्नविकीर्णदेहं। गतायुषं भूमितले शयानं शितैः शरैराचि
तसर्वगात्रं। इमां प्रतिज्ञां शृणु शक्रशत्रोः सुनिश्चितां पौरुषदैवयुक्तां। अद्यैव रामं सह लक्ष्मणेन सं
तर्पयिष्यामि शरैरमोघैः। अद्यैंद्रवैवस्वतविष्णुमित्राः साध्याश्च वैश्वानरचंद्रसूर्याः। द्रक्ष्यंति मे विक्रम
मप्रमेयं त्रिविक्रमे वि। क्रममेव विष्णोः। इत्येवमुक्त्वा त्रिदशेंद्रशत्रुः आपृच्छ्य राजानमदीनसत्वः। स
मारुरोहानिलतुल्यवेगं रथं खरश्रेष्ठसहस्रयुक्तं। तमास्थाय महातेजा रथं हरिरथोपमं। जगाम स
धनुस्तत्र यत्र युद्धमरिंदमः। तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः। संस्पर्द्धमाना बहवो धनुःप्रासासिर
सिपाणयः। गजस्कंधगताः केचित् केचिद्धयगतास्तथा॥ पाशमुद्गरनिस्त्रिंशपरश्वधधराः परे॥

३।

संकारामनामानं विशल्यं सहसा मुमुचे ।। उग्राहच शरं तीक्ष्णं तमस्त्रेणाभिसंदधे । आग्नेयेन महातेजा
योजयित्वा विवर्द्धणः । स जज्वाल महाबाणो धनुष्यस्य महात्मनः । ततस्तं ज्वलितं तीक्ष्णं लक्ष्मणेश
र मंजसा ।। अतिकायाय चिक्षेप यमदंडमिवापरं । अतिकायोपि तेजस्वी सौरमस्त्रं समादधे । तेन बा
णं भुजंगाभं हेमपुंखमयोजयत् । उत्ससर्ज च वेगेन दीप्तसूर्यास्त्रसंयुतं । ततस्तावंबरे बाणाव
न्योन्यमभिजघ्नतुः । तेजसा संप्रदीप्ताग्रौ क्रुद्धाविव भुजंगमौ । तावन्योन्यं विनिर्दह्य पेततुर्धरिणी
तले । तावुभौ तु शरौ हीनौ न भ्राजेते स्म संयुगे । ततोतिकायस्त्वैषीकं ससर्जास्त्रं निशाचरः । तं प्रचिच्छे
द सौमित्रिरस्त्रेणैंद्रेण वीर्यवान् । ऐषीकं निहितं दृष्ट्वा कुमारो रावणात्मजः । याम्येनास्त्रेण संक्रु
द्धो योजयामास सायकं । ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः । वायव्येन तदस्त्रेण निजघान स
लक्ष्मणः । अथैनं शरधाराभिर्धाराभिरिव तोयदः । प्रववर्ष सुसंक्रुद्धो लक्ष्मणो रावणात्मजं । याम्ये
नास्त्रेण संक्रुद्धो योजयामास सायकं ।। तेतिकायस्य संप्राप्य कवचं वज्रविग्रहं । भग्ना विशल्याः स
हसा निपेतुर्भुवि सायकाः । तानमोघानभिसंप्रेक्ष्य लक्ष्मणः परवीरहा । अभ्यवर्षत बाणानां सयुते
न महायशाः । स विध्यमानो बाणौघैः अतिकायो महाबलः । अभेद्यकवचः संख्ये राक्षसो नातिविव्य
थे । न शशाक रुजं कर्त्तुं यदा तस्य महाशरैः ।। अथैनमभ्युपागम्य वायुर्वाक्यमभाषत । ब्रह्मदत्तवरो ह्ये
षोऽभेद्यकवचान्वितः । ब्रह्मास्त्रेण वहंतव्यस्तद्वाक्यं वज्रदिस्थितं । ततस्तु वाक्यं स निशम्य वायोः सौ
मित्रिरिंद्रप्रतिमानवीर्यः । समाददे बाणममोघवेगं स ब्रह्मणोस्त्रेण युयोज विव । तस्मिन्नु वरास्त्रेऽभि
नियुज्यमाने सौमित्रिणा बाणवरे शिताग्रे । दिवाश्च सर्वैक महाग्रहाश्च नभोगतास्त्रेसु र रासनोर्वी ।

मंगं दिव्य स्त्रं

१ - तेजोमयात् विग्रस्ता॥

इवाचलाः। तेन्योन्यमभिसर्पंतो विनदंतश्च विस्वरं। राक्षसेंद्राश्त्रैस्त्रनिर्भिन्ना विनेदुर्वानरर्षभाः। संवीक्षमाण
गमनं केन्निनेत्रेषु ताडिताः। शरैर्विविशुरन्योन्यं निपेतुश्च धरिणीतले। सुग्रीवं स हनूमंतं अंगदं गंधमादनं।
जांबुवंतं सुखेणं च वेगवंतं च वानरं। मैंदं च द्विविदं नीलं गवाक्षं गवयमेव च। विद्युद्दंष्ट्रं च केसरिणं हरिलोमा
नमेव च। सूर्याननं दधिमुखं तथा द्योतिर्मुखं हरिं। प्रवेगाक्षं नलं चैव कुमुदं चैव वानरं। उल्कामुखमसं
गं च हरिं पनसमेव च। धूम्रंशतविहंतारं गवाक्रमपरान् हरीन्। बाणैः शूलैः शितैः खड्गैर्भिंडिमालैः
परस्वधैः। विव्याध कपिशार्दूलान् सर्वांस्तान् राक्षसोत्तमः॥ स तांस्तदा वानरराजवाहीन् निर्भिद्य बाणै
स्तपनीयपुंखैः। ववर्ष रामं शरवर्षजालैः सलक्ष्मणं वज्रसमप्रवेगैः। स बाणवर्षैरभिवर्षमाणो
धारानिपातैरिव पर्वतेंद्रः। तं वीक्ष्यमाणः परमाद्भुतश्रीः रामस्तदा लक्ष्मणमित्युवाच। असौ पुनर्ल
क्ष्मणराक्षसेंद्रो ब्रह्मास्त्रमाश्रित्य सुरेंद्रशत्रुः। संक्राघ सर्वं हरिसैन्यमेतत् आवारयत्स्को निर्द्धोतिवी
रः। स्वयंभुवा दत्तवरो महात्मा खमास्थितोंतर्हितभीमदेहः। कथं नु शक्यो युधि नष्टरूपो निहंतुमद्येंद्रजि
दस्त्रपाणिः। मन्ये स्वयंभूर्भगवानचिंत्यो मन्ये तदस्त्रं कृतमुक्तदेवः। त्र यः समस्ता मम वीर्यधैर्यमाया
बलोक्ताद्यते रणाग्रे। प्रकाशयन्येष हि राक्षसेंद्रः सर्वा दिशः सायक शृंखजालैः। एतच्च शूलं प्रविभग्नसर्वं प्रमु
ह्यते वानरराजसैन्यं। आर्वांच्च दृष्ट्वा पतितौ विसंज्ञौ निवृत्तयुद्धौ नमरौ तहर्षैः। प्रयाति नीमः पुनरेव लंकां प्रहर्ष
यन् राक्षससैन्यमेव॥ ततस्तु ताविंद्रजितोस्त्रजालैः बभूवतुस्तत्र तदा विषण्णौ। स राघवौ वा तौ तौ ति। नौ विषाध
न नादहर्षाद्युधि राक्षसेंद्रः। स तत्तदा वानरराजसैन्यं सरामसौमित्रिमधाप्रमेयं। विषाद सर्वं सहसावि ६४
वेश पुरीं दशग्रीवभुजाभिगुप्तां॥ संस्तूयमानो गुविराक्षसेंद्रैः पित्रे च सर्वं हृषितोभ्यकवान। तयोस्तदासा

सशंखनादैः पुल्पेश्रमेराणां न महास्वानैः| जगाम त्रिदशेंद्रारिः स्तूयमानः सपत्नजित्| सशरं स्वशराशि
नर्षेन क्षत्रेणारिपुसूदनः| रराजत्र गृहीतेन नक्षत्रश्चंद्रमसा यथा| ततस्तु विविजुंभीमं मेघान्हेमभूषितं|
वारुवामरमुख्यैश्च मुख्यं सर्वधनुष्मतां| ततश्चंद्रठिवालेकासूर्यप्रतिमतेजसा| रराजव तिवीर्येणाधीरिवा
क्षेणमास्वता| सजहध्वानि निर्यातं बलेन महतावृतं| राक्षसाधिपतिर्नाम रावणः पुत्रमब्रवीत्| त्वमप्र
तिरथः पुत्र जितस्ते युधि वासवः| किं पुनर्मानुषं रूपं न वधिष्यसि राघवं| स तथोक्तो राक्षसेंद्रेण प्रतिगृह्य
महाशिषः| रथेनाश्वयुजावीरः शीघ्रं गत्वा निकुंभिलां| स्थापयामास रक्षांसि रथांश्चैव समंततः| सर्वतोग्निं
परिस्तीर्य शस्त्रपत्रैः सतोमरैः| जुहाव सर्वकृष्णस्य कंठं व छागस्य जीवितुं| स क्रुद्धेव समिद्धस्य विधूम
स्य महार्चिषः| ततस्तं हुतमोकारं हुतभुक्सदृशप्रभः| अजुहोत राक्षसः श्रेष्ठो मंत्रार्थं विधिपूर्वकं|
सहविर्लाजाद्यैर्माल्यगंधैः सुसंस्कृतैः| अजुहोत् पावकं तत्र राक्षसेंद्रः प्रतापवान्| सोस्त्रमा
वाहयामास ब्राह्ममस्त्रविदां वरः| धनुःशरान् रथं चैव सर्वं तत्राभ्यमंत्रयत्| तस्मिन्नाहूयमानेन
हूयमाने च पावके| सार्कग्रहेंदुनक्षत्रा वितत्रास महीतलं| स पावकं पावकदीप्ततेजा जुहाव रक्षःप्र
तिमप्रभावः| सचापबाणासिरथाश्वसूतः खेंतर्दधेमानमचिंत्यरूपः| ससैन्यमुत्सृज्य समुत्ससर्जबी
णानुरगोपमान्वानरवाहिनीषु| अदृश्यमानः शरजालमुग्रं ववर्ष नीलांबुधरो यथांबु| ते शक्रजित्बाणवि
कीर्णदेहा मायाहता विस्वरमुन्नदंतः| मायानिगूढं सुरराजशत्रुं न तत्र रक्षोधिपतिं व्यपश्यन्| तूर्णं
स रक्षोधिपतिर्महात्मा सर्वासु दिक्षु विवर्षमाणः| प्रच्छादयामास रविप्रभां वै विषादयामास च वानरेंद्रान्
सश्रूलनिस्त्रिंशपरश्वधानि दीप्तानलार्कप्रकृतिसमनाणि| सविस्फुलिंगोज्ज्वलपावकानि ववर्ष तस्मिन्प्लव
॥ वगेंद्रसैन्ये| ततस्ते पावकप्रख्यैः शरैर्वानरपुंगवाः| पीडिताः पृथिवीं जग्मुर्वज्राक्रांता

ञ्जनासुप्रजा येन मातरिश्वा च नैरृतः । कच्चिद्धारयति प्राणान् हनुमान् प्लवगर्षभः । श्रुत्वा जांबवतो वाक्यं
अब्रवीत्तं विभीषणः । स्वरमार्तं तस्य विज्ञाय सुः प्रज्ञां बुधाद्रु से विनः । किं रूपा मह्ये यत्कृते स्म यन्मूलं निवनो
बलं । तावार्यपुत्रावुतिक्रम्य कस्मात् पृच्छसि मारुतिं । नैव राजनि सुग्रीवे नांगदेन च राघवे । आर्येण दर्शित
स्नेहो हनूमति विदर्शितः । वानरेंद्रान् महाकायान् अतिक्रम्य महाबलान् । बहून्नन्यांस्त्वमेकं कं कस्मात् पृ
च्छसि मारुतिं । विभीषणवचः श्रुत्वा जांबुवानिदमब्रवीत् । शृणु नैरृतशार्दूल यस्मात्पृच्छसि मारुतिं । हनूम
ति गतप्राणे जीवंतोपि मृता वयं । तस्मिन् जीवति दुर्द्धर्षे हतमप्यहतं बलं । एतच्छ्रुत्वा तु तद्वाक्यं प्रश्रयाद्वा विभी
षणः । धयते मारुतिस्तात मारुतिप्रतिमो जवे । विश्वानरसमं तेजो धारयन् प्लवगर्षभः । स ते मार्गं समाया
तो मयात्र घसहत्प्रभो । ततो वृद्धमुपागम्य विनयेनाभिवादयन् । जांबुवंतं महातेजा हनुमान् मारुतात्मजः । श्रु
त्वा हनुमतो वाक्यं तथा संव्यथितेंद्रियः । पुनर्जातमिवात्मानं मेने स प्लवगपुंगवः । ततोब्रवीन्महातेजा हनूमं
तं स जांबुवान् । आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि । नान्यो विक्रमसंपन्नस्त्वमेषां परमा गतिः । त्व
त्पराक्रमकालोयं नान्यं पश्यामि कंचन । ऋक्षवानरवीराणां अनीकानि प्रहर्षय । विशल्यौ कुरु चाप्येतौ
सादितौ रामलक्ष्मणौ । गत्वा परममध्वानमुपर्युपरि सागरं । हिमवंतं नगश्रेष्ठं हनुमन् गंतुमर्हसि । ततः
कांचनमत्युग्रं ऋषभं पर्वतोत्तमं । कैलासशिखरं चैव द्रक्ष्यस्यरिनिषूदन । तयोः शिखरयोर्मध्ये प्र
दीप्तमतुलप्रभं । सर्वौषधियुतं वीर द्रक्ष्यस्यौषधिपर्वतं । तस्य वानरशार्दूल चतस्रो मूर्ध्नि संभवाः । द्र
क्ष्यस्योषधयो दीप्ता दीपयंतीर्दिशो दश । मृतसंजीवनीं चैव विशल्यकरणीं तथा । सवर्णकरणीं चैव संधि
नीं च महौषधीं । गृहीत्वा हनुमन् सर्वाः शीघ्रमागंतुमर्हसि । आश्वासय हरीन् सर्वान् प्राणैर्गंधवहात्मज ।

दितयोरणाग्रे मुमोह सैन्यं हरियूथपानां। सर्वे विपन्ना विगतप्रभावा न चापि किंचित्प्रतिपेदिरे स्म। ततो विपन्नं
समवेक्ष्य सैन्यं विभीषणो बुद्धिमतां वरिष्ठः। उवाच शाखामृगराजवीरान् माभैष्ट नास्त्यत्र विषादकार्यं। य
दार्यपुत्रौ विवशौ विषण्णौ स्वयंभुवो वाक्यमतिप्रपन्नौ। यतस्त्वादितौ विंद्रजितास्त्रजालैः तस्मिन्हि दत्तं
परमास्त्रमेतत्। स्वयंभुवो ब्राह्ममनिन्द्यममोघवीर्यं। तन्मानयंतौ यदि राजपुत्रौ विषादितौ नात्र
विषादकालः। स ब्राह्ममस्त्रं तद्धि मानमानयित्वा समारुतिः। विभीषणवचः श्रुत्वा हनुमानिदमब्रवीत्।
अस्मिन्नास्त्रहते सैन्ये वानराणां तरस्विनां। यो यो धारयते प्राणांस्तं तमाश्वासयावहे। तावुभौ युगप
द्वीरौ वायुपुत्रविभीषणौ। उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः। छिन्नलांगूलहस्तैश्च विप्रकीर्णैः शि
रोधरैः। स्रवद्भिः क्षतजं चापि प्रस्रवद्भिः समंततः। पतितैः पर्वताकारैर्वानरैरभिसंकुला। शास्त्रैश्च
पतितैर्दीप्तैरभिकीर्णा वसुंधरा। सुग्रीवं सांगदं नीलं कुमुदं गंधमादनं। जांबुवंतं सुखेणं च वेगवंतं
दरीमुखं। ऽधौ निर्मुखं नलं मैंदं द्विविदं पनसं गजं। गवाक्षं गवयं चैव ऋषभं विनतं हरिं। एतांश्चा
न्यान्सुबहून्वानरेंद्रान्महाबलान्। विभीषणहनूमंतौ ददृशाते हतान्रणे। सप्तषष्टिर्हता ष
गातो कोट्यो वानराणां तरस्विनां। पश्चिमेनार्द्धशेषेण वरदानैः स्वायंभुवः। सागरौघनिभं घोरं दृष्ट्वा व्यापा
दितं बलं। विभीषणहनूमंतौ जांबुवंतमथैयतुः। स्वभावाज्जरया युक्तं वृद्धं शरशरैश्चितं। रुजापरिग
तं वीरं शाम्यंतमिव पावकं। अथैनमुपसंगम्य पौलस्त्यो वाक्यमब्रवीत्। कच्चिदार्य शरैर्घोरैः न प्र
णा हिंसिता रणे। विभीषणवचः श्रुत्वा जांबुवान्प्लवगर्षभः। कृच्छ्रेण धारयन्प्राणानिदं वचनमब्र
वीत्। नैर्ऋतेंद्र महावीर्य स्वरेण त्वाभिलक्षये। पीड्यमानः शितैर्बाणैः न त्वां पश्यामि चक्षुषा। अं

विश्रवणालयं च सूर्यस्य मार्गं सूर्यनिबंधनं च । ब्रह्मासनं शंकरकार्मुकं च ददर्शनाभिं च वसुंधरायाः । कैलासमुग्रं हिम
वतः शिलं तं वृषभं च शैलं कांचनं शैलमुग्रं । दीप्तं च सर्वौषधिसंप्रयुक्तं स तं समीक्ष्यानलराशिदीप्तं । विसिस्मिये वायु
वरेण्यसूनुः आप्लुत्य तं चौषधिपर्वतं तं । तत्र तत्रौषधीनां विचयं चकार । स योजनसहस्राणि समाक्रम्य महा
कपिः । अविज्ञातो महातेजाः संविवेश महौषधीः । ततस्ताः कामरूपिण्यो महौषध्यो महाकपिं । विज्ञायार्थिन
मायांतं तदा जग्मुरदर्शनं । स ताश्चापश्यन् हनुमान् कोपन्नाद कोपाच्च विवृतवक्त्रः । अमृष्यमाणाग्निनिरीक्ष्य
नेत्रे तं शैलराजानमुवाच कोपात् । किमेतदेवं सुविनिश्चितं ते यद्राघवे नास्ति तवानुकंपा । पश्याद्य मद्बाहु
बलाभिभूतं विकीर्णमात्मानमितो नगेंद्र । स तस्य शृंगं सनगं सनागं सकांचनं सानुसहस्रजुष्टं । विकी
र्णकूटं ज्वलिताग्रशृंगं प्रसह्य वेगात्सहसोद्दधर्ष । स तत्समुत्पाट्य खमुत्पपात वित्रास्य लोकान्ससुरासु
रेंद्रान् । संस्तूयमानः सुरसिद्धसंघैः जगाम वेगादतिवैडवेगः । स तेन शैलेन भृशं रराज शैलोपमो गंधव
हस्य सूनुः । सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवोद्यतेन । स भास्कराध्वानमनुप्रपन्नस्तद्भास्कराभं शि
खरं प्रगृह्य । बभौ तदा भास्करसन्निकाशो रवेः सकाशे प्रतिभास्कराभः । तं वानराः प्रेक्ष्य मुदा विनेदुः स चापि ता
न् प्रेक्ष्य समुन्ननाद । तेषां समुत्कृष्टरवं निशम्य लंकाभितो भीमरवं ननाद । स तत्तु गृह्याग्रं निषसाद तस्मि
न्नगोत्तमे वानरसैन्यमध्ये । हर्युत्तमास्तेऽभिरूपस्यमाना विभीषणेनापि च शस्यमानः ॥ ततस्तानौ संयति
राजपुत्रौ तं गंधमाघ्राय महौषधीनां । बभूवतुस्तत्र तदा विशल्यौ संरूढसर्वव्रणानष्टशोकौ । ततः सुवेगं गंधव
हस्य सूनुः । संगृह्य हेमं शिखरं प्रवृद्धं । जगाम वेगाद्धिमवंतमेव पुनश्च रामेण समागतश्च ॥ इत्यौषधान
यनो नाम सर्गः ॥ ॥ ततोऽब्रवीन्महातेजाः सुग्रीवो वानराधिपः । अर्थविज्ञानसंपन्नो हनूमंतं महाबलं । यतो हु ९९
तः कुंभकर्णः कुमाराश्च सहानुगाः । नेदानीमुपसंहारं रावणो दातुमर्हति । धाराणि संदत्तान्येव सुगृहानि

विश्रामं ।१ लंबुं । कर्तुमर्हति । पा१

क्त्वाऽब्रुवतो वाक्यं हनुमान् हरिपुंगवः। आरुरोह तदा वेगेन वारिवेगो रिवार्णवः। समवर्त्तत तदागच्छन् पीड्य
न् पर्वतोत्तमान्। हनुमान् अभेवत्तत्र छितौ यद्वत् पर्वतः। हरिपाद निमग्नस्तु निषसाद सर्वतः। न शशाकत
० दा सोढुं तं शैलं धर्षितुं ततः। तस्यां भूमिं पेतुर्नगाग्रा पुष्करगा अपि दुर्जनाः। श्रृंगाणि च शिलाश्चैव निपेतुश्च
समं ततः। तस्मिन्नि पीड्यमाने तु भग्नक्रम शिलातटे। नशेदु जीवि नरास्तत्र [illegible] सर्वे मानेन गोत्तमे। संक्षुभितमहा
धारा प्रभग्नगृहगोपुरा। लंकासं आंतर कोघाः प्रवात कदली यथा। दृष्टिवाधरसंकाशो निःपीड्य दृष्टिबधिरं
दृष्टिवी देन्य आमास आर्षिवान् मारुतात्मजः। महीं शैलं समापीड्य वडवामुखवत् मुखं। ननाद स क्षितिं त्यो
ग्रं त्रासयन् निशाचरान्। तस्य नादे [illegible] नद्यमान [illegible] यानि नदमुत्तमं। लंकायां राक्षसाः सर्वे नशेकुः स्पंदि
नीत॰ तुं भयात्। नमस्कृत्य सदेवेभ्यो मारुतिर्भीमविक्रमः। राघवार्थे परं कर्म कर्तुमिच्छति सत्वरः। स पुच्छमुद्यम्य मु
जंगकल्पं विनाम्य पृष्ठं श्रवणौ निकुच्य। विवृत्य वक्त्रं [illegible] नादस्वमुत्पपाताद्भुतचण्डवेगः। सहसैव स्वंत
रसाऽहार शिलान् शिलाः [illegible] तत्र पर्वतेभ्यः। बाहूरु पादोद्धतसंप्रयुक्ता [illegible] वेगाः सलिलं प्रपेतुः। स
ताप्रसारी [illegible] नागकल्पौ भुजौ [illegible] गारि निकाश वीर्यः। ददर्श मेरुं सुरराजकल्पो दिशः प्रकर्षन्निव वायु
सूनुः। आदित्यवेगात् सहसाऽगमन् [illegible] यथा विष्णुभुजप्रमुक्तं। स पर्वतान् वृक्षगणान् सरांसि नदीस्तडा
गानि पुरोत्तमानि। स्फोतान् जनान् तानपि संप्रपश्यन् जगाम वेगात् [illegible] वेगः। आदित्यपथमाश्रित्य साघसङ्ग
गामतेंबरे। स ददर्श महाशैलं हिमवंतं महाकपिः। नानाप्रस्रवणोपेतं बहुकंदर निर्झरं। श्वेताभ्रतसं
काशैः शिखरैश्चारुदर्शनं॥ ततः समासाद्य महानगेन्द्रम् [illegible] घोर शृंगं। ददर्श पुण्यानि तपो
वनानि सुरर्षिसंघोत्तमसेवितानि। स ब्रह्मकोशं रजतालयं च शक्रालयं रुद्रशिरः प्रमोक्षं। हयाननं ब्रह्मशि
रः प्रदीप्तं ददर्श वैवस्वतकिंकरांश्च॥ वज्रालयं
र वित्रेंगा [illegible] सहस्राणि अतिक्रामति। [illegible] एव आदित्यवेगः ५

सावधानो ॥
मयाकुलाः। विमानेषु प्रसुप्ताश्च दह्यमाना वरांगनाः। अकालमरणसंयोगान्नूजाले ऋषिःमनुकुर्तुः। काश्चि
त्रूमर्ष्टैनूसमालिंग्य निद्रोणान्वसंगमाः। यथासुप्तास्तथा दग्धाः शयनेषु वरांगनाः। काश्चिद्विजापुरातादेम
विमघनयनान्यथ। आदीप्तं गृहमालोक्य बालमादाय पुत्रकं। तत्राग्निनापरीतानि भवंति भवनानि चे। वज्रि
वज्राहतानीव शिखराणि धराभृतां। तानि निर्दह्यमानानि दूरतः प्रवकासिरे। हिमवत् शिखराणीव दह्य
मानानि सर्वतः। हर्म्याग्रे दह्यमाने च तलेप्रकुलितेस्तथा। रात्रौ सा दृश्यते लंका सपुष्पिरिव किंशुकैः।
उष्ट्रैर्मुक्तैर्गजैर्मुक्तैर्मुक्तैश्चहरगैरपि। बभूव लंका लोकांते मृतयाहरनार्णवः। अश्वमुक्तंगजोवे
गात् क विद्रुतावेगतः। सोपि गजं दृष्ट्वा कविदग्धोन्यवर्तत। अपरे हेमकक्षाश्च संनद्धा वरवारणाः
त्रस्ता बंधानसमाक्षिप्य येन तेन प्रदुद्रुवुः। पानीयं पात्रमिक्षंतः परिभ्रमणतर्षिताः। प्रतिबिंबं जले दृष्ट्वा
तमग्निरिति मेनिरे। प्रासादेषु किलाग्रेषु सन्दग्धोग्निव्यरोचत। लंकाद्रुमिवारूढो दग्धाने तु विमानसु
साबभूव महद्दैन हरिभिःपरिपाडिता। लोकस्यास्य कृयौ घोरे प्रदीप्तेव वसुंधरा। स्वापुंसो अपि मोहेन
व्यक्लिन्नासाद्धितस्कुषोः। नादितांतं क्वरांतत्र सुश्रूवे दशयोजनं। प्रदीप्तकायानुसमरे निर्गतान राक्षसा
नुबद्धिः। सत्तसापुपपेतस्तान् क्रोशतो हरयो नरा। उत्कृष्टवानराणां च राक्षसानां च निस्वनः। दिशो दश
सपूरयं चष्टथिवीं च पर्वतादयं तु। विशालौ वमहाभानौ ताबुभौ रामलक्ष्मणौ। असंभ्रांतौ जगृहतुः ध
नुषी धन्विनां वरौ। ततो विस्फारयामास रामस्तद्धनुरुत्तमं। भगवानिव संक्रुद्धो रुद्रो वेदमयं धनुः। वान
रोत्कृष्टघोषश्च राक्षसानां च निस्वनः। घोषश्चापि रामस्य त्रयो व्यापुर्दिशो दश। तस्य कार्मुकमुक्तैश्च ६७
शरैस्तत्पुरगोपुरं। पातकेन विनिर्दग्धमपतत् तत्र शतशो भुवि। ततो रामशरान्दृष्ट्वा विमानेषु गृहेषु च। संना

प्रतियातस्य नः कालेनस्तो येऽर्कं निरायतं। पा०। =न्वेद्यंति। राक्षसान्जनंति। श्रीजिताः। २ समस्तवारणानि। उपरिष्टमिलकमुखानिवा। ८

निशाचरैः। व्यतिक्रांतश्च नः कालो न चाँचित्कृतरावणः। ये ये महाबलाः संति वीर्यवंतश्च वानराः। लंकामभिपतंत्वा
शु प्रगृह्योल्काः सहस्रशः। ततोऽस्तंगत आदित्ये रौद्रे तस्मिन्निशामुखे। लंकामभिमुखाः जग्मुः सोल्कास्ते हरि
राक्षमा पुंगवाः। उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः। आरक्षास्ते विरूपाक्षा राक्षसा विप्रदुद्रुवुः। गोपुरेष्वट्टतोल
मेषु। षु चर्यासु विविधासु च। प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनं। तेषां गृहसहस्राणि ददाह हुतभुक् तदा। राक्ष
४ सानां समासाद्य सर्वेषां क्षारकर्किणां। हेमचित्रतनुत्राणां स्रग्संघातमेदिनां। गदासिशूलहस्तानां खादतां
दशतामपि। शयनेषु महार्हेषु शयितानां तथैव च। त्रस्तानागच्छतां चैव पुत्रानादाय सत्वरं। तेषां दशसहस्रा
णि रक्षसां पुरवासिनां। अदहत्पावकस्तत्र जज्वाल च पुनः पुनः। सारवंति महार्हाणि गंभीरगुणवंति च। हेमर्चि
द्रचंद्राणि तपनीयानि भानिनिलानि च। रत्नचित्रगवाक्षाणि साधिष्ठानानि सर्वशः। मणिविक्रमचित्राणि स्पृशं
तीव च भास्करं। क्रौंचबर्हिणवीनां गौ। भूषणानां च निस्वनैः। नादितान्यचलाभ्यस्य वेश्मान्यग्निर्ददाह वे। कुल =१८९
नेन परीतानि तोरणानि चकाशिरे। विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे। सद्ध्म मालाद्दीप्ताव्रिंः संबभूव
हुताशनः। युगांत इव भूतानि दिधिक्षुरुज्वलश्च नः। ज्वालामालापरिक्षेपैर्ददाह पवनान्वितः। उच्छ्रवभीत
लोद्यौरो लंका रावणपालिता। तस्यां तु दह्यमानायां लंकायां वानरोत्तमाः। बभूवुर्हृष्टमनसो नदंतश्च महा
=२८५ बलाः। ते राक्षसान्बहून्तत्र प्रजह्युर्हरिपुंगवाः। विक्लिष्टपुर्हर्लने द्रीप्ते किंविद्दग्धान भयातुरान्। दृष्ट्वास्व
वराष्ट्रे म वनानां विसृजत्वे। धूमज्वालपरीतानां विषमं चित्रभानुना। क्वचित्संभूषितानीव दृश्यंते भवनानि
ना। वस्तुरत्नसमाकीर्णनानाधातुसमन्वितां। ददाह हुतभुक् लंकां तां वायुसमारितः। युगांताग्निसमं वह्निं
ज्वलितं लोमहर्षणं। ददृशुर्यो मनिलया लंकायां मुदिता नराः। कांचनानि विमानानि मुक्तावैदूर्यवंति च। दह्य
मानानि राजंते ज्वलेत्यग्निवन्तदा। धूमधूज्वालपरीतांगो बहुनादहताद्दिता। राक्षस्यो विनदंति स्म वह्निज्वाला

कपानामिषुभिः शितैः । शिरांसि ते तदा क्रुद्धाः नामा राक्षसपुंगवाः । तथैवाप्यपरे ते षां कपानाममितौजसः । प्रवा
रानन्तितो रुक्षः राक्षसास्तेतरस्विनः । धूतमन्योरुघानाश्च न्यं पतितोन्यमपातयत् । गर्हमाणोरु गर्हेन्योद्दष्टतम्
दृशत्तदा । दृष्ट्वा अन्योद्दष्टा अन्योद्दामी र्थ्यपरः पुनः । किं स्वासि किंमां हिंसीति तत्रान्योन्यमभाषत । तद्युद्धं तु गद
प्रासंमुष्टि शूलासि संकुलं । प्रावर्तत महारौद्रं युद्धं वानर राक्षसां । राक्षसान् दृशसप्तैव वानरा राक्षसाहवे । वान ९०
रानपि सप्तैव देशराक्षसपुंगवाः । प्रतिलंबित वस्त्राश्च विमुक्त कवचायुधान् । राक्षसान् दृश्यते प्रतिलंब्यास्तु पैवा
नराः पर्यवारयन् । वानरा राक्षसाश्चैव व्यतिषक्ताः परस्परं । आविष्ट एव युध्यंत अकुस्तुमलमकुलं । प्रवृत्ते
संकुले त्वर्थं तस्मिन् वारवरे स्थिते ॥ द्रुमे । अंगदोकंपनं वीर मासमादरणोकंदः । आक्रुष्यसोंगदमपिताड
यामास वेगतः । गदयाकंदं पनः श्रीमान् स पपातावलोपमः । संज्ञांप्राप्य न तेजस्वी विक्षेप शिषरं गिरेः । अर्दि
तस्त्राप तत्तस्य स पपात हतो भुवि । हत प्रवारा मथिता राक्षसेंद्रस्य सावमृ । उग्रामाभिमुखी हृ स्यं कंमनकर्सं
सुतो यतः । आपतंतीव वेगेन तां कंमो सांवरयिला वर्मृ । अथ योद्धुं महावेगि लक्ष्मलक्ष्मि प्लवंगमेः । सधनुर्धिवि
नां श्रेष्ठो निरुष्टो षिसमाहितः । मुमोचाशीविषप्रख्यान् शरान् हरि षु वीर्यवान् । तस्य ततुमुख्भमे पंःसशरंध
नुरुतमं । विघ्न तेवागताविश्वन् वियतां धनुर्योधा । तेन हाटकवर्मेन पत्रि णानित्रवाससा । आकंडलवि
कृष्टेन विव्याध द्विविदं बली । स तथाभि हतस्तेन विप्रमुक्त पदस्वरन् । निपपाता द्विकृत्यमोघि विद्योगाद
वेदनः । मिंदस्तुप्रातंरं द्रष्ट्वा विकलं गाढवेदनं । कंमनमभ्यपतत् क्रिद्धं प्रगृह्य महती शिलां । तां शिलां सलता
कालां तस्मिन् विक्षेप राक्षसे । तां बिभेद तदा कंमनः पति तां पंचभिः शरैः । संधाय सायकं तीक्ष्णं मुमोच सुस
माहितः । व(क्षस्य)पविते वासो मिंदं विव्याध राक्षसः । स वानरवरस्तेन मिंदस्तु दृढमाहतः । रुधिरात्कस्य ६८
तौ भ्रामाणि पपातानि मूर्छितः । ततोंगदस्तो पति तो मातुलाव निरुक्षिवान् । अभिदुद्राव वेगेन कंमनमा

=५२४

घोरा राक्षसेंद्राणामुत्तमं जन्यमयपघत। तेषां संरुद्ध्यमानानां सिंहनादांश्च कुर्वतां। शर्वरी राक्षसेंद्राणामुत्तमलासम
पघत। आदिष्टवान् रेंद्रेण सुग्रीवेण महात्मना। आश्रिता द्वारमासाद्य प्लवगा युद्धकांक्षिणः। यश्च वानितर्भक
क्षितेषु द्वारमाश्रियरावणं मन्यरा विशाल्। तस्य ज्ञं भित विक्षेपाद्भुजनामि तिर्संकुलः। रूपवानिकरूप
स्य मन्युगीत्रे भुजायत। स निकुंभं न कुंभं न कंभक सर्वं मजुभुजं गां। शेषयामास संक्रुद्धः संग्रामं राक्षसाधि
पः। शशास विनसवानि सराक्षसानुसुमहाबलः। वरितं गच्छते येवं क्रुद्धः सिंहस्वोन्नदन्। तेन सन्नोदिता
स्तेत्र नदा प्रक्वलितायुधाः। लंकाया निर्ययुर्धरिं नदंतो भीमविक्रमाः। कुंभकर्ण सर्वं मुक्तौ वारि परिगृह्य सम
मंभो महत्यश्रामिना पुनः। तत्र ताराधिपस्याभां स्तारणानां च ताश्चिवभाः। तयोरामर गाणां वं बलते समभा
सञ्चन्। तत्र वार्द्धिवदीप्तानां गृहाणां सागरः पुनः। भासाः संस्हः क्रपातालश्चलोर्मिभिः भुजुभेभ्रशं। तद्धानर बलं
घोरं राक्षसानां तथा बलं। दृष्टे शेक्तलितप्रासं किंकिणी शतनादितं। भीमातिमत्तमातंगहयवाहनसंकुलं। दृ
प्त शूलगदा शक्ति खड्गमुद्गरधारिव। हेमजालावितव्योम निशितालपरश्वधं। व्याघूर्णितमहाशस्त्रं घनसंस
क्त कार्मुकं। माल्यगंधसमुत्सेक समावितमहाबलं। घोरशूरसमाकीर्णं महदंबुदनिस्वनं। तलद्दृष्ट्वा बलमा
त्रि पेतुः कपिश्रेष्ठाः पतंगा इव सर्वतः। तेषां भुज परामर्शो घ्राणमृष्टपरिघांबुद्धः। राक्षसानाममुत्तत्र मेघानां स्त
नितामिव। ततो न्मता इवापेतुः कपयस्ते ययुः सवः। प्रगृह्यात स्तरुश्रेष्ठैः रघातेर्घातेश्चापि पिमुष्टिभिः।
दशानैः तक मीश्च शिलाविक्षिप्तमस्तकाः। सर्वे ते बलि निर्भिन्ना विचेरुस्तत्र राक्षसाः। ताथैवापतनां तेषां

काण्डं पा० २

सकाशात्।

सि पितुःश्च बलवत्तरः। त्वमेकोहि महावीर्यश्शक्रहस्तोरिमर्द्दनः। त्रिदशानपि संक्रुद्धो निर्जितारणमूर्द्धनि। वरदानात्
पितृव्यस्ते समेतान् दिव्यदानवान्। कुंभकर्णस्य वीर्येण सहते विबुधानपि। धनुषेन्द्रजितस्तुल्यः प्रतापाद्रावणस्य
त्वमेकोरक्षसां मध्ये श्रेष्ठोसि बलवीर्यतः। विमर्द्दमानव घोरेण समं तस्य मम त्वया। अद्य पश्यन्तु भूतानि शक्रशंबरयो
रिव। कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलं। पातिता अत्र वीराये च यान्तु पमतेजसः। उपालंभभयाच्चैव नासि
धारहतो मया। कृतकर्मा परिश्रान्तो विश्रान्तः पश्य मे बलं। तेन सुग्रीववाक्येन सावमानेन मानितः। अग्नेराज्यहु
तस्येव तेजस्तस्य व्यवर्द्धत। ततः कुंभः समुत्पत्य सुग्रीवमभिपद्य च। आजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना। वर्मच
स्फटितं चैव तस्य प्रसुस्राव च शोणितं। स तु मुष्टिर्महावेगः पतितोप्यस्थिसंचये। वेगेन महता तस्य तेजः समुपपद्य
त। वज्रनिष्पेषसंजाता ज्वाला मेरौ यथा गिरौ। स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः। मुष्टिं संवर्तयामास वज्र
वेगं महाबलः। ज्वलितानलसंकाशं रविमंडलसंनिभं। मुष्टिं संपातयामास कुंभस्योपरि वानरः। मुष्टिनाभिहि
मंगलः तस्तेन निपपात सुराक्षसः। लोहितांग इवाकाशात् दीप्तरश्मिर्यदृच्छया। कुंभस्य पततो रूपं भग्नस्योरसि मुष्टिना
[illegible] ईश्वरेणाभिपन्नस्य दहत्युगोपतेरिव। ततो हते तेन महापराक्रमे प्लवंगमानामृषभेन संयुगे। मही सशैला विचचाल
सागरा भयं च रक्षांसि अधिकं समाविशत्॥ इति युद्धकांडे कुंभवधो नाम॥ ॥निकुंभो भ्रातरं दृष्ट्वा सुग्रीवेण निपाति
तं। प्रदहन्निव कोपेन सुग्रीवं अभ्युदैक्षत। ततः स्रग्दाममाल्यं दत्तपंचांगुलं शुभं। आददे परिघं वीरो महेन्द्रशिखरो
पमं। विनद्धमायसैः पट्टैः हेमैः कीलितमायसं। यमदंडोपमं घोरं रक्षसां भयनाशनं। तमाविध्य महातेजा महाशक्रा
युधोपमं। विननाद विवृतास्यो निकुंभो भैरवस्वरं। उरोगतेन निष्केण भुजस्थैरपि चांगदैः। कुंडलाभ्यां च मृष्टाभ्यां
रूपाक्षसुविचित्रया। निकुंभो भूषणैर्भाति परिघेणायसेन च। यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुवान्। नाप
रिघाग्रेतवास्फोटाद्यनवग्रंथि महास्वनं। उज्ज्वाल च सधूमोत्र संघर्षादिव पावकः। नगर्या विटपावत्या गंधर्वनगरै ९
वरैरपि। सह चैवामरावत्या सर्वैश्च भवनैः सह। सतारागणनक्षत्रं सचंद्रं समहाग्रहं। नि

[illegible]

साधावे शिलां। तमापतंतीं वेगेन कुंभस्त्रिभिरायसैः। त्रिभिश्चान्यैर्बिभेद शुमातंगमिव तोमरैः। सशरौघविभि
न्नांगो वालिपुत्रः सपादपं। शिलावर्षमविर्याश्रो। माव वर्षरुक्विरं रिपौ। तं तत्र छेद तानू रक्षानू बिभेद च शिला। शरैः
कुंभकर्णात्मजः श्रूरो वालिपुत्रो समारिता। तमुघतशिलं क्रुद्धं आपतंतं तं सुवेगिनं। भ्रुवोर्विव्याध बाणाभ्यां उल्काभ्यामि
तिकुंजरं। अंगदः पाणिना नेत्रे विमृघ रुधिरोक्षिते। शालमासन्नमेकेन परिजग्राह पाणिना। तमिंदुकेतुप्रतिमं
शालं शाखभुजो बली। उत्ससर्ज गदो वेगात् तं ह्रादन्ववेक्ष्य च। सविछेद शितैर्बाणैः। सायकोद्भिभिः कुंभकर्णात्मजः सवात्रेः
ऊरष्ट्रे सुपुंखैर्दशभिस्तदा। ततः स कुंभः संधाय शरानग्निशिखोपमान्। अंगदस्य महावेगात् मुमोचोरसि रा
क्षसः। संकश्चाराणि संस्पर्शैः शरैः कांचनभूषणैः। विद्धितः शरवेगार्त्तैः पपात च मुमोह च। अंगदं पतितं दृष्ट्वा सा
दंतमिव कुंजरं। दुराधर्षं राजपुत्रं श्रशोद्विग्नमनपघत। अथ धूम्रः शिलाहस्तः कोपसंरक्तलोचनः। रिरक्षुरस्य
पततु अंगदं वानरर्षभः। जांबुवांश्च सुखेनाश्च वेगवद्वा वानरः। कुंभमभ्यद्रवत् दृष्ट्वा मेघागिरिमिवाश्रि स्तूर्णं
समादश्य पततस्तांस्तु वानरैर्जो सरश्चिनः। आवारयत् सबाणौघैर्वायुर्घोराणि वांबुदान्। तस्य बाणपथं प्राप्य नशे
करतिवर्तितुं। वानरेंद्रा महात्मानो वेलामिव महोर्मयः। तांस्तु दृष्ट्वा हरीन्सर्वान्शरवृष्टिनिवारितान्। अंगदं दृष्ट
तः स्त्वा भ्रातरं समहाहवे। अभिदुद्राव सुग्रीवः कुंभकर्णात्मजं रणे। शैलसानुचरं नागं वेगवान् केसरी यथा।
उत्पाद्य विविधान्वृक्षान् अश्वकर्णान् धवानपि। अन्याँश्च विविधान्वृक्षान्सं अविक्षेप रक्षसे। तांछादयंत
२५ माकाशं वृक्षवृष्टिं दुरासदां। कुंभकर्णसुतस्त्रिभिः शरैश्चिच्छेद नेकधा। अभिलक्षेण शीघ्रेण कुंभेन निशितैः शरैः
आचितास्ते द्रुमा रेजुः यथा घोराः शतघ्नयः। द्रुमवर्षं तु तच्छिन्नं दृष्ट्वा कुंभेन वीर्यवान्। वानराधिपतिः श्रीमान् म
हासत्वो न विव्यथे। निर्भिद्यमानः सहसा सहमानश्च तान् शरान्। कुंभस्य धनुराक्षिप्य बभंजेंद्रायुधोपमं। अवप्लुत्य ततः शी
घ्रं कृत्वा कर्म सुदुःकरं। अब्रवीत् कुपितः कुंभं भग्नश्रृंगमिव र्षभं। निकुंभाग्रज वीर्यं ते बलं च महदद्भुतं। सन्नतिश्च
ना प्रभावश्च तव वा रावणस्य वा। प्रह्लादबलिवृत्रघ्न ... मायाबलविशारदः। एकस्त्वमिह जातो

=स्य ३

शतविशारदः ॥ एवमुक्त्वा खरसुतं समुत्क्रम्यासनात्कृतं । स्वयंगांधैश्च माल्यैश्च वासोभिश्च समर्चयत् । रावणस्य वचः श्रुत्वा
शूरमानी खरात्मजः । बाढमित्यब्रवीद्दृष्टो मकराक्षो निशाचरः ॥ सोभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणं । रथमानी
यतां क्षिप्रं सैन्यं चैवानीयतां । तस्य तद्वचनं श्रुत्वा बलध्यक्षो निशाचरः । स्पंदनं च बलं चैव समीपे समुपानयत् । प्रदक्षि
णं रथं कृत्वा ह्यारुरोह निशाचरः । सूतं संनोदयामास शीघ्रं मां सत्त्वाहय ॥ अथ तान्राक्षसान्सर्वान्मकराक्षोब्र
वीदिदं । आगच्छत तत्र यास्यामो पुरतो मम राक्षसाः । अहं राक्षसराजेन रावणेन महात्मना । आज्ञप्तः समरे हंतुं तावुभौ
रामलक्ष्मणौ । अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः । शाखामृगं च सुग्रीवं वानरांश्च शरोत्तमैः । अद्य शूलनिपाते
र्वानराणां महाचमूं । प्रदक्षिष्यामि संप्राप्य शुष्केंधनमिवानलः ॥ मकराक्षवचः श्रुत्वा ते तु घोरा निशाचराः । सर्वे ना
नायुधोपेताः बलवंतो जिवेगिनः ॥ ते कामरूपिणः शूराः दंष्ट्रिणः पिंगलेक्षणाः । मातंगा इव नर्दंतो ध्वस्तकेशा नि
शाचराः । परिवार्य महावीरं महाकायं खरात्मजं । अभिजग्मुस्ततो हृष्टाश्चालयंतो वसुंधरां । शंखभेरीसहस्राणां
आहतानां च सर्वतः । क्ष्वेडितास्फोटितानां तु तत्र शब्दो महानभूत । प्रभृष्टोपकरात्तस्य प्रतोदः सारथेस्तदा । प
पात सहसा चैव राक्षसस्य रथध्वजः । तस्य ये रथयुक्ताश्च हया विक्रमवर्जिताः । चरणैराकुलैर्गत्वा साश्रुपा
तमुखा ययुः । प्रवाति पवनस्तस्य सपांशुः खरनिस्वनः । निर्याणे तानि रौद्रस्य मकराक्षस्य दुर्मतेः । तानि दृष्ट्वा नि
मित्तानि राक्षसा वीर्यसंमताः । अचिंत्य गताः सर्वे यत्र तौ रामलक्ष्मणौ । घनगजमहिषांगतुल्यवर्णाः सम
रमुखेष्वसकृद्गदासिभिन्नाः । अहमहमिति युद्धकौशलास्ते रजनिचराः परिबभ्रमुर्नदंतः ॥ इति मकरा
क्षनिर्याणं नाम सर्गः ॥ ॥ निर्गतं मकराक्षं ते दृष्ट्वा वानरपुंगवाः । आप्लुत्याप्लुत्य सहसा योद्धुकामा व्यवस्थिताः ।
ततः प्रवृत्तं युद्धं तु तुमुलं लोमहर्षणं । निशाचरप्लवंगानां देवानां दानवैरिव । शरशूलनिपातैश्च शिलापरि ७०
घपातनैः । अन्योन्यं पोथयंति स्म तदा कपिनिशाचराः । शक्तिशूलगदाखड्गैः तोमरैश्च निशाचराः । पट्टिशै
र्भिंडिमालैश्च बाणपातैश्च संततं । प्रासमुद्गरखड्गैश्च निर्घातैरायसैस्तथा । कदनं कपियूथानां चक्रुस्ते

निकुंभपरिघोद्धूतं भ्रमतांबनमस्थलं। दुरासदः सुसंक्षोपात् परिघाभरणप्रभः। कोपोद्धितो निकुंभाग्निर्युगांताग्नि
रिवोत्थितः। राक्षसा वानराश्चैव न शेकुः स्पंदितुं भयात्। हनुमांस्तु विवृत्योरस्तस्थौ प्रतिमुखो बली। परिघोपमबाहु
ः सपरिघं भास्करप्रभं। बलवान्वै च तस्तस्य पातयामास वक्षसि। स्थिरे तस्योरसि व्यूढे परिघः शतधा गतः। विकी
र्यमाणः क्रमयात्कक्ष्माशनिरिवांबरे। स तु तेन प्रहारेण विचचाल महाकपिः। परिघेण समाधूतो यथाभूमिच
लेऽचलः। स तथाभिहतस्तेन हनुमान् प्लवगर्षभः। मुष्टिं संवर्तयामास वज्रवेगोपमं बली। तमुद्यम्य महातेजा नीयोनि
कुंभं प्रतिजग्मिवान्। अभिसंपातयामास वेगवान् समिमर्द्दिषु। ततः प्रस्फोटचर्मास्य प्रववर्त्तं शोणितं तदा। मुष्टिना ते
न संजज्ञे ज्वाला विद्युदिवोत्थिता। स तेन प्रहारेण व्यर्जन्म तत्कुक्र मुहुर्मुहुः। आस्कंधे पुधिजग्राह हनुमंतं स राक्षसः। त
ततो रक्षोभिराक्रुष्टं आसीर्लंकागतैरपि। निकुंभेनोद्धृतं दृष्ट्वा हनूमंतं जयैषिणा। स तथा ह्रियमाणोपि कुंभकर्ण
सुतं तदा। निजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना। उत्क्षिप्यास हनूमंतं निपिपेषाशु वीर्यवान्। मोक्षयित्वा तथा
त्मानं क्षितिमभ्यवपद्यत। अथैनं निष्पन्नुत्पपाताशु निकुंभं मारुतात्मजः। निजघान महावीर्यो मुष्टिना राक्षसोत्तमं।
स तथा हन्यमानोपि कुंभकर्णात्मजो बली। आजघानानिलसुतं वज्रकल्पेन मुष्टिना। स तथाभिहतस्तेन प्रमघ नयने कपि
समुत्पत्य स वेगेन निपपातास्य वक्षसि। स परिगृह्य च बाहुभ्यां आवृत्य च शिरोधरां। अपातयत्तस्य शिरो भैरवं नदतः
स्वरं। अथ विनदति स्फुदिते निकुंभे पवनसुतेन बभूव तत्र युद्धं। दशरथसुतराक्षसेंद्रसून्वोर्भृशतरमागतरो
षयोः सुभीमं॥ इति निकुंभवधो नाम सर्गः॥ निकुंभं निहतं दृष्ट्वा कुंभं चैव निपातितं। रावणः परमामर्षी प्रज
ज्वाल यथानलः। नैर्ऋतः क्रोधशोकाभ्यां द्वाभ्यां तु परिमूर्छितः। ततः संचिंत्य मनसा दशग्रीवश्चिरात्तु स्वयं। खरपुत्रं वि
शालाक्षं मकराक्षमनोदयत्। गच्छ पुत्र मयाज्ञप्तो बलेन महता वृतः। राघवं लक्ष्मणं चैव जहि तौ च वनौकसः।
शाल्पसुद्धर मे क्षिप्रं स्वापारुषपुपात्रितः। अयं ते राक्षसं लुवार ए एतेनानुगमिष्यति। खरस्य सदृशो वीर्यैः क्रमस्प
॰मितविक्रमः। त्वं हि दिव्यास्त्रविद्वै च मायो

युद्धाः रुधिरार्द्रमुखाश्च पुष्टाः रक्तपक्षाः ङ्काश्च हि । खे गता वसुधां सेव अभिषंति समंततः । कक्क से किं वृथा मूढ बहून्यस
दशान्यपि । न रणे शक्यते जेतुं विना युद्धेन वाग्बलात् ॥ एवमुक्तस्तु रामेण खरपुत्रो निशाचरः । बाणौघानमुमुचे
तस्मै राघवाय रणाजिरे । तान् शरान् शरवर्षेण रामश्चिच्छेद नैकधा । निपेतुर्भुवि ते छिन्ना रुक्मपुंखाः सहस्रशः ।
ततो युद्धमभूत्तत्र समेत्यान्योन्यमोजसा । खरराक्षसपुत्रस्य रामस्य च महात्मनः । जीमूतयोरिवाकाशे घोषात तलयो
स्तयोः धनुर्मुक्तः स्वनोत्सृष्टः श्रूयते हि रणाजिरे । देवदानवगंधर्वाः किंनराः समहोरगाः । अंतरिक्षगताः सर्वे द्र
ष्टुकामास्तदद्भुतं । विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते परः । कृतप्रतिकृतेन्योन्यं कुर्वीते तौ रणाजिरे । शरौघसंतताः
सर्वा दिशः स विदिशस्तथा । संछिन्ना वसुधा नैव समंतात् न प्रकाशते । राममुक्तांस्तु तान् बाणान् राक्षसो विच्छिन
द्रणे । रक्षोमुक्तांश्च रामो वै नैकधा प्राच्छिनच्छरैः । ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद वैषुभिः । अष्टाभिरथ नाराचैः
सूतं विव्याध राघवः । भित्वा परं रथं रामो रथ्याद्श्वानमोदयत् । विरथो वसुधां प्राप्य मकराक्षो निशाचरः । अधि
कं क्रोधसंरब्धः शूलं जग्राह पाणिना । त्रासनं सर्वभूतानां युगांताग्निसमप्रभं । परिभ्राम्याथ तत् शूलं प्रज्वलंतं स निशा
चरः । क्रोधात् संप्राहिणोत्तस्मै राघवाय महात्मने । आपतंतं ज्वलंतं तं खरपुत्रकरच्युतं । बाणैः स त्रिभिराकाशे श
लं चिच्छेद राघवः । तत् छिन्नं बहुधा शूलं दिव्यहाटकभूषितं । विदार्यं तं महोल्केव रामबाणार्दितं भृशं । तत् शूलं नि
हतं दृष्ट्वा रामेणाद्भुतकर्मणा । साधु साध्विति भूतानि व्याहरंते नमस्तले । तत् दृष्ट्वा विफलं शूलं मकराक्षो निशाच
रः । मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत् । स तं दृष्ट्वा विफलं शूलं मकराक्षो पतंतं तं प्रहस्य रघुनंदनः । पावका
स्त्रं ततो रामः संदधे स्वशरासने । तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे । संछिन्नहृदयस्तत्र पपात च ममा
र च ॥ ततस्ते राक्षसाः सर्वे मकराक्षे निपातिते । लंकामेवाभ्यधावंत रामबाणार्दितास्तदा । दशरथनृपपुत्रबाणवे
गै रजनिचरं निहतं खरात्मजं तं । ददृशुरतिबलं सुराः प्रहृष्टा गिरिमिव वज्रहतं द्रुणदिशासं ॥ इति मकराक्ष ७१
वधो नाम सर्गः ॥ ॥ निहतं मकराक्षं तु दृष्ट्वा रामेण संयुगे । शक्रजित्तु महान् क्रुद्धो विवेश रणसंकटं ॥ छ ।

रजनीचराः। शरैरग्निशिखामालैः खरपुत्रेण वानराः। संत्रान्तमनसः सर्वे दुःखेनुर्भयपीडिताः। तान् दृष्ट्वा राक्षसाः
सर्वे द्रवमाणान् वानरान् राक्षसः। ते दुस्ते सिंहवत् हृष्टाः युद्धे तोक्षितकाशिनः। विद्रवत्सु ततस्तेषु वानरेषु समंततः। राम
स्तान् वारयामास शरवर्षेण राक्षसान्। वारितान् राक्षसान् दृष्ट्वा मकराक्षो निशाचरः। क्रोधानलसमाविष्टो वचनं चेद
मब्रवीत्। क्वासौ रामः सुदुर्बुद्धिर्येन मे निहतः पिता। जनस्थाने गतः पूर्वं सानुजः सपरिच्छदः। अद्य गंतास्मि वैरस्य
पारं विरजनीचराः। सुहृदां च विवसर्वेषां निहतानां रणाजिरे। हत्वा रामं सुदुर्बुद्धिं लक्ष्मणं वा निशाचराः। तयोः शोणि
तैः स्पंदैः करिष्ये सलिलक्रियां। एवमुक्त्वा महाबाहुः युद्धे स्वरजनीचरः। आलोकयत् ततः सर्वं बलं रामदिदृक्ष
या। आहूयमानो बहुभिः वानरैर्बलिशालिभिः। युद्धाय स महातेजा रामादन्यं न वेक्षति। मार्गमाणस्ततो रामं बल
वान् रजनीचरः। रथेनाम्बुदघोषेण विचरन् तामनीकिनीं। दृष्ट्वा राममहत्स्वर्कं लक्ष्मणं वा निशाचरः। सशरपाणिना
हृष्टचित्तं वचनमब्रवीत्। तिष्ठ राम मया सार्धं द्वंद्वयुद्धं प्रयच्छ मे। त्याजयामि तत् याजयिष्यामि धनुर्मुक्तैः शितैः शरैः
यत्तदा दंडकारण्ये पितरं हतवानसि। अनागसं स्वकर्मस्थं क्रत्वाको पौनिवर्तते। दृष्ट्वा ते वापि वाणानि दुरात्म
न्नमम राघव। यन्मया हि न दृष्टस्त्वं तस्मिन् काले महाहवे। दिष्ट्यासि गोचरं राम त्वं प्राप्तो मम गोचरे। दर्शने कांक्षिम
तस्य क्रुद्धान्तस्य सिंहस्येव वने मृगः। अद्य मद्बाणवेगेन प्रेतानां विषयं गतः। ये त्वया निहताः शूराः तैः सह त्वं समेष्यसि
बहुनात्र किमुक्तेन शृणु राम वचो मम। पश्यंतु लोकाः सकलाः त्वां मां च विचरणाजिरे। अस्त्रैर्वा गदया वापि बाहुभ्यां वा
महाहवे। अभ्यस्तं येन यद्राम वर्तितं तेन नो मृधं। तेन मां प्रति युध्यस्व येन ज्ञातोसि सत्कुले। अद्य मद्बाणनिर्भिन्नांस्त्व
त्वां गंधि तिजो क्षितं। क्रव्यादः संघाः कुर्वंतु रणे रणपरिस्कृतं। मद्बाहुगोचरगतः सांप्रतं न विषति। मकराक्ष
वचः श्रुत्वा रामो दशरथात्मजः। अब्रवीत् प्रहसन् वाक्यं उत्तरोत्तरवादकं। चतुर्दशसहस्राणि रक्षसां त्वत्पिता च सः। त्रि
शरा दूषणश्चैव हता मे दंडके वने। स्वादितास्त्वंतमांसेन गृध्रगोमायुवायसाः। भविष्यं। यद्य मे पापतीक्ष्णैः ... नखा

तेहन्यमानाबाणौघैस्तेनामित्रेणसंयुगे। शालमाश्रवसंपेतुर्वानराःसर्वतोदिशं। केचिद्दारुरुहुर्वृक्षान्
केचिद्धारणीधरान। केचिन्निद्रुद्रुकुयसहसावानरास्तुगतासवः। केचित्तत्रयुर्युधं ते योधव्रतमनुव्रताः। तेन
दायोधिनस्तस्यसंग्रामेदृष्टविक्रमाः। विज्ञायवानरान्सर्वान्इंद्रजित्समितिंजयः। रणात्परिययौश्री
घ्रंस्वांपुरींरावणपालितां। हतेषुतेषुरक्षःसुरावणोराक्षसाधिपः। आदिदेशाथसंक्रुद्धोरणायेंद्रजितंपु
त्रं। जहिवीरमहावीर्योरणेराघवलक्ष्मणौ। अदृश्योदृश्यमानोवासर्वथात्वंबलाधिकः। वानरानेवसुग्रीवं
वानरार्थैर्विभीषणं। त्वमप्रतिमकर्माणंइंद्रंजयसिसंयुगे। किंपुनर्मानुषौदृष्ट्वानहनिष्यसिपुत्रक। तथोक्तो
राक्षसेंद्रेणपरिगृह्यपितुर्वचः। यज्ञभूमौसविधिवत्जुहावाग्निमथेंद्रजित्। जुह्वतिस्थापितत्वाग्निंरक्षसो
भीमकर्माणः। आजग्मुस्तत्रविक्रांताराक्षसायत्ररावणिः। दर्भाश्शरपत्राणिसमिधोप्यबिभीतकाः। लोहितानिव
वासांसिश्रुवंकार्ष्णायसंतथा। सर्वतोग्निंसमास्तीर्यशरपत्रैःसतोमरैः। छागस्यकृष्णवर्णस्यक्रिवाजग्राह
शोणितं। जुहावसमहातेजाततोवह्निर्महार्चिषः। बभूवुस्तानिलिंगानिविजयंप्रतितस्यवै। प्रदक्षिणावर्तशिखः
तप्तहाटकसंनिभः। हविस्तत्प्रतिजग्राहपावकःस्वयमुत्थितः। हुत्वाग्निंतर्पयित्वाचदेवदानवराक्षसान्। आ
रुरोहरथंदिव्यमंतर्धानगतंशुभं। सवाजिभिश्चतुर्भिश्चबाणैश्चनिशितैर्युतः। आरुह्यमानोवपुषातपनीय
विभूषितः। शरैश्चंद्रार्धचंद्रैश्चसरथःसमलंकृतः। जांबूनदमहाकंबुदीप्तपावकसंनिभः। बभूवेंद्रजितः
केतुर्वैडूर्यसमलंकृतः। तेनवादित्यकल्पेनब्रह्मास्त्रेणाभिपालितः। सबभूवदुराधर्षोरावणिःसमहाबलः।
भुजवीर्येणवत्रामानूअस्त्रेणचसमायुतः। सोभिनिर्यायनगरात्इंद्रजित्समितिंजयः। हुत्वाग्निंराक्षसे
मंत्रैः अंतर्धानगतोब्रवीत्। अद्याहंतौमहावीर्यौमिथ्याप्रव्रजितौरणे। जयंपित्रेप्रदास्यामिहत्वातौरा
मलक्ष्मणौ। अद्यनिर्वानरामुर्वीहत्वाराघवलक्ष्मणौ। करिष्येपरमप्रीतिमित्युक्त्वांतरधीयत। अत्युग्रातस ७२
संक्रुद्धोरावणेनप्रचोदितः। तीक्ष्णकार्मुकनाराचैःपर्जन्यइव

ततो युद्धं समभवत् राक्षसानां वानरैः सह । निघ्नतां तत्र चान्योन्यं निशाचरवनौकसां । आक्रीडमिव रुद्रस्य घ्नतः कालात्यये
पशून् । रावणिस्तु सुसंक्रुद्धो तान् वानरान् निशाचरान् । युध्यंत सर्वतो हृष्टा वानराणां जिघांसया । ततस्ते राक्षसा
ः सर्वे नर्दतो युद्धकांक्षिणः । अभ्यवर्षंस्तदा घोरा वानरान् शरवृष्टिभिः । ते वध्यमानाः समरे वानराः पादप
युधाः । अभ्यद्रवंत ततः सहसा राक्षसान् भीमविक्रमाः । केचित् शृंगाणि संगृह्य मुष्टिभिश्च घ्नन्तापरे । वा
नराः समरे तस्मिन् राक्षसान् रुक्षराहवे । जानुभ्यां निकृताः केचित् वानरैस्ते निशाचराः । बभ्रमुर्नष्टसं
ज्ञाश्चैव मत्ताः पर्वतशादिताः । भग्नजंघोरुपृष्ठाश्च केचित् विनिहताः भुवि । अभ्यद्रवंत ततः सहसा राक्षसा
भीमविक्रमाः । भिन्नोष्ठा भिन्नहनवो राक्षसा भिन्नमस्तकाः । सुस्रुवुः शोणितं भूरि नागा गैरिकधातु
मिवात् । निहता तेऽन्यमानौ । अथ पतद्भिः पर्वतैरपि । स्वनद्भिर्नष्टचेष्टैश्च क्रूरमायोधनं बभौ । राक्षसाश्च
रुवः स्तत्र निहता वानरैरपि । प्राधावंत ततः परे यत्र कालं कामेव निशाचराः । तेषां आक्रंदतां लंकां त्रवकंपे समं
ततः । वानरास्ते भयार्तानां राक्षसानां समं ततः । इंद्रजिच्च ततः क्रुद्धो महामास महाबलः । वानराणां शरा
राणि व्यविधज्रावणात्मजः । शरेणैकेन चहरान् नवसप्तच पंच च । बिभेद स महान् क्रुद्धो राक्षसान् संप्र
हर्षयन् । स शरैः सूर्यसंकाशैः शातकुंभविभूषितैः । वानरान् समरे भीमः अममाथ सुदुर्जयः । ततोष्टा
दशभिर्बाणैः द्विविदं गंधमादनं । विव्याध दशभिश्चैव नलं हरादवस्थितं । सप्तभिश्च महावीर्यो नीलं मर्म
इंकृति त विदारणैः । पंचभिर्निशातैश्चैव गवाक्षं विव्याध मार्गणैः । अपरैः सप्तभिर्बाणैर्वानरान् स रणाजिरे । त्र्यय
विध्यत लांकिं कं सप्तभिः सप्तभिः शरैः । ततस्ते वानराः शूराः भिन्नदेहा विचेतसः । व्यथिता विद्रवं तिस्म
रुधिरेण समुक्षिताः । केचिन्नार्तस्वरं चक्रुर्विभिन्ना वानरा रणे । रक्षोबाणहताः केचित् निपेतुश्च गतासवः ॥

नांतरखिन्नां। रोषताम्रेक्षणो वीरो निर्जगाम पुनर्बली। स पश्चिमेन द्वारेण प्रययौ राक्षसेश्वरः। इंद्रजित्तु परमोद्वि-
ग्न परेषां जयन्नत्र्यं। मेघनादस्ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ। रणायाभ्युद्यतौ वीरौ मायां प्रादुष्करोत्तदा। रथे
ततां व्यवस्थाप्य रावणी राक्षसैर्वृतः। सीतां मायामयीं कृत्वा तस्या वधमरोपयत्। स सर्वेषां मोहनार्थं कृत्वा बुद्धिं सु-
दुर्मतिः। हंतुं सीतां व्यवसितः कपीनामभितो ययौ। तं दृष्ट्वा त्वभिनिर्यांतं काननान्नू काननौकसः। उत्पेतुरभिसं-
रब्धाः शिलाहस्ता युयुत्सवः। हनुमान् पुरतस्तेषां जगाम हरियूथपः। उद्यम्य सुमहच्छृंगं पर्वतस्य दुरासदं।
स ददर्श निरानंदां सीतामिंद्रजितो रथे। एकवेणीधरां सीतां रक्षोहस्तवशंकृतां। परिक्लिष्टैकवसनां मंडनार्ह-
ममंडितां। रणरेणुसमादिग्धां मर्शरूक्षां वराननां। रजोमलाभ्यामालिप्तैः सर्वगात्रैर्विलक्षितां। ददर्श हनुमा-
न् तत्र सपंकामिव पद्मिनीं। मुहूर्तमिव सा तेध मिति निश्चित्य यत्नतः। बभूवाविरदृष्टा हि तेन सा जनकात्मजा। तां
दीनां मलदिग्धांगीं रथस्थां प्रेक्ष्य मैथिलीं। बाष्पपर्याकुलमुखो हनुमान् व्यथितोऽभवत्। अब्रवीत्तां विशोकार्तां निरा-
नंदां तपस्विनीं। दृष्ट्वा सीतां रथस्थां तां रावणेः सुदुरात्मनः। किं विकर्षितमस्येति चिंतयन्स महाकपिः। सह तैर्वान-
रैः सर्वैरभ्यधावत रावणिं। तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्छितः। कृत्वा विकोशं निस्त्रिंशं प्रजहास महास्वनं
रा प्रगृह्य वसनं केशेषु रावणिर्जनकात्मजां। क्रोशंतीं रामरामेति दृष्ट्वा मायामयीं तदा। पंडरंतिमसिं गृह्य केशपक्षे परामृश-
त्। गृहीतां तां तदा दृष्ट्वा हनुमान् दैन्यमागतः। सुदुःखं वारि नेत्राभ्यामुत्सृजन् पवनात्मजः। अब्रवीत्परमक्रुद्धो रावणिं
परिभर्त्सयन्। नृशंसानार्य दुर्वृत्त क्षुद्र पापविनिश्चयः। ब्रह्मर्षीणां कुले जातं राक्षसीं योनिमाश्रितं। धिक् त्वां पाप-
समाचारं यस्य ते मतिरीदृशी। अनार्येनाधृते कार्यं ईदृशं सुविगर्हितं। च्युतां गृहाच्च राज्याच्च रामहस्ताच्च मैथिलीं
अनागसं तु विवशां त्वं पापां किं जिघांससि। सीतां हत्वा न चिरात् जीवितं मोक्ष्यसे ध्रुवं। वधार्हैः कर्मणा तेन मम ह-
स्तगतोऽद्यसि। ये च स्त्रीघातिनां लोका ये चैव वध्यघातिनां। इह जीवितमुत्सृज्य प्रेत्यतानुप्राप्स्यसे। एवं ब्रुवाणो ७३
हनुमान् बहुभिर्वानरैर्वृतः। अभ्यधावत संक्रुद्धो राक्षसेंद्रसुतं प्रति। आपतंतं तदानीकं तदा भीमं वनौकसां।
राक्षसानां भीमकर्माणां समरे प्रत्यवारयत्। तं बाणसहस्रैस्तु विक्षोभ्य हरिवाहिनीं। परिवार्य हनुमंतं प्रत्यु-

तीक्ष्ण रश्मिमान् । तं तु विज्ञाय संप्राप्य सरथं राम लक्ष्मणौ । धनुष्पाणि ततो रुष्टावादित्याम्यस्त्राणि वा रुरुतुः प्रकाशयन्तौ
तौ गगनं शरजालैर्महाबलौ ॥ तौ बाणैः सूर्यसंकाशैः निवृत्तं घ्नन्तरासुरं । स बाणैरशनिं विविधांस्ततश्चैनं प्रकाशयन् श्रीराम
न्तः । सर्वादिशश्च संक्रुद्धो नाशार तिमिरावृतः । निर्घोषा घात निर्घोषो नापि नाकिंशुरश्वनः । क्रूरक्रूरेण नरतस्त विजय ठा
स्य नवरूपं प्रकाशयते ॥ रथेन नानातिमिरावृते न र मा किरे व्योम्नि समाश्रितेन । जुहु संशाखामृगयूथपानां व कुरी ॥
कारकव्यानिरपोप्रकृष्टः ॥ इंद्रजित युद्धं नाम सर्गः ॥ घनांधकार तिमिरे शिलानर्थमभ्यतुनः । वर्षसमहाबा युद्ध
हुर्नीरावशरवर्षिमान् । स रामं सूर्यसंकाशैः घोरैश्च निशितैः शरैः । बिभेद समरे क्रुद्धः सर्वगात्रेषु रावणिः । क्वार
तौ हन्यमानौ नाराचैर्व्रजैरान्निरिव पर्वतौ । हेमपुंखान्नरव्याघ्रौ बाणान्मुमुचतुः शरैः । अंतरिक्षान् समासाद्य
रिपुंकं कपतत्रिणः । निकृत्ता पन्नगा भूमौ निपेतुः शोणितस्रवाः । अतिमात्रं शरौघेण पाड्यमानो रघूत्तमः । रा
शीन्स पतताम्भूमौ अप्येकैकं द्विधाकरोत् । यतो यतो हि दृदृशे शरा नापतन् शिताः । ततस्ततो दाशरथिर्विस
सर्जशरोत्तमान् । रावणिस्तु ततश्चार्धं रथे नातिरथः पतन् । विव्याध तौ राजपुत्रौ रघुश्रेष्ठौ निशितैः शरैः । तेना
तिविद्धौ तौ वीरौ रुक्मपुंखैः शितैः शरैः । बभूवतुस्सदारे त्वां बंधुजीव स्वजौ पुमो । नास्य वेद गतिं किंचिन्नरूप
न धनुस्स्वनं । न चिवास्य ग्रितिकश्चित्सूर्यस्येवाभ्रसंप्लवे । तेन विद्धा श्च हरयो निहिताश्च गतासवः । निपेतुः श्त
शस्त्रबलिनो धरिणीतले । लक्ष्मणस्तु संक्रांतं क्रुद्धो भ्रातरमब्रवीत् । ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसां
तमुवाच ततो रामो लक्ष्मणं शुभलक्षणं । नैकस्य हेतो रक्षांसि सर्वे शोहं तु महेसि । अयुध्यमानं प्रच्छन्नं प्रांजलिं
शरणागतं । बालं प्रसुप्तं मत्तं वा न त्वं हंतु मिहार्हसि । आस्यैव तु वधे यत्नं करिष्यावो नरर्षभ । आदेक्ष्यावो महावे
गानकामगान्हरिस्त्रूपपान् । एतं वमार्गयिष्यंति दृष्ट्वा वानरपुंगवाः । इंद्रं धेर्षभ्रूमिं निशते कुरामारसातलं
वा प्येनं नभस्तलं वा । यद्य निगूढो हि मदस्त्रदिग्धः पतिष्यते भूमितले गतासुः । इत्येवमुक्त्वा वचनं महात्मा यशास्य प्र
वीरः प्लवगर्षभैर्वृतः । वधाय रौद्रस्य नृशंसकर्मणः तदा महात्मा त्वरितं निरैक्षत । इंद्रजिद्वधादेशः सर्गः ॥
स विज्ञाय मतिं तस्य राघवस्य महात्मनः । संनिवृत्याहवात्तस्मात्प्रविवेश महापुरीं । सो करोद्रवधं तेष्वां राक्षसः ।

=सरामः ।१

क्षसानां कदनं चकार स महाबलः। ततो वानरसैन्येन कालांतकयमोपमः। स तु शोकसमाविष्टः कोपेन
तु महाकपिः। हनुमान् राक्षसरथे पातयन् महतीं शिलां। तमापतंतीं दृष्ट्वा स रथः सारथिना सह। विधे
याद्य समाश्रु युक्तः सहस्रमपवाहितः। तमिंद्रजितमप्राप्य स सारथिरथं तदा। विवेश धरणीं भित्वा सा शि
ला यत्र तां गता। राक्षसानामनीकस्य बीभत्सं इंद्रजित् माहवे। मुक्त्वा युयुत्सुना धीरं सारथिं वाप्य पूरयन्। प
तितायां शिलायां तु रक्षसां व्यथितं तं वर्मं। तामभ्यधावन् नुशतशो नर्दंतः कानरनैकशः। ते क्रमाश्च महाकाया
न गिरीणां शिखराणि च। अक्षिपन् द्विषतां मध्ये वानरा भीमविक्रमाः। वानरेस्ते महावीर्या भीमरूपा निशा
चराः। वार्यादमिरि नाच दे विंति रुद्धे शिलातले। स्वसैन्यमभिवीक्ष्याथ वानरार्दितमिंद्रजित्। अगृह्णादायु
धं क्रुद्धः परानभिमुखो ययौ। स शरौघानवासृजत् स्वसैन्ये नाभिसंवृतः। जघान कपिशार्दूलान् सुब
क्षिप्तः हून् स्वयंतोकमानान्। शूलैरशनिभिः खड्गैः पट्टिशैः पाशमुद्गरैः। ते वाप्यनुचरास्तस्य वानरान् ज
घ्नुराहवे। सस्कंधविटपैः शालैः शिलाभिश्च महाबलाः। हनुमान् कदनं चक्रे रक्षसां भीमकर्मणां। स
निवार्य परानीकमब्रवीत्तान् वनौकसः। अवर्तंतो निवर्तध्वं तेनः साध्यमिदं बलं। त्यक्त्वा प्राणान् हि योद्धारो यूयं
रामप्रियचिकीर्षया। यन्निमित्तं च युध्यामः सा हता जनकात्मजा। इममर्थं च विज्ञाप्य रामसुग्रीवयोर्द्व
योः। तौ यत्प्रतिविधास्येते तत्करिष्यामहे पुनः। इत्युक्त्वा वानरश्रेष्ठो राक्षसान् वारयन् स्वयं। शनैः शनै
रसंभ्रांतः सबलः संनिवर्तयत्। ततः प्रेक्ष्य हनूमंतं। व्रजंतं यत्र राघवौ। निकुंभिलामथासाद्य जुह
वाग्निं तमिंद्रजित्। यज्ञभूम्यां तु विधिना पावकस्तेन रक्षसा। हूयमानः प्रजज्वाल जपहोमवषट्कृतः। ७४
सोऽर्चिष्मान् ददृशे वाप्यां पूयशोणितवान् पुनः। संध्यागत इवादित्यः परिवेषसमन्वितः। अथेंद्रजित्

ब्रवीदिंद्रजित्तदा। सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः॥ तां हनिष्यामि वैदेहीं एषाद्य तव पश्यतः। इमां
हत्वा ततो रामं लक्ष्मणं त्वां च वानरं। सुग्रीवं च हनिष्यामि तं चानार्यं विभीषणं॥ न हंतव्याः स्त्रियश्चेति यद्ब्रवी
षि प्लवंगम। पीडाकरममित्राणां यत्स्यात्कर्तव्यमेव तत्॥ तमेवमुक्त्वा रुदतीं सीतां मायामयीं ततः। शितधा
रेण खड्गेन जघानेंद्रजित्स्वयं। यज्ञोपवीतमार्गेण छिन्ना तेन तपस्विनी। सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शि
ना। तामिंद्रजित्स्त्रियं हत्वा हनुमंतमुवाच ह। मया रामस्य पश्येमां कामे पत्नीं विनाशितां॥ एवं खड्गेन रुदतीं हत्वा
तां चारुदर्शनां। आस्थितः सरथे हृष्टो विननाद महास्वनं। व्यावृत्तास्यस्य नदतः तमुग्रं भीमदर्शनं। वानराः शु
श्रुवुः शब्दं अनुरूपमवस्थिताः॥ तमशनिपटुवेगनिस्वनं विननदितमिंद्रजितो महास्वनं। रिपुभयजन
नं निशाम्य ते भयचकिता हरयश्च प्रकंपिरे॥ तथा तु सातां विनहत्य दुर्मतिः प्रहृष्टचेताः स बभूव रावणिः॥ प्र
हृष्टरूपं तं निरीक्ष्य वानराः विषण्णरूपाः समभिप्रदुद्रुवुः॥ विषण्णचित्ता बलिनं बलायसो बलाधिकं रा
क्षबलप्रमर्दनं। विहाय संग्रामशिरोगतं तदा प्रतस्थिरे वायुसुतं तरस्विनं॥ इत्यार्षे श्रीरामायणे युद्धकांडे सी
तावधोनाम सर्गः॥ ॥ श्रुत्वा तं भीमनिर्ह्रादं शब्दं शक्राशनिस्वनं। वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः॥
तानुवाच हरीन् सर्वान् हनुमान्मारुतात्मजः। विषण्णवदनान् दीनान् त्रस्तान् विद्रवतः पृथक्॥ किमि
दं विषण्णवदना विद्रवंति प्लवंगमाः। त्यक्त्वा युद्धसमुत्साहं शूरत्वं वः क्व तद्गतं॥ पृष्ठतोनुव्रजध्वं मामग्रतो यां
तमाहवे। शूरैरभिजनोत्पन्नैः न युक्तं विनिवर्तितुं॥ इत्येवमुक्ताः हरयः समारोपितविक्रमाः। शैलशृंगा
णि जगृहुः क्रमांश्च निविधान् बहून्॥ अभिपेतुश्च नर्दंतो राक्षसान्वानरर्षभाः। परिवार्य हनूमंतं अन्वयु
स्ते महाहवे। सर्वैर्वानरमुख्यैस्तु हनुमान् परिवारितः। हुताशन इवार्चिष्मान् व्यदहत् शत्रुवाहिनीं॥ सरा

वध्यंते वधकर्माणो यद्यधर्मेण राघव । वधकर्महतो धर्मः स हतः किं करिष्यति ॥ अथवा विहितेनायं हन्यते हंति
वापरं । वधेन लिप्यते तेन तस्मात् पापेन कर्मणा । अदृष्टः प्रतिसंहारो यदि पापस्य कर्मणः । कथं शक्यं प
रं प्राप्तुं धर्मेणारिविनाशनं । अथ वै दुर्बलं रुक्षा बलं धर्मो न वर्द्धते ॥ दुर्बलोऽहतमर्यादो न सेव्य इति मे मतिः ॥
पुरुषे बले स्याद्य दि वा हर्षो गुणभूतः समानहः । धर्ममुत्सृज्य वर्त्तस्व यथा धर्मे तथा बले ॥ अथ वे सत्यवचनं धर्मः किल
धर्मस्य परो मतः । अनृतस्त्वं स्य करुणः किं न बद्धः पिता त्वया । अथ स्वर्गमतं दानं धर्मोयमिति राघव । धर्ममूलफलं छिन्नं राज्य
मुत्सृज्य त्वया ॥ अर्थेभ्यो हि समृद्धेभ्यः संभृतेभ्यस्ततस्ततः । क्रियाः सर्वाः प्रवर्त्तंते पर्वतेभ्य इवापगाः । अर्थेन हि
विहीनस्य पुरुषस्याल्पमेधसः । व्युच्छिद्यंते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा । सोयमर्थं परित्यज्य सुखका
मः सुखैधितः । पापमारभते कर्त्तुं तत्र दोषो हि जायते । यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बांधवाः । यस्या
र्थाः स पुमान्लोके यस्यार्थाः स च पंडितः । यस्यार्थाः स महाभागो यस्यार्थाः स गुणान्वितः । यस्यार्थाः स च विक्रांतो
यस्यार्थाः स च बुद्धिमान् । यस्यार्थास्तस्य सर्वार्था यस्यार्थाः सोऽध सम्मतः । यस्यार्थो धर्मकामार्थास्तस्य सर्वं
प्रदक्षिणं । अधनेनार्थकामेन कर्तुं धर्मो न शक्यते । अर्थैरर्थी हि बध्यंते गजैर्वनगजा इव ॥ अर्थैस्यैते परि
त्यागे दोषाः प्रव्याहृता मया । राज्यमुत्सृजता वीर या तु बुद्धिस्त्वया कृता । धर्मः क्रोधश्च कामश्च हर्षो दर्पः क्रतं दपः । अ
र्थादेतानि सर्वाणि प्रवर्त्तंते न संशयः । येषामर्थे द्धयं लोकः न रतां धर्मचारिणां । ते नार्थास्त्वयि दृश्यंते दुर्दिनेषु
यथा ग्रहाः । धनमर्जय काकुत्स्थ धनमूलमिदं जगत् । विशेषं नाधिगच्छामि निर्धनस्य मृतस्य च । वंगलश्च दरिद्रश्च द्वा
वेतौ सदृशौ मम । वंगलस्य न गच्छंति दरिद्रो न प्रयच्छति । त्वयि प्रव्रजिते वीर पितर्युपरते तथा ॥ रक्षसापहृता भार्या प्रा
णैः प्रियतरा सुता । तव सह्यमिदं घोरं दुःखमिंद्रजिता कृतं । कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव । अहमन ७५
घ तवाग्नितः प्रियार्थं जनकसुतानिधनं च संनिरीक्ष्य । सरथगजहयां सराक्षसेंद्रां भृशमिषुभिर्विनिपातयामि
लंकां ॥ =

येषु धर्मश्च ते ध्रर्वाः फलं स्यादेव मेतयोः। यावदर्थं व्यवर्धन्ते ये ह्यधर्मः सुदारुणः। १५ यत्र॥

राक्षसराजस्य कुर्जुत्तावहर्यं विधिनाविधिज्ञः। दृष्ट्वा व्यतिष्ठंत नराक्षसास्ते महासमूहेषु नयानयज्ञाः।
इति वानरापसर्पणो नाम॥ ॥राघवश्चापि बलवान् न कातरक्षसवानोकसां। कृत्वा संग्राममनिर्वीर्यं जीव
वंतमुवावह। सोम्यनूनं हनुमतो निर्यसंग्राममूर्द्धनि। श्रूयते हि महान् नामः सुमहानायुधस्वनः
तज्जक्ष्व रुसाहाय्यं स्वबलेनाभिसंवृतः। अगच्छत् पश्चिमं द्वारं हनुमान् यत्र वानरः॥ अथायांतं हनूमं
तं ददर्श द्वीपतिः पथि। वानरेस्त कृत संग्रामे स्वसज्जिरिव संवृतं। दृष्ट्वा पथि हनूमंतं तं दृष्टि बलमुद्धतं
नीलमेघवयप्रख्यं समेत्य श्रय वर्तयत्। स तेन सह सैन्येन संनिकर्षं महात्मनः। शाश्रमागम्य रामस्य
दुःखितो वाक्यमब्रवीत्। यत्तानां युध्यमानानामिषतां प्रेक्षतां वनं। उद्यानरुदतीं सीतां इंद्रजित् पा
पनिश्चयः। छत्रांत वेतनो दृष्ट्वा विषण्णो दुर्मरिंदम। नमसामहतामांतो विज्ञापयितु मागतः। तस्य तद्व
वनं श्रुत्वा रामो दुःखेन मूर्छितः। निपपात तदा भूमौ छिन्नमूल इव द्रुमः। तं भूमौ देवसंकाशं पतितं प्रे
क्ष्य राघवं। अभिपेतुः समुत्पत्य सर्वतः कपिसत्तम पाः। शिषिचुः सलिलैश्चैनं पद्मोत्पलसुगंधिभिः
प्रदहंतमसह्यं च समिद्ध मिव पावकं। लक्ष्मण स्तं तु बाहुभ्यां परिष्वज्य सुदुःखितः। उवाच राममास्व
स्थं वाक्यं हेत्वर्थसंमितं। शुभे वर्त्मनि तिष्ठंतं त्वामार्य विजितेंद्रियं। अनर्थेभ्यो न शक्नोति त्रातुं धर्मो नि
रर्थकः। भूतानां स्थावराणां च जंगमानां च दर्शनं। यथास्ते न तथा धर्मस्तेन सत्येन नास्तिसौ। यद्विध धर्मो २
र्ममिव सत्वो रावणो नरकं व्रजेत्। भवांश्च धर्मसंयुक्तो नेदं व्यसनमाप्नुयात्। तस्य च व्यसनाभावात्
व्यसाने चागते त्वयि। धर्मेनोपलभ्येद धर्ममधर्मेणापि धर्मतां। यद्यधर्मेण युध्येरन् ये ह्यधर्मः सुदारुणः
अनर्थाय येषु धर्मश्च तस्माद्धर्मो निरर्थकः॥

दिशा महाबाहो लक्ष्मणं शुभलक्षणं । रक्षसस्तस्य नाशाय वज्रं वज्रधरो यथा ॥ मनुजवर न कालविप्रकर्षो रि
पुनिधनं परिमार्गतां क्षमं नः । त्वरतिसृज रिपोर्वधाय बाणानसुरवरोन्मथनाय वि यथेंद्रः ॥ समाप्तक
र्मा हि स राक्षसेंद्रो भवत्यसाध्यः समरे सुदुर्जयः । युयुत्सतां तेन समाप्तकर्म्मणा भवेत्सुराणामपि संशयो म
हान् ॥ इति विभीषणसमाश्वासनो नाम सर्गः ॥ ॥ तस्य तद्वचनं श्रुत्वा चिंताशोकपरिप्लुतः । नोपधारयते
व्यक्तं यदुक्तं तेन रक्षसा । ततो वीर्यमवष्टभ्य तं रामः परपुरंजयः । विभीषणमुपासीनमुवाच वदतां वरः ।
नैरृताधिपते वीर वचो यत्कं किं विभीषण । पुनस्तच्छ्रोतुमिच्छामि वद यत्ते विवक्षितं ॥ राघवस्य तद्वाक्यं श्रु
त्वा वाक्यविशारदः । ततः पुनरिदं वाक्यं बभाषे स विभीषणः । यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनं ।
तत्तथानुष्ठितं वीर त्वद्वाक्यसमनंतरं ॥ सेनान्यानि सर्वाणि विभक्तानि समंततः । न्यस्ताश्च यूथपाः श्रेष्ठा
यथान्यायं विभागशः । भूयस्तु मम विज्ञाप्यं त्वमिदं श्रोतुमर्हसि । त्वय्यकारणतस्ते हि संतप्तहृदया वयं ।
यज्ञ राजन्निमं शोकं मिथ्या श्रुतमुपागतं । मायया यत्कृतं तेन राक्षसेन दुरात्मना । तत्त्वं त्यज तां चिंतां
शत्रुहर्षविवर्धिनीं । उद्यमः क्रियतां वीर हर्षः समुपसेव्यतां । प्राप्तव्या यदि ते सीता हंतव्यो यदि ते रिपुः
रोचतां ते महाबाहो मद्वाक्यमिदमूर्जितं । साध्वयं यातु सौमित्रिः सहास्माभिर्नरर्षभः । निकुंभिलां महा
बाहो निहंतुं रावणात्मजं । स तु विभक्तिर विक्रि नि राशाविषविषोपमैः । शरैर्हंतुं महेष्वासो रावणिं समि
तिंजयः । तपसा तेन वीरेण वरदानात् स्वयंभुवः । अस्त्रं ब्रह्मशिरः प्राप्तं गामगाश्च हयोत्तमाः । स एव वि लक्ष्मणः
उद्यान दृष्टे वास्य धीमन्तत्पुण्यकर्मणः । निकुंभिलामसंप्राप्तं अकृताग्निं च यो रिपुं । तामाह्वयिष्यते युद्धे इंद्रशत्रो
स ते वधः । इत्येवं तस्य विहितो वधोपायो दुरात्मनः । वर तस्य वधाय त्वं मयस्येव पुरंदरः । वधोस्य विहितो
राम हेतुमिहं त्वमर्हसि । हते तस्मिन्हतं विद्धि रावणं ससुहृज्जनं ॥ विभीषणवचः श्रुत्वा रामो लक्ष्मणमा ७६

इति श्रीरामायणे रामाश्वासनो नाम ॥ ॥ राममाश्वास्यमाने च लक्ष्मणेनाथ वत्सले । अवेक्ष्य गुल्मानुसक्तानान्
तत्र प्राप्तो विभीषणः । नानाप्रहरणैर्भीमै राक्षसै राक्षसेश्वर परिवेष्टितः । महामेघनिकाशैश्च मातङ्गैरिव यूथपैः
सोभिगम्य महावीर्यो राघवस्य समीपतः । ददर्श वानरान् दीनान् ससुग्रीवान् सलक्ष्मणान् । राघवं च महावी
र्यं इक्ष्वाकुकुलबान्धवं । ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमास्थितं । पीडितः शोकसंतप्तः प्रेक्ष्य रामं विभीष
णः । अन्तर्दुःखेन दीनात्मा किमेतदिति सोऽब्रवीत् । तं विषण्णमुखं दृष्ट्वा ध्यानयुक्तं विभीषणं । उवाच लक्ष्मणो
=ताः वाक्यमिदं मन्युपरिप्लुतः । हतामिन्द्रजिता सीतां श्रुत्वैव राघवं । हनुमद्वचनाद्वीर ततो मोहमुपागतः । कथयानं
वा सौमित्रिं संनिवार्य विभीषणः । पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत् । मनुजेन्द्रार्तरूपेण यदुक्त
स्त्वं हनुमता । तदयुक्तमहं मन्ये सागरस्येव संक्षयं । अभिप्रायं तु जानामि रावणस्य दुरात्मनः । सीतां प्रति
महाबाहो न स तां घातयिष्यति । याच्यमानो हितार्थं तु वाक्यैर्धर्मार्थसंहितैः । वैदेहीमुत्सृजस्वेति न तत्
कृतवान् वचः । नैव साम्ना न दानेन न भेदेन कुतो युधा । अनिरस्तेन वैदेही शक्या मोक्तुं न शक्यते । यदात्र अहि
षबलं संग्राममुपयाति स रावणिः । चैत्यं निकुम्भिला नाम तत्र कृत्वा प्रतिष्ठति । स कृते विकृताशेषे देवैरपि सवा पतोपि
सवैः । भवत्यवध्यः संग्रामे बलवान् रावणात्मजः । तेन त्वयं निमित्तार्थं नूनं माया प्रदर्शिता । विघ्नमन्विच्छता ते
न वानराणां पराक्रमे । तत्र सुग्रीवसैन्यानां लक्ष्मणस्य च धीमतः । नयविघ्नकरी तेन सा माया संप्रदर्शिता ॥ निकुं
भिलायां काकुत्स्थ जुहोति हि न संशयः । सबलास्तत्र गच्छामो यावत्तन्न समाप्यते । त्यजेमं नरशार्दूल मिथ्या
संतापमात्मनः । सीदते हि बलं कृत्स्नं त्वां दृष्ट्वा शोककर्शितं । इह त्वं स्वस्थहृदयस्तिष्ठ त्वारि विनाशने । लक्ष्मणं
प्रेषयास्माभिः सह सैन्यानुकर्षिभिः । एष तं नरशार्दूलो रावणिं निशितैः शरैः । त्याजयिष्यति तत्कर्म प्राणाने
श्चांश्च संयुगे ॥ तस्य ते निशिता बाणाः सुपत्राः कङ्कवाससः । पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितं । तदा

स्यैः शतशोपि किरन् शरैः। अतिक्रमाम हे यद्गं तस्य कर्म समाह्वये॥ निना ष एव वः कवा सं प्रहृष्टः सत त्तन एव
राक्षसेषु महानागं शरवर्षमवर्षत। रुद्धाः शाषाम गा विवरे क्त शैलशिलायुधाः। अभ्यधावंत संहृष्टाः स्तदानीं क
पिसिंसवः। परे त्वथ शतैः शूलैः असि भि पट्टिशैः शरैः। उद्यतैस्वरिता सस्कः कपीन भिघ्नांसवः। स संप्रव
त्तः सुमहान् संग्रामः कपिरक्षसां। राघवेन पूरयन् लंकां जलद प्रतिमस्वनः। राक्षसैश्च विविधाकारैः शतशाखैश्च
पादपैः। उद्यतैः पर्वताग्रैश्च घोरमाकाशमावाभो। राक्षसा वानरैंद्रैश्च निकृत्तानन बाहवः। निपातयंत शस्त्रा
णि वक्रुः सुमहतीव्र णान्। केचिद्गृक्तैः स शिलाके बलवंतो वानौकसः। अभिजग्मुश्च दृश्च समरे राक्षस
र्षभाः। रुद्रवानर मुख्यैश्च महाकायैर्महाबलैः। रक्षसां वध्यमानानां महन्नय मजायत। स्वमनीकं विषमं
दृष्ट्वा राक्षसनिरर्दितं। उत्तस्थाविंद्रजिच्छीघ्रं असमाप्येव कर्मतत्। स तु कर्म हृपत्तुवं त्वे मन्युं शल्पमिवोद्धृत्य। प
रित्यज्य बलं दानं निःक्रांतस्तु सशाक्रजित्। वृक्षांधकारात्स निःक्रम्य पूर्व सत्रद्धं स वीर्यवान्। आरुरोह रथं
दिव्यं वाजिभिर्भीघर्सनिभिः। स भीमकार्मुकरथः कालांतक यमोपमः। रक्षास्य नयनक्रुद्धो बभौमत्यकरि
वापरः। दृष्ट्वैव तु रथस्कंत मभ्यधावत तो बलं। वानराणां सुभमानां युद्धाय रिपुमाह्वये। तस्मिंस्तु काले हनुमा
न् आरुरोहस्तु दुरारुहं। धरणीधरसंकाशं महावृक्षं महाबलः। रक्षसां तान्यनाकानि कालाग्निरिव निर्दहन्। व
वकार महतोमार्गं राक्षसेषु महाकपिः। विधुं सर्वतं तं तरसा राक्षसान् मारुतात्मजं। परिवव्रुः सहस्राणि राक्ष
सानां समंततः। शितशूलधराः शास्त्रैः शक्तिभिश्च समुज्जारैः। घोरैः परमुनिस्वाद्वैभिं डिमालैश्च राक्षसाः शक्ति
भिः शक्तिहस्ताश्च पट्टिशैः पट्टिशायुधाः। परस्वधैर्घनुर्भिश्च गदाभिर्ग्गोणगोर्रपि। पराधे[illegible]मुखं भिश्च
क्रैः सकणयैरपि। शतशश्च शतघ्नीभिरायासैरपि मुज्जरैः। मुष्टिभिर्वज्रकल्पैश्च तालैश्चाशनिनिस्वनैः। न
खैर्दंतैश्च वीराणां अद्यापि द्यापमिक्रुर्तां। अभिजग्मुः समासाद्य सर्वता प्वर्वतोपमं। ते षामभिसुसंक्रुद्ध श्चका २२

मब्रवीत् ॥ जानामि तस्य रौद्रस्य मायायामेतां दुरात्मनः ॥ स हि दिव्यास्त्रवित्तात विहायसगमो रणे ॥ करोत्यसंज्ञा
न् संग्रामे देवानपि समागतान् ॥ तस्यांतरिक्षे चरतः सरथस्य परंतप ॥ न गतिर्वेदितुं शक्या सूर्यस्येवा
भ्रसंप्लवे ॥ तं मायागमनं प्राप्तं महावीर्यमरिंदम ॥ जहि बाणैरिदं कर्म कुरु सत्यपराक्रम ॥ यदृक्षराजस्य ब
लं तेन सर्वेण संवृतः ॥ रक्षो जांबुवता सार्द्धं अनेन च हनूमता ॥ गच्छ त्वं राक्षसेंद्रस्य तनयं जहि लक्ष्मण ॥
जेतारं वज्रहस्तस्य समरे च दुरासदं ॥ अयं त्वां सचिवैः सार्द्धं महात्मा रावणानुजः ॥ अभिज्ञस्तस्य देशस्य
पृष्ठतोनुगमिष्यति ॥ स रामस्य वचः श्रुत्वा लक्ष्मणः परवीरहा ॥ जग्राह कार्मुकश्रेष्ठं अन्यं भीमपराक्रमः ॥
स संनद्धः शरी खड्गी कवची हेमजालवान् ॥ रामपादावुपस्पृश्य हृष्टो राघवमब्रवीत् ॥ अद्य मत्कार्मुकश्रेष्ठ
त्शराः संभिद्य रावणिं ॥ लंकामभिपतिष्यंति हंसाः पुष्करिणीमिव ॥ अद्य धक्ष्यंति भित्वा तं महाबाणा मया
विकल्पिताः ॥ शरीरं तस्य रौद्रस्य क्रूरराशिमिवानलः ॥ इत्येवमुक्त्वा वचनं धृतिमान् भ्रातुरग्रतः ॥ प्रिया
सूरावणिं युद्धे लक्ष्मणो निर्जगाम ह ॥ भ्रातरं सोभिवाद्याथ कृत्वा चाभिप्रदक्षिणं ॥ निकुंभिलामभियया
इंद्रं रावणिमाहवे ॥ विभीषणेन सहितो राजपुत्रः प्रतापवान् ॥ कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणो निर्ययौ तदा ॥ वा
नराणां सहस्रैश्च बहुभिर्बलवान् सह ॥ विभीषणश्च सामात्यो रामभ्रातरमन्वियात् ॥ महाकपिबलौघस्तु संपत
स्तिन पर्वतः ॥ ऋक्षराजबलं चैव महात्म मिव नादयन् ॥ स गत्वा दूरमध्वानं सौमित्रिर्मित्रनंदनः ॥ सह क्रं सेनबलं दू
रात् अपश्यत व्यूह्यसंस्थितं ॥ स संप्राप्य महाबाहुः स्वस्य योगं महाबलः ॥ तस्थौ ब्रह्मास्त्रविधिमान् लक्ष्मणः शुभ न दो
णः ॥ विमेजविविधं चापं भास्करं तत्र धर्जगत् नंदनं महारथि श्रुतं ॥ प्रतिजयकरमप्रमेयवेगं स्तिमितमिवाद्विषतांबलं वि
वेश ॥ लक्ष्मणप्रयाणो नाम सर्गः ॥ ॥ अथ तस्मिन्नवसरे लक्ष्मणं रावणानुजः ॥ परेषामहितं वाक्यं स्वार्थसाधनं
मब्रवीत् ॥ अस्य सैन्यस्य महतो भेदने यततां लक्ष्मण ॥ राक्षसेंद्रसुतोप्यत्र भिन्ने दृश्यो भविष्यति ॥ शाघ्रमिषाशानिप्र

हेतव्यद्व्यकर्त । २ क ८ के १

परेषां मन्यतां गतः। नितक्रिथलया बुध्या त्वं वेत्सि मत्त इन्तरं। कन स्वजन संवासः कन नाचजना अयं गुण
वान् वा परजनः स्वजनो वापि निर्गुणः। निर्गुणः स्वजनः श्रेयान् यः परः पर एव सः। निरनुक्रोशता चेयं ता
दृशी ते निशाचर। स्वजनेन त्वया शक्या प्रतिष्ठातुं सुखानि च। यदि त्वं परुषाण्युक्तः पित्रा मम निशाचर। गो
रवात्प्रणयाद्वापि ताद्येव परिसान्त्वितः। यद्येव प्रणयाद्वापि गुरुत्वं दत्ति विस्त्रयं। ताद्येव स पुनर्मृष्टुलालयथ
विचारयन्। क्रुद्धेनैकृजिता वाक्यं परुषं रावणानुजः। उक्तः पित्र्यः पुत्रेण प्रत्यक्षवान विभीषणः। अज्ञान
त्विव मह्वालं किं त्व मेवं व्रवीषि मां। राक्षसेन्द्रसुतानार्य परुषं त्यक्तगौरवं। अयुक्तरूपं वचनं पौलस्त्यकु
लपांसन। अधर्मेण रुलङ्गानो न त्वं वेत्सि गुणागुणान्। कुले यद्यपि जातोऽहं रक्षसां क्रूरकर्मणां। गुणो यः
प्रथमो नृणां तन्मे शीलमराक्षसं। न रमे दारुणेनाहं न रज्ये पापकर्मणा। आता विषमशीलेन कथं त्व
या निवास्यते। परस्वानां च हरणं परदाराभिमर्शनं। सुहृदामतिशंका च त्रयो दोषाः क्षयावहाः। महर्षीणां
वधो घोरः सर्वदेवैश्च विग्रहः। क्रोधश्चैवातिमानश्च वैरत्वं प्रतिकूलता। एते दोषा हि मे भ्रातुर्जीवितैश्वर्य
नाशनाः। गुणाः प्रच्छादिताः सर्वे पर्वतास्तोयदैरिव। एतैर्दोषैः परित्यक्तो न मे भ्राता पिता तव। नैवमस्ति
पुरी लंका न त्वं न च ते पिता। अतिमानी च दृष्टश्च दुर्विनीतश्च राक्षसः। वंकालपाशैर्बद्धस्त्वं बुद्धिमां यद्य
दिक्क्षसि। प्रवेष्टुं न त्वया शक्यो न्यग्रोधो यं निशाचर। धर्षयित्वा न काकुत्स्थं न शक्यं जीवितुं त्वया। युध्यस्व
नरदेवेन लक्ष्मणेन रणे समं। न च प्रवेक्ष्यसे लंकां कृतेऽन्यु ग्रोधमध्यतः। विदर्शय त्वं स्वबलं समुद्यतः कु
रुध्यस्व सर्वायुधसाधनव्ययं। न लक्ष्मणस्येपथहि बाणगोचरं त्वमद्यगत्वा न सवलो गमिष्यसि। इन्द्रजित
गर्ह्लो नाम सर्गः॥ ॥ विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्छितः। अब्रवीत्परुषं वाक्यं वेगेनाभिससा
र च। उद्यतायुधनिस्त्रिंशो रथे सुसमलंकृते। कालाश्वयुक्ते महति स्थितः कालान्तकोपमः। महाप्रमा
णमुद्यम्य विपुलं वेगवद्दृढं। धनुर्भीमबलो भीमं शरासनविक्षेपमान्। उवाच चैव सरथः सौमि ९८
त्रिं।

रकदनं महत् । तमपश्यत् कपिश्रेष्ठमनिलात्मजमिंद्रजित् । सूदयंतममित्रघ्नममित्रान्मारुतात्मजं । ससारथि
मुवाचेदं शत्रुमियाद्धि महाकपिं । क्षयमेव हि नः कुर्यात् राक्षसानामुपेक्षितः । इत्युक्तः सारथिस्तेन रथेनाति
ययौ कपिं । वहन् परमदुर्धर्षं स्थितमिंद्रजितं रणे । सोभ्यपेत्य शरान् घोरान् पट्टिशासिपरश्वधान् । अपा
तयत् दुर्द्धर्षो रावणिः कपिमूर्द्धनि । हनूमंतं जिघांसंतं समुद्यतशरासनं । रावणात्मजमाचष्ट लक्ष्मणाय
विभीषणः । असौ वासवनिर्जेता रावणस्यात्मसंभवः । स एष रथमास्थाय हनुमंतं जिघांसति । तमप्रति
मकर्माणं शरैः शत्रुविनाशनैः । सौमित्रे जहि तं छिंधि निर्वर्षशरोत्तमैः ॥ इत्येवमुक्तस्तु तदा महात्मा
विभीषणेनातिविभीषणेन । ददर्श तं पर्वतसन्निकाशं रथे स्थितं भीममरवं नदंतं ॥ इतींद्रजिद्दर्शनो नामस
र्गः ॥ । स एवमुक्त्वा सौमित्रिं वरमाणो विभीषणः । धनुःपाणिं समादाय लक्ष्मणं रावणानुजः । अविदूरं त
तोगत्वा प्रविश्य च महद्वनं । दर्शयामास तत्कर्म लक्ष्मणाय विभीषणः । नीलजीमूतसंकाशं न्यग्रोधं घोरमाकृ
तं । तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत् । इहोपहारं भूतानां बलवान् रावणात्मजः । उपहृत्य ततः पश्चा
त्संग्राममभिवर्त्तते । अदृश्यः सर्वभूतानां ततो भवति राक्षसः । निहंति समरे शत्रून् बध्नाति च शरोत्तमैः । त
मप्रविष्टं न्यग्रोधं बलिनं रावणात्मजं । विध्वंसय शरैस्तीक्ष्णैः सरथं साश्वसारथिं । तथेत्युक्तो महातेजा
सुमित्रानंदिवर्द्धनः । बभूवावस्थितस्तत्र चित्रं विस्फारयन्धनुः । स रथेनाग्निवर्णेन बलवान् रावणात्मजः
इंद्रजित्कवची खड्गी सध्वजः प्रत्यदृश्यत । लक्ष्मणस्तमुवाचाथ रावणिं रघुनंदनः । समाह्वये त्वां समरे सौ
म्यग्युद्धं प्रयच्छ मे । एवमुक्तो महातेजा मनस्वी रावणात्मजः । अब्रवीत्परुषं वाक्यं दृष्ट्वा तत्र विभीषणं । इह त्वं जात
संवृद्धः साक्षाद्भ्राता पितुर्मम । कथं द्रुह्यसि पुत्राय पितृव्यो मम राक्षस । न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते
प्रमाणं न च सोदर्यं न धर्मो धर्मदूषण । शोच्यस्त्वमसि दुर्बुद्धे निंदनीयश्च साधुभिः । यस्त्वं स्वजनमुत्सृज्य ।

=सवयस्य त्वं २

इत्येकापंचपर्वाणं शाकसौत्र धृरितं शरं। निवस्थानमहावेगं लक्ष्मणो रावणात्मजे। स शरेणाहतस्तेन सरोषो
रावणात्मजः। सुत्रयुक्तैस्त्रिभिर्बाणैस्त्रिभिर्विव्याध लक्ष्मणं। स बाणो सुमहाभीमो नरराक्षससिंहयो
विमर्दस्सुमलोऽभूयः परस्परवधैषिणोः। उभौ हि बलसंपन्नावुभौ विक्रमशालिनौ। उभावपि च विक्रां
तौ सर्वशास्त्रास्त्रकोविदौ। उभौ परमदुर्धर्षौ उभौ परमतेजसौ। युयुधाते महात्मानौ ग्रहाविव नभोगतौ।
बलिशक्राविवायस्तौ युधि दुःप्रतिधर्षणौ। युयुधाते तदा वीरौ व्या[illegible]घ्रकेसरिणाविव। शितानंखसजौ तौ
हि मार्गणौघानवस्थितौ। नरराक्षससिंहौ तौ प्रहृष्टवदनौ युध्यतां। सुसंप्रहृष्टौ नरराक्षसौ तौ ततस्तदा
तिवंडौ शिनशास्त्रपाणी। रणे वभार्द्रकं समभिप्राप्नपेतुः। शरौघवेगेन यथा बलाहकौ॥ इंद्रजितुयुद्धेत्रि
केषयुद्धं नाम सर्गः॥ ॥ ततः शरान्दाशरथिः संधायामित्रकर्शनः। ससर्ज रक्षसे घोरान् ऊर्द्ध्वं आशीविषोविषो
पमान्। ततो घानलनिर्घोषमसहन् राक्षसात्मजः। निवर्त्यवदनोत्थाय लक्ष्मणं समुदैक्षत। तं विवर्णमुखं दृष्ट्वा राक्षसं
रावणात्मजः। सौमित्रिं युद्धसंसक्तं प्रेक्षमाणं विभीषणः। इंगितान्यनुपश्यामि यान्यस्मिन् रावणात्मजे। त्वरस्व नर
शार्दूल भग्न एष निशाचरः। ततः संधाय सौमित्रिः शरानग्निशिखोपमान्। मुमोच निशितान् तस्मै सर्पानिव महा
राग्नि विषान्। स वज्राशनिसंस्पर्शैः लक्ष्मणेनाहतः शरैः। मुहूर्तमभवन्मूढः सर्वसंक्षुभितेंद्रियः। उपलभ्य मुहूर्तेन
संज्ञां प्रत्यागतेंद्रियः। ददर्शावस्थितं वीरं आजौ दशरथात्मजं। सोऽभिचक्राम सौमित्रिं क्रोधसंरक्तलोचनः। अब्र
वीच्चैनमासाद्य पुनश्च परुषं वचः। किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमं। निरस्खस्त्वं सह भ्रात्रा यदा युधि वि
वेष्टितः। युवां खलु मया युद्धे वज्राशनिसमस्वनैः। पातितौ प्रथमं भूमौ विसंज्ञौ सपुरस्सरौ। स्मृतिर्नवास्ति ते
व्यक्तं व्यक्तं वा यमसादनं। गंतुमिच्छसि येन त्वं मां धर्षयितुमिच्छसि। यदि ते प्रथमं युद्धे न दृष्टो मत्पराक्रमः। अद्य ते
दर्शयिष्यामि तिष्टेदानीं स्थिरो भव। इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणं। दशभिस्तु हनूमंतं तीक्ष्णधारैः ७९
शरोत्तमैः। ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान्। क्रोधाद्द्विगुणसंरब्धो निर्बिभेद विभीषणं। स दृष्ट्वा राक्षसें

स विज्ञाय रणं । तां श्रुत्वा नरशार्दूलो न्यरस्य धनुमत्परक्रमं । अथ मकार्मुकोत्सृष्टं शरवर्षं सुदुःसहं । मुक्तं वर्षमिवाकाशे धा
रयिष्यथ संयुगे । अथ वो मामका बाणा महाकार्मुकनिःसृताः । गात्राणि विधमिष्यन्ति तूलराशिमिवानलः । तीक्ष्णसा
यकनिर्भिन्नान् भिंडिमालासिपट्टिशाः । अथ वो गमयिष्यामि सर्वानेव यमक्षयं । क्षिपतः शरजालानि क्षिप्रह
स्तस्य संयुगे । जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः । तच्छ्रुत्वा राघवेणोक्तं गर्वितं लक्ष्मणस्तदा । अभ्रात
व दिदृक्षुर्घोरो राक्षसं वाक्यमब्रवीत् ॥ न वाचा दुर्गमः पारः कार्याणां राक्षसाधम । कार्याणां कर्मणा पारं यो
गच्छति स बुद्धिमान् । सत्वमर्थस्य हीनार्थो दुरवापस्य केनचित् । वचो व्याहृत्य जानीषे कृतार्थोस्मि सुदुर्मते । अं
तर्द्धानगतेनाजौ यत्त्वया चरितं तदा । तस्कराचरितो मार्गो नैष वीरनिषेवितः । तदा हत्वपथं प्राप्य स्थितोहं तव रा
क्षस । दर्शयस्वाद्य यत्तेजो वाचा त्वं किं विकत्थसे । एवमुक्तो धनुर्भीमं परामृश्य महाबलः । विससर्ज शिता
न्बाणानिंद्रजित्समितिंजयः । ते निसृष्टा बलवता शराः सर्पविषोपमाः । संप्राप्य लक्ष्मणं पेतुः श्वसंत
इव पन्नगाः । शरैरतिमहावेगैर्वेगवान् राक्षसोत्तमः । सौमित्रिमिंद्रजित्युद्धे विव्याध शुभलक्षणं । सश
रेणातिविद्धांगो रुधिरेण विभूषितः । शुशुभे लक्ष्मणः श्रीमान् विधूम इव पावकः । इंद्रजित्त्वात्मनः कर्म प्र
समीक्ष्याथ राक्षसः । विनद्य सुमहानादं इदं वचनमब्रवीत् । अथ मत्कार्मुकोत्सृष्टाः शरास्तीक्ष्णाः सुपत्रिणः
आदास्यंति शरास्तेद्य जीवितं जीवितांतिकः । अद्य गोमायुसंघाश्च श्येनसंघाश्च लक्ष्मण । गृध्राश्च निपतंतु त्वां गता
सुं निहतं मया ॥ क्षत्रबंधुः सदानार्यो रामः परमदुर्मतिः । भक्तं भ्रातरमद्य त्वां द्रक्ष्यतीह मयाहतं । अपास्तक
वचो भिन्नचापविद्धशरासनः । हृतोत्तमांगो व्यथितः स्वप्स्यसि त्वं मयाहतः ॥ इति ब्रुवाणं परुषं राक्षसं राव
णात्मजं । हेतुमद्वाक्यमत्यर्थं लक्ष्मणः प्रत्युवाच ह । अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस । कुरु तत्कर्म ये
नाहं श्रद्दध्यां तव कत्थितं । अकृत्वा णो दहत्यग्निस्तथा तपति भास्करः । मथ्नाति पवनो वृक्षान् न वक्ति निर्विक
त्थसे ते ॥

पतत्वे॥ इति त्रिसप्ततितमः सर्गः॥ ॥ युध्यमानौ ततो दृष्ट्वा संसक्तौ नरराक्षसौ। शूरः स रावणभ्राता तस्थौ सं
ग्राममूर्द्धनि। विस्फारयामास तदा महद्धनुरवस्थितः। उत्ससर्ज च तान् तीक्ष्णान् शरानुबर्हवाससः। ते शराः शि
स्त्रग्नि हेस्रमाः खिसंकाशाः निःपतंतो समाहिताः। राक्षसान् दारयामासुः वज्रेण शैलयो यथा। विभीषणस्यानुचरास्तेपि शूला
सिपट्टिशैः। चिच्छिदुः समरे वीरान् राक्षसान् राक्षसोत्तमाः। राक्षसैस्तैः परिवृतः स तदा हि विभीषणः। बभौ म
ध्ये सप्रहृष्टानां कलभानामिव द्विपः। संचोदयमानस्तुर्द्दयें दानुवानरान्रणे। उवाच वचनं काले कालज्ञो रक्षसांव
=एकए =वीर रः। एकोयं राक्षसेन्द्रस्य परायणमवस्थितः। एतच्छेषं बलं तस्य निहतं किं प्लवंगमाः। अस्मिन्नु विनिहते पापे रा
क्षसे रणमूर्द्धनि। रावणो विनिहंतव्यः शेषमस्य बलं हतं। प्रहस्तो निहतो वीरो निकुंभश्च महाबलः। कुंभक
र्णश्च धूम्राक्षो निकुंभश्च महाबलः। अकंपनः सुपार्श्वश्च वज्रमाली च राक्षसः। महोदरश्चरस्तथो लंबकर्णो
महाहनुः। मकराक्षो तिकायश्च त्रिशिराश्चापि वीर्यवान्। प्रजंघो जंबुमाली च महापार्श्वश्च वेगवान्। यज्ञकोप
विरूपाक्षो वज्रमुष्टिश्च वीर्यवान्। सुप्तघ्नश्चाग्निकेतुश्च रश्मिकेतुश्च दर्पिताः। एतान्निहत्य संग्रामे बहून्राक्ष
ससत्तमान्। बाहुभ्यां सागरं तीर्त्वा लंघ्यतां गोष्पदं लघु। एतावदेव शेषं वो जेतव्यमिह वानराः। हताः सर्वे समाग
म्य राक्षसबलदर्पिताः। अयुक्तं निधनं कामं मया पुत्रस्य वानराः। नृशंसे राम उप्यर्थे अकार्यं नु विविधते। वध्ये
पायोवधश्चेतिस मदोषं रईघ्यां। तत्पातकमुपक्रम्य द्वार्थे रामसिद्धिं अयोउद्यन्। घृणामपास्य रामार्थे हन्मि विभ्रा
तरात्मजं। प्रहर्तुकामस्य तु मे विक्लव्यं जायते महत्। तदेनं विमहाबाहुर्लक्ष्मणः शमयिष्यति। वानराश्चाथ संरम्भ
मस्याहस्य समापगाः। इति तेना- तरसा राक्षसेनाभिनोदिताः। वानरेंद्रा जघ्नुरुक्षुः मैथानुद्धेनबर्हिणः। तेलक्ष्म
नदाः कपयः प्रेदस्मयुद्धे विभाषणं। म्रयोऽङ्गपिरे कामं त्वां गृह्य वानि नि निचिक्षिपुः। जांबुवानपितैः सार्द्धं यूथपे
र निसंहतः। असादयत पर्वताग्रैर्नखैर्दंतैश्च राक्षसान्। निघ्नंतमृक्षाधिपतिं राक्षसाः सन्निवृत्तः सह। परिव ८०॥
द्रुमैर्यथं अक्षतमेकं विविधायुधैः। घोरैः परश्वधनिस्त्रिंशदिहै भिंडिमालैश्च राक्षसाः। आजघ्नुरृक्षाधिपतिं निघ्नं

=मार्डनंकरिष्यामि।६

द्स्यकर्म्मरामानुजस्तदा। अचिंतयित्वा प्रहसन्नैतत्किंचिदितिब्रुवन्। अब्रवीत्तं शरान्घोरान् उग्रधन्वा नरपुं
गवः। अनीतवत्सुसंरब्धो रावणिं दितदर्गमो युधि। नैवं शूरा रिपुं हत्वा प्रहरंति निशाचर। तथैव अल्पवीर्या असु
खावहा मे शरास्त्वया। नैवं शूरा युध्यंते युद्धे विजयकांक्षिणः। इत्येवमुक्त्वा धनुना शरैरेनमवाकिरत्। अस्य बा
णैर्रपक्षं कवचं कांचनप्रभं। विशीर्यंत रथोपस्थे ताराजालमिवांबरात्। विक्षतवर्मा नाराचैर्बभूव स कृतव्रणः
इंद्रजित्समरे शूरः प्ररूढ इव सानुमान्। अभीक्ष्णं निश्वसंतौ हि युध्यमानौ महामृधे। शरसंकृत्तसर्वांगौ सर्वतो
रुधिरोक्षितौ। बभूवतुः सउं तौ हि मार्गणानन्नामक्रमेताः। तयोर्बभूव उभयोः सन्निपातो मुहुर्मुहुः। प्रवृत्तयो
र्यथाकाले नीलयोरिव मेघयोः। अस्त्राण्यस्त्रविदौ श्रेष्ठौ दर्शयंतौ पुनः पुनः। शरैरुच्चावचाकारैरंतरिक्षं बबंध
तुः। व्यपेतदोषमस्यंतौ लघुचित्रं च सुष्ठु च। दर्शयंतौ महाभीमं संग्रामं नरराक्षसौ। तयोः पृथक्पृथग्भीमः शु
श्रुवे तलनिस्वनः। सुघोरयोर्विभिन्नयोः यथा खे कालमेघयोः। सुवर्णपुंखैर्नाराचैर्बलवंतौ कृतव्रणौ। प्रसु
स्रुवाते रुधिरं जलं प्रस्रवणादिव। तयोः सुमुक्ता गात्रेषु रुक्मपुंखाः शरा युधि। असृग्दिग्धा विनिर्भिद्य विवि
शुर्धरिणीतलं। अन्ये सुनिशिता बाणा आकाशे घातिपावकताः। चर्मं छिदुश्चिच्छिदुश्चैव तयोर्बाणाः सहस्रशः
बाण दाम्भूत उत्पन्न संबभूवस्तदा बाणघोरो बाणमयश्चयः। अग्नेर्यथा विदीप्ताभ्यां ऊर्ध्वं बाणमयश्चयः। तयोः कृतव्रणौ देहौ शुशु
भाते महात्मनोः। सुपुष्पाविव निष्पत्रौ वने शाल्मलिकिंशुकौ। तयोर्गात्रेषु संलग्ना भांति नाराचसंचयाः। नद
त्पंकरुयोर्यद्वद् विमले वपयोदितौ। मत्वाहि परमेष्वासौ शास्त्रविशारदौ। नंदत्वंणौ रावणिं युद्धे रावणिश्चा
पि लक्ष्मणं। अन्योन्यं ताविनिर्घ्नंतौ नगजाविव बोध्यतौ। बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ। शु
शुभाते रणे तौ तु प्ररूढाविव पर्वतौ। तयोः शोणितसिक्तानि संवृतानि शरैर्भृशं। विरेजुः सर्वगात्राणि ज्वलंत इव
पावकाः। तयोरथ सुमहान् कालो व्यतीतो युध्यतो रणे। न च तौ युद्धवैमुख्यं श्रमं वाप्यभिजग्मतुः॥ अथ समरपरि
श्रमं निहंतुं समरमुखेष्वजितस्य लक्ष्मणस्य। प्रियहितमुपपादयन्महौजाः समरमुपेत्य विभीषणोऽ॥

वासुदेवंचमांचैवभिन्नंपश्यंतिये
नराः नतैःपूजितवानस्मिकृक
चैर्दारित्तोस्म्यहं १ भद्रकं शंकरद्वे
षिमद्वेषीशंकरः प्रियः ५ नाउभौन
रकंयांतियावद्दाभूतसंप्लवं २ तेषां
भेदविनाशायह्द्योहरिहरः स्वयं

तंदृष्ट्वादेवदेवेशानयातियममं
दिरं

[illegible]

प्रकार ॥ इति श्री रक्षप्रमर्द्दनो नाम सर्गः ॥ ॥ सहत्वा श्चो महातेजा म्ह मोति श्चनु निशाचरः ॥ इन्द्रजित् परमक्रुद्धः सं
प्रदृश्चाल तेजसा ॥ तौ प्रच्छिनौ ज्ञिघांसंता वन्योन्यमभित स्थितौ ॥ विक्रमाय्यालिनिःक्रांतौ वने गजरुषाविव ॥ वि
गर्जंता वन्योन्यं तौ राक्षसवानरोक्षसौ ॥ मत्तौ वीरे रुजे युद्धे संपेततं तौ ततस्ततः ॥ स उत्क्रोधात पितृव्यस्य क्रुद्धश्चापि हि लेर्दि
यित ॥ प्रगृह्य स्पर्द्धयश्चाप शरैर्लक्ष्मणमिन्द्रजित् ॥ मुमोचमिन्द्रजितानन्तं शरजालं महिस्तजत ॥ श्रीर्यवारयद्दसंत्रातामहा
तपरमक्रुद्धसहं ॥ लक्ष्मणेन्द्रजितौ तौ नारौ महाबलशरासनौ ॥ अन्योन्यं निशितैर्बाणैर्जघ्नतुर्भीमनिस्वनौ ॥ परस्पर
वधे वारौ निविष्टौ तौ महाबलौ ॥ वक्षस्युर्वीरमन्योन्यं शरजालाकुलं रणौ ॥ ललाटे लक्ष्मणो बाणैः सुघोरैस्त्रिभिरि
न्द्रजित् ॥ अमेघकवर्ण मध्या निर्व्याधलघुहस्तवत् ॥ शितैस्त्रिभिरद्दीनात्माल्ललाटस्थैः शरोत्तमैः ॥ लक्ष्मणः शुशुभे वी
रस्त्रिशृंग इव पर्वतः ॥ अर्दितस्तस्तथा बाणौघैस्तेनामित्रेण लक्ष्मणः ॥ उद्धवर्हे शरान्घोरान्रावणात्मजवारणात्
तमाशु प्रतिविव्याधवक्षः स्यः पंचभिः शरैः ॥ किंचिद्रोषपरीतात्मा रावणिं वदने शुभे ॥ ततः शोणितदिग्धांगौ लु
क्ष्मणेन्द्रजितावुभौ ॥ रणे विरेजतुर्वीरौ पुष्पिताविव किंशुकौ ॥ तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ ॥ शितैर्वि
विधतुर्बाणैः कृतभावावुभौ जये ॥ ततः परमवेगेन कुपितो रावणात्मजः ॥ विभीषणं त्रिभिर्बाणैर्विव्याधवदने
स्मे ॥ मुखे लंव त्रिभिर्विद्धा लक्ष्मणं शुभलक्षणं ॥ एकैकेनाभिविव्याध सर्वान्स्तान्हरियूथपान् ॥ तस्मिं ... धनु
ः क्रुद्धोत्तताश्वाय विभीषणाय ॥ वज्रस्पर्शसमांस्त्रीन्स ससर्ज निशितान्शरान् ॥ तेस्य कार्यं विनिर्भिद्य रुक्मपुंखा ब
हिः स्थिताः ॥ बभ्रुवुर्लोहिताद्दिग्धा रक्ताइव महोरुगाः ॥ स पितृव्याय संक्रुद्धः इन्द्रजिद्धरमाददे ॥ उत्तमं रक्षसां मध्ये म
य दत्तं महाबलं ॥ तं समादाय महातेजा महेषुं तेन संहितं ॥ लक्ष्मणोप्याददे बाणमन्यं भीमपराक्रमं ॥ कुबेरेण स्वयं दत्तं स
प्नेबाणां महात्मना ॥ दुर्जयं दुर्विषह्यं च सर्वैरपि सुरासुरैः ॥ ताभ्यां स्वधनुषो स्तत्र संहितो सायकोत्तमौ ॥ विकृष्यमा
णौ बलिनौ प्रविक्रमज उस्तदा ॥ तौ भासायं तावन्योन्यं धनुर्भ्यां निःसृतौ शिवौ श्रुतौ ॥ मुखेन मुखमाहत्य विनिपेत ८१
उराहवे ॥ सुमहाग्रह संकाशावन्योन्यमभिहन्य न ॥ पतन्तः सहसा जिह्मौ अन्योन्यं शतधा कृतौ ॥ शरौ प्रतिहतौ दृष्ट्वा
इन्द्रजिल्लक्ष्मणाभ्यां २ शरासने ६

तं राक्षसीं चमूं। स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसां। देवासुराणां क्रुद्धानां यथा भीमः पुराभवत्। हनुमानपि संक्रु
द्धः शालमुत्पाट्य वीर्यवान्। स रक्षसां कदनं चक्रे दुःसहं दहनवांतकः। विभीषणश्च संक्रुद्धो धनुष्पाणिर्महाबलः। सामा
त्यस्तत्र संग्रामे ऽभ्यद्रवद्गणांस्तथा। रक्षांस्युत्तमतं युयुधे पि तस्य स्पंद छित्त्वा। लक्ष्मणाय परमास्त्रं पुनरेवाभ्यधाव
त। तौ प्रयुद्धौ पुनर्वीरौ रणे लक्ष्मणराक्षसौ। शरवार्षं विनिघ्नंतौ जघ्नतुस्तौ परस्परं। अभीक्ष्णमंतर्दधतुः शरजाले
र्महाबलौ। चंद्रादित्याविवोक्षांते यथा मेघैस्तिरस्कृतौ। शरौघान् विसृजंतौ तौ उभावुभौ मते सुमानानौ। विकर्षतो
वसलिलं मेघाविव मत्तावलौ। नैव दाने न वा संधाने धनुषोन परिग्रहे। न विप्रमोक्षे बाणानां विकर्षणे न विग्रहे।
न मुष्टिप्रतिसंधाने न लक्ष्यप्रतिप्रतिपादने। अदृश्यत तयोः शाश्वत् युध्यतोः पाणिलाघवं। वायुवेगप्रमुक्तैश्च
बाणजालैः समंततः। अंतरिक्षे प्रतिच्छन्ने न रूपाणि चकासिरे। तमसा पिहितं सर्वमासीत् भीमतरं महत्। न तदा प्र
ववौ वायुर्न जज्वाल च पावकः। स्वस्त्यस्तु लोकेभ्य इति ऊचुस्तत्र महर्षयः। संपेतुश्चापि गंधर्वाः सह चारणाः सह वा
रणाः। अथ राक्षससिंहस्य कालानुकृष्णपिणः। शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान्। ततः अन्यं ग्रमं
सं सौमित्रिर्नाराचमपि लक्ष्य तं। शत्रुवीर्यप्रमथनं सर्पं क्रुद्धमिवाददे। स तेन बाणाशनिना तलशब्दानुनादि
सारथेः ना। धनुर्मेघ प्रसृतेन यंतुर्जीवितमाददे। स यंतरि महातेजा निहते रावणात्मजः। प्रजहौ च समुद्धर्षं विष
ण्णश्च बभूव ह। विषण्णवदनं दृष्ट्वा रावणिं हरियूथपाः। प्रहृष्टमनसो लंगत्वा रथमस्यन्यपोथयत्। ततः प्रमाथी
ऋषभः सरभो मेघनिस्वनः। अमर्षमाणाश्चत्वारश्चक्रुर्वेगं हरीश्वराः। ते तस्य हयमुख्येषु तूर्णमुत्पत्य वान
राः चतुर्षु सुमहावीर्या निपेतुः सहसा बलात्। तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः। मुखेभ्यः शोणितं तेषां
हयानां संप्रवर्तितं। ते निहत्य हयांस्तस्य निर्ममंथू रथस्य च। पुनरुत्पत्य वेगेन सौमित्रेस्तस्थुरग्रतः।
स हताश्वाद्वरुत्तुय रथात्पतितसारथेः। बाणानभ्यंततं मत्यग्रं बाणैः सौमित्रिमर्दयत्। ततः स सौमित्रि
मं था प्रमत्तं क्षितिं पदातिं निहितैस्तु रंगे। स ऊंतमाजौ निशितान् इषूत्तमान् शराजरं बाणाशाते

गतं वि
रूपा।८

केचित् शैलान् समाश्रिताः। हतमिंद्रजितं दृष्ट्वा शयानं धरणीतले। राक्षसानां सहस्रेषु न कश्चित् स्वतिष्ठत॥ ततो जितेंद्रसे
हृष्टः समरे हरियूथपाः। विनेदुर्मुमुचुश्चैव लांगूलानि प्रहर्षिताः। यथास्तं गत आदित्ये नावतिष्ठंति रश्मयः। तथा
तस्मिन् निपतिते नानातिष्ठन् निशाचराः। शांतरश्मिरिवादित्यो निर्वाणश्च यथानलः। बभूव स महातेजाः समरे गतजीवि
तः। प्रशांतः परुषो वायुर्नष्टा निष्ठ्रा हर्षिवान्। बभूव पतिते लोको राक्षसेंद्रसुते तदा। जहर्ष शक्रो भगवान् स
ह सर्वैः सुरासुरैः। यज्ञमनिहते तस्मिन् राक्षसे पापकर्मणि। शुद्धा आपो नभश्चैव जहृषुर्दैत्यदानवाः। आजग्मु
ः पतिते तस्मिन् सर्वलोकभयावहे। ऊचुश्च सहिताः सुष्टाः देवगंधर्वदानवाः। विज्वराः सुरजाताः हतेतस्मिं राक्ष
से। ततो भ्यनंदन् सौमित्रिं समरे हरियूथपाः। तमप्रतिबलं दृष्ट्वा हतं नैरुतपुंगवं। विभीषणो हनुमान्
जांबुवांश्चापि वानरः। विजयेनाभिनंदंतं प्रशशंसुश्च लक्ष्मणं। क्ष्वेडंतश्च प्लवंतश्च गर्जंतश्च प्लवंगमाः। लब्धलक्षे
रघुसुतं परिवार्याव तस्थिरे। लांगूलानि प्रविध्यंतः स्फोटयंतश्च वानराः। लक्ष्मणो जयतीत्येवं वाक्यं व्यश्रावयंस्ततः
अन्योन्यं च समालिंग्य कपयो हृष्टमानसाः। चक्रुरुच्चावचगुणा राघवाश्रयजाः कथाः। तदसुकरमवाप्य संप्रहृष्टाः प्रि
यसुहृदो युधि लक्ष्मणस्य कर्म। परममुपागता मनः प्रहर्षं विनिहतमिंद्ररिपुं निशाम्य देवाः॥ इति इंद्रजिद्वधो नाम
सर्गः॥ ॥रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः। बभूव हृष्टस्तं हत्वा शक्रजेतारमाहवे। महानुभावः क्लमेन रा
जलक्षणसंमितः। बभूव विक्षितततनुः समरे तेन रक्षसा॥ ततः स संसरन् वीरं जांबुवंतं च वीर्यवान्। स निवर्त्य महा
वेगौ तांश्च सर्वान् वानौकसः। आजगाम च दृष्टात्मा यत्र सुग्रीवराघवौ। विभीषणमवष्टभ्य हनूमंतं च वीर्यवान्। ततो रा
ममभिक्रम्य सौमित्रिरभिवाद्य च। तस्थौ भ्रात्रसमीपस्थः शक्रस्येव बृहस्पतिः। आववक्षेऽथ धर्मात्मा राघवायैव विभीष
णः। क्रिया चेंद्रजितः शास्त्रं लक्ष्मणेन महात्मना। निवेदयच्च रामाय तदा हृष्टो विभीषणः। विभीषणवचः श्रुत्वा हर्षव्या
कुललोचनः। विभीषणं पुरस्कृत्य हर्षेण नूनं तं च राघवः। जांबुवंतं च सुग्रीवं सर्वांश्चैव वानौकसः। स्पर्शं सद्वारजश्चा
ईलं समाश्वासयतां गुरुं॥ रामेंद्रसमो भ्राता लक्ष्मणं पंकजमलच्छोभां। उपवेश्य तदुत्संगे परिष्वज्य च पीडितं। पीडि ८२

= विभीषणेन सहायेन लक्ष्मणः।

विभीषणः।६

तावुभौ रणमूर्द्धनि । निहतौ रोषजालोऽ लक्ष्मणेंद्रजितावुभौ । सौमित्रिरिषुसं क्रुद्धः संदधेस्त्रंसुदारुणं । राक्षसेंद्र
जितुक्रुद्धोऽसकृतसमनंतरं । तयोः सुमहत्युद्धे प्रवृत्ते लोमहर्षणे । गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् । भि
रवास्य रुते युद्धे ऽभिमेवानरराक्षसाः । भूतानिर्बकुरणि राकाशं विस्मृतं नावृतं । बाणैः । ऋषयः पितरो देवा गंधर्वा गरुडोर
गाः शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे । तथान्यं मार्गणं श्रेष्ठं संदधे राघवानुजः । हुताशनसमस्पर्शं रावणात्मज
दारणं । इदं तमद्रुहरावांगसुपर्वाणं सुसंस्थितं । सुपुंखं निकृतं वीरं शरीरांतकरं परं । दुराधर्षं दुर्विषहं राक्षसानां
विदारणं । आशाविषसमस्पर्शं देवपूगसंपन्नमर्चितं । येन शक्रः प्रयुक्तो महद्दानवांतकरः प्रभुः । पुरा देवासुरे युद्धे वी
र्यवान् हरिवाहनः । तमिंद्रदत्तं सौमित्रिः समरे व्यपराजितं । शरश्रेष्ठं धनुःश्रेष्ठे नरश्रेष्ठोभिसंदधे । संधायमित्र
मथनं व्यपकृष्य शरासनं । संधायमानं कुद्धर्षं कालं लोकक्षये यथा । संधाय । घ धनुःश्रेष्ठे विकर्षन्निदमब्रवीत् ।
लक्ष्मीवान् लक्ष्मणो वाक्यं अर्थसाधनमात्मनः । धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यथा । पौरुषे चाप्रतिद्वंद्वस्तथे
मं जहि रावणिं ॥ इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगं । लक्ष्मणः समरे वीरः ससर्जेंद्रजितं प्रति । संधाय
वाप्रमेयेन रक्षःसाशातनेन व । रौद्रेण श्वेपणं संयोज्य लक्ष्मणः परवीरहा । स शिरः सशिरस्त्राणं श्रीमज्ज्वलि
तकुंडलं । प्रमथ्येंद्रजितः कायात्पातयामास भूतले । तत्र वागातनकेन कस्य स्कंधात् छिन्नं शिरो महत् । तपनीयनि
भं भूमौ दद्दशे रुधिरोक्षितं । हतः स निपपाताशु धरण्यां रावणात्मजः । कवची सशिराः खड्गी विध्वस्तसशरास
नः । चुक्रुशुः स्तेततः सर्वे वानराः सविभीषणाः । प्रहर्षं निहिते तस्मिन् देवा वृत्रवधे यथा ॥ अथांतरिक्षे भू
तानां ऋषीणां च महात्मनां । बभूवत त्रसंनादो गंधर्वाप्सरसामपि । पतितं रावणिं ज्ञात्वा सा राक्षसमहाचमूः ।
वध्यमाना प्रदुद्राव हरिभिर्जितकाशिभिः । ते वध्यमाना हरिभिः शस्त्राण्युत्सृज्य राक्षसाः । लंकामभिमुखाः स
स्कः नष्टतो नष्टचेतसः । दुद्रुवुः सहिता नाराः राक्षसाः सर्वतोदिशं । यत्काश्चहरणा एयाशु पट्टिशासिपर
श्राक्षकानंरुतां ४ समीवाहिनव तथा ॥ २ स्वधानु । केविल्लंकामभिमुखाः प्रविष्टा वानरार्दिताः । समुद्रे पतिताः केचित्

संख्ये कस्मजं महद्दविशात् । सपुत्रवधसंतप्तः । क्रूरः क्रोधवशंगतः । ज्ञातिसंज्ञां महाबाहुः समोहवसमन्वितः । संप्राप्य त
विरासंज्ञां राजा पुरमदुःखितः । पुत्रशोकार्दितो दीनो विललापाथ रावणः । हा राक्षसवमुख्य मम वत्स महारथ । इं
द्रजित् कथमद्य त्वं लक्ष्मणस्य वशंगतः । यस्त्वं कालमपि क्रुद्धो जिंघासिभिः शरैः । मंदरस्यापि शिखरं किंपु
नर्लक्ष्मणं रणे । अद्य वैवस्वतो राजा भूयो बहुमतो मम । येन त्वं योजितः स्वात् महता कालधर्मणा । अमेधा सियतः संख्ये
देवासुरगुरोरपि । येन नाविहन्यते शक्रः सशुभमानः स्वर्गमस्कृते । अद्य देवगणाः सर्वे लोकपाला महर्षिभिः । हतमिंद्रजितं श्रुत्वा
सुखं स्वप्स्यंति निर्भयाः । अद्य लोकास्त्रयः कृत्स्नाः पृथिवी च सकानना । एकेनेंद्रजिता हीना शून्या च प्रतिभाति मे । अद्य
नैरृतकन्यानां श्रोष्याम्यंतःपुरे रवं । करेणुसंघस्य यथा निनादं गिरिगह्वरे । यौवराज्यं च लंकां च राक्षसांश्च परंतप । मात
रं मां च भार्यां च क्व नु संत्यज्य गच्छसि । ननु त्वयेंद्रजिन्मह्यं गताय यमसादनं । प्रेतकार्याणि सर्वाणि विपरीतः प्रवर्तते
स त्वं जीवति सुग्रीवे तथा रामे सलक्ष्मणे । मम शल्यमनुद्धृत्य कस्मात् गच्छसि पुत्रक । इति बाल्यं स्मरंतः श्रुत्वा तानि विनयसंपन्न
तन्मध्यगतमासीनं राक्षसानां राक्षसाधिपं । आविवेश महान् कोपः पुत्रव्यसनसंभवः । घोरं प्रकृत्या रूपं च तस्य कोपाग्निमूर्छितं
बभूव नामं रुद्रस्य क्रुद्धस्येव दुरासदं । तस्य निर्देशतो दंतान् शुश्रुवे दंतनिस्वनः । यंत्रस्यावेष्ट्यमानस्य महतो दानवैरापि
तस्य प्रकृत्या रक्तांते नेत्रे कोपाग्निना तथा । रावणस्य महाघोरे रक्ते नेत्रे बभूवतुः । तस्य क्रुद्धस्य वक्त्राभ्यां प्रापतंश्च स्फुलिंगनः
दीप्ताभ्यामिव दीप्ताभ्यां सार्चिषः स्नेहबिंदवः । राजा कालइव क्रुद्धो यां दिशं समवैक्षत । तस्यां तस्यां भयत्रस्ताः राक्षसाः संनि
लिल्यरे । तमंतकमिव क्रुद्धं सनुरावरविषादिषु । वाहंमा गां दिशः सर्वा राक्षसा नोपचक्रमुः प्रेक्ष्यापांगेन ताः क्रुद्धा संरब्धा
स्तानुपागतान् । अब्रवीत्तान्निरुत्तान् सर्वान् विस्तमयिषु राहवे । मया वर्षसहस्राणि चरता दुःश्चरं तपः । तेषु तेष्ववकाशे
षु स्वयंभूः परिसादितः । तस्यापि तपसो व्युष्टा प्रसादाद् ब्रह्मणः स्वयंभुवः । नासुरेभ्यो न देवेभ्यो भयं मम कदाचन । कवचं ब्रह्म
दत्तं च यच्च मे अंबुदसंन्निभं । देवासुरविमर्देषु अभिन्नं वज्रशक्तिभिः । तेन मामद्य संनद्धं रथस्थमिह संयुगे । कः प्रतीयात् ८२
—मद्य शक्रसाक्षादपि पुरंदरः । यत्तदाभिप्रसादेन मे

तंसायकैर्दृष्ट्वा राघवो दुःखितोभवत् । दुःखहर्षयुतो रामः संस्मृत्य हितं इ वा बभौ । उपलभ्य ततः संज्ञां समुदीक्ष्य तु लक्ष्मणं । स
मूर्द्धि विनं समाघ्राय रामः स्मरन् सुवान्नतं । भ्रातरं परमप्रीतः संश्रान्तस्य पुरुषर्षभः । कृतं सुदुष्करं कर्माणि कर्मदुःकृतं त्वया
दुःखापत्र सह्याघ वधेनेंद्रजितोरणे । निरमित्रः कृतोस्म्यद्य निर्यास्यति हि रावणः । बलव्यूहेन महता श्रुत्वा पुत्रं निपातितं
तं पुत्रवधसंक्लिष्टं निर्यातं राक्षसेश्वरं । बलेनाहं समासाद्य हनिष्यामि रिपुं रणे । त्वया लक्ष्मण नाथेन सीता च पृथिवी मम
न दुःप्राप्या हतोद्य घ शक्रजित्सु महाबलः ॥ स तं भ्रातरमाश्वास्य परिष्वज्य च पाडितं । रामः सुषेणं मुदितः समाभाष्येद
मब्रवीत् । सशल्योयं महाप्राज्ञ सौमित्रिर्मित्रनंदनः । यथा भवति निःशल्यः तथा त्वं कर्तुमर्हसि । विशल्यकरणींना
मुवने हिमवती सुमां । लक्ष्मणाय ददौ वीरः सुषेणः परमौषधीं । स तस्या गंधमाघ्राय विशल्यः समपद्यत । तथानि
र्वेदनश्चैव संरूढव्रण एव च । विभीषणमुखानां च सुहृदां राघवाज्ञया । तामौषधीं महाभागः सुषेणः प्रददौ तदा । कृ
रुवानरयोधानां पर्वतकम्पयोधिनां । समरे प्रतियुद्धानां हराणां च महाबलः । ततः प्रकृतिमासेदुः हतशल्या गतक्ल
माः । हृष्टुवुर्वानराः सर्वे संहृष्टा रामलक्ष्मणौ ॥ सौमित्रिप्रमुखाः सर्वे वानरा विगतज्वराः । बभूवुर्मुदितास्तत्र प्रा
प्यामृतमिवामराः । लक्ष्मणस्तु तदा हृष्टस्तेववाबरकृथपाः । उत्साहं द्विगुणं प्रापुः तथा नाथ पराक्रमो ॥ ततस्तु रामः
प्लवगाधिपस्तथा विभीषणश्चर्क्षपतिश्च जाम्बुवान् । अपूर्वेद्या सौमित्रिमदानमुक्तितं तदा ससैन्याः सुचिरं जहर्षि
रे ॥ अपूज्य तत्कर्म च लक्ष्मणस्य तत् सुदुष्करं दाशरथिर्महामतिः । बभूव हृष्टश्च युधां सदं तदा निशम्य तं शक्र
जितं निपातितं ॥ इति श्रीविजयाख्यापने नाम सर्गः ॥ ॥ ततः पौलस्त्यसचिवाः विज्ञायेंद्रजितं हतं । विज्ञापयामा
सुरघोरा रावणं सहितास्तदा । न्यवेदयं श्च दुःखार्ताः वधमिंद्रजितस्तु ते । विभीषणसहायेन लक्ष्मणेन तु राजमना । का
यमाकांक्षिता राजन सुयुद्धेन तवात्मजः । शूरः संगम्य शूरेण संयुगे विनिपातितः । विषमस्थवदनो स्तु उ रावणोत्या
न वाहिरे । स स्वर्गमिंद्रजिद्यातः शरैः संतर्प्य लक्ष्मणं । स तद्वधं प्रतिमर्यश्रुत्वा पुत्रस्य रावणः । घोरमिंद्रजितः

रुद्धयामया। पश्यहं तस्य दृष्टेन तया यास्य निमित्तेता। नाद्य तावन्नुशोचिष्यं अत्र ष्टा निष्ठां गतिं गतो। मन्ये घृतस्यारु
ह्यं स्वस्त वामे स्फुटिष्यति। एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि। सा हि कुम्भ न बाल्यं च यौवनं च मनस्विनः। धर्म
कार्याणि रूपं च रुदती चिंतयिष्यति। निशाचरहते पुत्रे दृत्वा आक्रमचेतना। अग्निमारोक्ष्यते नूनं आर्यं चोपगमि
ष्यति। धिगस्तु दासीमसतीं मंथरां पापदर्शिनीं। यन्निमित्तं महद्दुःखं कौशल्या प्रतिपद्यते। इत्येवं मैथिलीं प्रेक्ष्य
विलपंतीं तपस्विनीं। रोहिणीमिव चंद्रेण विना ग्रहवशं गतां। सुपार्श्वो नाम मेधावी रावणं राक्षसेश्वरं। निवार्यमा
णं स विविरिदं वचनमब्रवीत्। कथं नाम दशग्रीव सादोत्तु विश्रवः सुतः। हंतुमिच्छसि वैदेहीं कोपाद्धर्ममनु
स्मर। विद्यावेदव्रतस्नातः स्वधर्मनिरतः सदा। स्त्रियः कस्माद्वधं राजन् मन्यसे राक्षसाधिपः। इष्ट यद्रूस्पमेव
तः कृत्वेऊ तस्य वो तमे। स्त्रीवधेनानुरूपो वि विशेषेण मनस्विनः। मैथिलीं रूपसंपन्नां अपास्यत्व सुदर्शनां
अस्मिन्देवरणे दीप्ते राघवे कोपमुत्सृज। अभ्युत्थानं हि युद्धस्य कृष्णपक्षे चतुर्दशी। कृत्वा निर्याह्यमावास्यां विज
यायबालैर्वृतः। निःसंशयः शराः खड्गवरे एवं रथमास्थितः। हत्वा दाशरथिं रामं राजन् प्राप्स्यसि मैथिलीं। ए
न मुक्तात्तो ख्याय बलात्संगृह्य वीर्यवान्। अपाकर्षत वैदेह्याः सत्काराद्राक्षसेश्वरं। समवेदयत वैदेह्याः
रूपवीर्यगुणोत्तमं। न'ओसिके पदे दोषो रावणस्य दुरात्मनः॥ सतद्दुरात्मा विनिवेदितं ततो वाचः सुधर्म्यं प्र
तिगच्छ रावणः। गृह्य ऊगमामाप्य मनोऽस्य वीर्यवान्। पुनः समर्थं वाभियुयासुकृतबलः॥ इति सुपार्श्वो वाक्यं नाम
सर्गः॥ ॥सप्तविंशपसर्गे राजा दानः परमदुःखितः। निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन्। उवा
च स तदा मुख्यान् बलमुख्यान् महाबलः। रावणः प्रांजला वाक्यं पुत्रव्यसनकर्शितः। सर्वे भवंतः सर्वेण हस्त्य
श्वेन सुदर्शिताः। निर्यात रथसंघैश्च पदातिश्चापि शोभिताः। एकं रामं प्रतिक्षिप्य समरे हंतुमर्हथ। प्रहृष्टा
शरवर्षेण प्रावृषेव बलाहकः। अथवाहं शरैस्तीक्ष्णैर्भिन्नदेहे भिन्नमर्माणमाहवे। सहसवैर्भवद्भिस्तैरामं वक्ष्या ८४
मि संयुगे॥ इत्येवं वाक्यमादाय राक्षसेंद्रस्य राक्षसाः। निर्ययुस्ते रथैः शीघ्रैर्नागानीकैश्च संवृताः। सर्वसंग्रा

सशरं स्कार्मुकं महत्॥ देवासुरविमर्देषु महद्दत्तं स्वयंभुवा॥ अथ हर्येनिनादेन धनुरुत्क्षेपयन्नभूत्। रामलक्ष्मणयो रेव वधा
य परमाहवे। सपुत्रबंधुसंततः स्वः शत्रुवशंगतः। समाख्य रावणो बुध्या विदेह्या रेवयद्वचः। प्रत्युवाच तता नु सर्वान् राक्ष
सान् घोरदर्शनान्। दानानदीनमुखाश्चैव तानुवाच निराम्नरवन्। मायया मम वक्षसे न त्रासार्थं च वनेऽक्षसां। किं वि
देव हि हत्वा यतु सीतेयमिति दर्शिता। तदिदं सत्यमेवाहं करिष्ये प्रियमात्मनः। विदेह्यास्तु दयिष्यामि हत्वा बंधुमनु
व्रतं॥ इत्येवमुक्त्वा स विवान् खड्गमाशु पराक्रमः। ऊर्ध्वयुग्मसंपन्नं विमलांबरदर्शनं। निष्पपाताशु वेगेन सत्वाप्यस
विविः सहसा रावणेर्ष्यपुत्रशोकेन स्वरामाकुलचेतनः। तं खङ्गकोपसंयुग्मं व्ययोयत्र मैथिली। उद्गीर्तराक्षसं वेक्ष्य
सिंहनादं प्रचुक्रुशुः। उचुश्चान्योन्यमालिंग्य संक्रुद्धं प्रेक्ष्य राक्षसाः। दृष्ट्वायं तत्र वाम्भिध्यृष्ट्वा निहनिष्यति राघवौ। लोक
पाला हि च वारः क्रुद्धेनानेन निर्जिताः। बहवः शत्रवः श्चान्ये क्रुद्धेनानेन निर्जिताः। तेषां संरुध्यमानानां अशोकवनि
कागता॥ अभिद्रुतानां विदेही रावणेः क्रोधमूर्छितः। वार्यमाणो बहुविधं सुहृद्भिर्हितबुद्धिभिः। अभ्यद्रवत वैदेहीं ग्र
हः खे रोहिणीमिव। कंपयन् वसुधां कोपात् पादन्यासे क्रतं क्रमान्। पुत्रशोकसमाक्रांतः रावणेकृतमानसः। मैथि
ली रक्षमाणा उराक्षसानिरनिंदिता। विलपंती रणागतं राघवं सानुजं सता। ततः तथा क्रोधदीप्तादं आयांतं ऊनक्त्ता
मजा। दृष्ट्वैरावणं क्रुद्धं निस्त्रिंशावरधारिणं। तमवेक्ष्य स निस्त्रिंशा व्यथिता ऊनकात्मजा। निवार्यमाणस्स निविःम
नासिव बनारयत्। तथार्मसमभिक्रुद्धः समभिद्रवति स्वयं। हंत मिक्कतिपापात्मा सुनाथां मामनाथवत्। बहुशो
नोदयामीनो हि मे नवीरं मामनुव्रतां। मा प्रीममभवत्पेति निरस्याप्रततो मया। सोयं मदनवस्कानात् व्यक्तं नेरस्यतांग
तः। काम क्रोधस मा विष्टो मां हंतुमुपसर्पति। अथवा राजपुत्रौ तौ भ्रातरौ राम लक्ष्मणौ। मन्निमित्तमनार्येण सम
रे च निपातितौ। संप्रयेव हि लंकायां रक्षसां उमलः स्वनः। बहूनामिव हृष्टानां मया आक्रोशतां श्रुतः। अथवेंद्रजि
तं श्रुत्वा लक्ष्मणेन रणोहतं। संतप्तः पुत्रशोकेन मां हंतुमुपसर्पति। अथवा राजपुत्रौ तौ विनाश्य कृतनिश्चयः
तं विवामर्षसंरब्धो मां वधिष्यति रावणः। अहो धिग्मन्निमित्तोयं विनाशो राजपुत्रयोः। हनूमतो हि तद्वाक्यं न कृतं

वातरं हसां॥ चतुर्दश सहस्राणि सारोहाणां च वाजिनां॥ पर्वतशृंगसदृशे पतितानां च रक्षसां॥ निमेषांतरमात्रेण शरैरग्निशि
खोपमैः॥ हतान्येकेन रामेण लीलयाविदितात्मना॥ ते हतास्थाहतस्तथा हतस्तातगतश्च जाः॥ अपि पंचपुरीस्थानां हतशेषा नि
शाचराः॥ निहितैरपपाद्यातिसाद्ध्रुम्रवरणाकिरे॥ आक्रीडमिव रुद्रस्य क्रुद्धस्येव महात्मनः॥ ततो देवाः सगंधर्वाः सि
द्धाश्च परमर्षयः॥ साधु साध्विति रामस्य कर्मैतत्समपूजयत्॥ अब्रवीच्च तदा रामः सुग्रीवं समनंतरं॥ एतदस्त्रबलं सौम्यम
मवास्त्रं च कस्यवा॥ निहत्य तां राक्षसवाहिनीं च रामस्तदा शक्रसमो महात्मा॥ अस्त्रेण दिव्येन जितक्लमश्च संस्तूयते देवग
णैः प्रहृष्टैः॥ इति श्रीरामास्त्रयुद्धं नाम सर्गः॥ ॥ तानि नागसहस्राणि सारोहाणां च वाजिनां॥ रथानामग्निवर्णानां सध्वजा
नां च रूपिणां॥ रक्षसां च सहस्राणि गदापरिघयोधिनां॥ अतीव चारुरूपाणां कांचनध्वजवर्मिणां॥ निहितानि शरैर्दीप्ते
स्तत्क्षणं च नभूषणैः॥ रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा॥ दृष्ट्वा ऋवाचसत्रस्ता हतशेषा निशाचराः॥ राक्षस्य
उ संगम्य दीनाश्चिंतापरायणाः॥ विधवा हतपुत्राश्च क्रोशंत्यो हतबांधवाः॥ राक्षस्यः सह दुःखार्ताः संगताः पूर्ववैय
ना॥ कष्टं शूर्पणखा वृद्धा कराला निम्नतोदरी॥ आससाद वने रामं कंदर्पसमरूपिणं॥ सुकुमारं महासत्वं सर्वभूतहि
ते रतं॥ तं दृष्ट्वा लोकवध्या सा कथं राममकामयत्॥ कथं सर्वगुणैर्हीना गुणवंतं महौजसं॥ सुमुखं दुर्मुखी रामं कामया
मास राक्षसी॥ जनस्यास्याल्पभाग्यत्वात् मलिना रुद्रमूर्द्धजा॥ अकार्यमनुकांक्षस्यैव सर्वलोकविगर्हितं॥ राक्षसानां विना
शाय दूषणस्य खरस्य च॥ चक्रे प्रतिरूपस्य राघवस्य प्रधर्षणं॥ तन्निमित्तं कृतं वैरं दशग्रीवेण रक्षसा॥ वधाय
चाहृता सीता रावणेन क्रूरात्मना॥ मारीचो दंडकारण्ये हरो राक्षसपुंगवः॥ हतो रामेण विक्रम्य पर्याप्तं तन्निदर्शनं॥ च
तुर्दश सहस्राणि रक्षसां भीमकर्मणां॥ निहतानि जनस्थाने शरैरग्निशिखोपमैः॥ खरश्च निहतः संख्ये दूषणस्त्रि
शिरास्तथा॥ शरैराशीविषाकारैः पर्याप्तं तन्निदर्शनं॥ न च सा तां दशग्रीव प्राप्स्यते जनकात्मजां॥ बर्द्धबलवतावस्याद
सा राघवौ वेणव॥ विदेहीं प्रार्थयानं तु विराधं कृष्य राक्षसं॥ हतमेकेन बाणेन पर्याप्तं तन्निदर्शनं॥ हतो घोरजनबाहु ८५
श्च कबंधो रुधिराशनः॥ हताश्च राघवाभ्यां च राक्षसा युद्धकोविदाः॥ वानरं वालिनं हत्वा सहस्रनयनात्मजं॥ मलिनं

=उत्क्रम्यउत्क्रम्य ।४ दुःखयाणि ।० शरासनात् ॥० शरारिरणे नास्ति सर्वं अंबलानि । शरैरनाप्ति सं० ।१६

मोजवज्रीमः सूर्यस्योदयनं प्रति । रक्षसां वानराणां च तुमुलः समपद्यत । ते गदाभिर्विचित्राभिः प्रासैः खड्गैः परस्वधैः ।
अन्योन्यं समरे जघ्नुस्तदा वानरराक्षसाः । हतानां युधि वीराणां तदा वानररक्षसां । संख्यानं शक्यते कर्तुं बहुत्वाच्च ततस्त
दा । मातंगरथशार्दूलरथमस्यध्वजद्रुमाः । शरारिसंघातवहाः प्रसस्रुः शोणितापगाः । ध्वजवर्मरथाश्वानागा नानाप्रह
रणानि च । प्रच्छन्नप्रच्छन्नश्च समरे वानरैर्जाबर्मञ्छिरे । शंकेके कर्णललाटानि नासिकाश्च प्लवंगमाः । रक्षसां दशनैस्तीक्ष्णै
र्नखैश्च विचकर्तिरे । एकैकं राक्षसं संख्ये शतं वानरपुंगवाः । अभ्यधावंत बलिनो वरं दंष्ट्रा क्रमनयो यथा । ते गदा
भिश्च खड्गैश्च पट्टिशैः परश्वधैस्तथा । निजघ्नुर्वानरान् शूरान् राक्षसाः पर्वतोपमाः । अविष्टं राक्षसं सैन्यं धानैः
सूर्यमिवावृतं । नाभिद्रु[illegible]स्तदा रामं निर्दहंतं शरार्चिषा । निहन्ना युधि रामेण घोरास्ते रजनीचराः । रणे रामस्य
ददृशुः कर्माण्यप्रसुकराणि ते । कालयंतं महात्मानं क्षिपयंतं महारथान् । न ते ददृशिरे रामं वातं नरमतं यथा । छि
न्नं भिन्नं विपर्यस्तं प्रभग्नं शस्त्रपातितं । बलं रामेण ददृशुर्न रामं शीघ्रकारिणं । प्रहरंतं शरीरेषु न ते पश्यंति राघवं । इं
द्रियार्थेषु वर्तंतं भूतात्मानमिव प्रजाः । एष हंति गजानीकं एष हंति महारथान् । एष हंति शरैस्तीक्ष्णैः पदातीन्
वाजिभिः सह ॥ अपरामो महातेजा युद्धमानश्च रक्षसां । अज्ञांव्यपाहर तत्र मोहनास्त्रबलेन वा । ते विमूढा विसंज्ञाश्च
रामान्वितमिदं जगत् । ददृशू राक्षसास्तत्र ततो जघ्नुः परस्परं । अन्योन्यं सहिता जघ्नुः शक्तिशूलपरस्वधैः । मोहिताः
परमास्त्रेण गांधर्वेण महात्मना । न ते ददृशिरे रामं निघ्नंतमरिवाहिनीं ॥ ततो रामसहस्राणि रणे पश्यंति राक्षसाः । पु
नः पश्यंति काकुत्स्थं एकमेव महाहवे । भ्रमंतीं कांचनीं कोटिं कार्मुकस्य महात्मनः । अलातचक्रप्रतिमां ददृशुस्ते निशा
चराः । सूर्यमंडलसंभूतरश्मिजालमिवांबरे । शरजालं ददृशिरे राघवस्य धनुश्च्युतं । शररश्मिसहस्राढ्यं मध्यमक्रा
दित्यसंनिभं । वरं तदा । दुःसर्वासु नरो क्रस्तमुदीक्षितुं । शरारनाभिसत्त्वार्चिश्चापनेमिस्वनोद्धतं । ज्याघोषतल
निर्घोषं तेजोबुद्धिगुणप्रभं । दिव्यास्त्रगुणसंपन्नं तथा शरशताकुलं । रामचक्रं विवर्तंतं कालचक्रमिवापरं । द
दृशुः सर्वभूतानि दहंतं सर्वराक्षसान् । अनीकं शतसाहस्रं रथानां वातरंहसां । अष्टादशसहस्राणि गजानां

विनिहितान राक्षतुल्यपराक्रमान् । दीर्घमुष्णं विनिश्वस्य मुहूर्तं ध्यानमास्थितः । बभूव परमक्रुद्धो राक्षसो भीमदर्शनः ।
संदष्टोष्ठपुटं सेद्दशानः क्रोधसंरक्तलोचनः । राक्षसेन्द्रः सुसंक्रुद्धः कालाग्निरिव मूर्छितः ॥ उवाच तान्समुपस्थान्राक्ष
सानुराक्षसेश्वरः । तथा सक्ताद्विनिर्दंततत्र निर्दहन्निव चक्षुषा । महोदरं महापार्श्वं विरूपाक्षं च राक्षसं । शीघ्रं वदत
रक्षांसि निर्यातेति मच्चाज्ञया । तस्य तद्वचनं श्रुत्वा राक्षसास्तेन चोदिताः । चोदयामासुरव्यग्रा राक्षसांस्तान्नृपाज्ञ
या । ते तु सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः । कृतस्वस्त्ययनाः सर्वे रावणाभिमुखाय युः । प्रतिपूज्य यथान्यायं रावणं ते
महारथाः । तस्थुः प्रांजलयः सर्वे भर्तुर्विजयकांक्षिणः ॥ अथोवाच महातेजा रावणः क्रोधमूर्छितः । महोदरमहा
पार्श्वौ विरूपाक्षं च राक्षसं । वाहीताभाशु नाधानि निर्गच्छत ममाज्ञया । रामलक्ष्मणसुग्रीवान्हत्वा प्रतिनिवर्तते । स्व
बलं कपितं दृष्ट्वा समस्तं सस्तुतं रणे । तथा वानरान्विनिहितान्राक्षसानंतकोपमान् । अथ बोणैर्धनुर्मुक्तैर्युगांत
दीप्तिरिव सन्निभैः । राघवं लक्ष्मणं चैव नेष्यामि यमसादनं । खरस्य कुंभकर्णस्य प्रहस्तेंद्रजितस्तथा । करिष्ये
प्रतिकर्म्म शत्रुवधादहं । नैवांतरिक्षं न दिशो न नद्यो नापि सागराः । प्रकाशतां गमिष्यति बाणजालवृताम
या । अद्य वानरसंघानां तानि यूथानि भागशः । धनुःसमुद्राद्दुत्ता ते वधमिष्ये शरोर्मिभिः । व्याकोशपद्मवक्त्राणां पद्म
किंजल्कवर्चसां । वर्चसां । अद्य यूथतडागानि निगाहिष्ये गजेन्द्रवत् । अद्य युद्धप्रचंडानां हराणां क्रमयोधिनां । मुक्ते
न केषु शासिर्न्न निर्भिन्नस्यामि संयुगे । हतो भ्राता हतो भर्त्ता यासां च तनयाहताः । वधेनाद्य रिपोस्तासां करिष्येऽश्रु
प्रमार्जनं । अद्य मद्वाणनिर्भिन्नैर्विकीर्णैर्गिरिवत्पर्वतैः । करिष्ये वानरैर्भूमिं अद्यास्तीर्णतलां महीं । अद्य गोमाय
वो गृध्रा ये चान्ये पिशिताशनाः । सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शरार्दितैः । कल्प्यतां सरथः श्रीमान्क्षिप्रमानी
यतां धनुः । अनुयातु च मां युद्धे येत्र शिष्टा निशाचराः ॥ तस्य तद्वचनं श्रुत्वा महापार्श्वोऽब्रवीद्वचः । बलाध्यक्षं स्थितं
तत्र बलं संत्वर्यतामिति ॥ बलाध्यक्षः सत्वरितो राक्षसांस्तान् गृहाद्गृहात् । चोदयन्परिययौ लंकां लघुपरा
क्रमः ॥ ततो मुहूर्तान्निःपेतुः निरुता भीमविक्रमाः । अकृष्टा निनर्दंतश्च नानाप्रहरणैर्भुजैः । प्रासासिपट्टिशैः ६६

मेघसंकाशं राघवेण महात्मना । ऋश्यमूके वसन् शैले दीनो भग्नमनोरथः । सुग्रीवः आपितो राज्यं पर्यावृत्तं तद्विदर्शनं
धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितं । युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते । विभीषणवचः कुर्याद्यदि स्म धनदानुजः
श्मशानभूता दुःखार्ता नेयं लंकापुरी भवेत् । कुंभकर्णं हतं श्रुत्वा राघवेण महात्मना । प्रियं चेंद्रजितं पुत्रं रावणोद्य नु
शोचति । मम पुत्रो मम भ्राता मम भर्ता हतो रणे । इत्येवं श्रूयते शब्दो राक्षसानां गृहे गृहे । रथाश्च नागास्तथाश्वाश्च हताः शत
सहस्रशः । रणे रामेण शूरेण राक्षसाश्च पदातयः । रुद्रो वा यदि वा विष्णुर्महेंद्रो वा शतक्रतुः । हंति नो रामरूपेण यदि वा
स्वयमंतकः । हतप्रवीरा बहवो निराशा जीविते प्रिये । व्यसनान्यनुपश्यंत्यो विनाथा विलपामहे । राघवास्त दशग्रीवः शू
रो लब्धपराक्रमः । इदं महाभयं घोरं समुत्पन्नं न बुध्यते । तं न देवा न गंधर्वाः पिशाचा न च राक्षसाः । उपसृष्टं परित्रातुं श
क्ता रामेण संयुगे । निमित्तानि च दृश्यंते रावणस्य रणे रणे । तानि रामेण फलिष्यंति रावणे निहते रिपौ । देवदानवयक्षे
भ्यो दत्तो ब्रह्माभियाचितः । रावणस्याभयं युद्धे मानुषेभ्यो न याचितं । तदिदं मानुषात्संख्ये नियतं समुपागतं । अभि रक्षे पा०
तीतं करं घोरं रक्षसां रावणस्य च । पीड्यमानास्तु बलिना वरदत्तेन रक्षसा । देवास्तपोभिर्नियमैः पितामहमतोषय
न् । देवतानां महातेजाः परितुष्टः पितामहः । उवाच देवताः सर्वाः परितुष्टो इदं वचः । अद्यप्रभृति लोकेषु ये भूता भ
यवर्जिताः । भयार्तास्ते पुनरिह भविष्यंतीह राक्षसाः ।। अथ देवैः समागम्य सर्वैः सिंधुपुरोगमैः । वृषध्वजस्त्रि
